माघेन हि प्रकटिता सकलर्तुलक्ष्मीः ॥

गद्यात्मिकापि सुमनोभिरमेयपद्या
शय्याश्रिताप्यविरतं भुवने चरन्ती ।
शुद्धापि रञ्जितजना श्रुतिमार्गगापि
कादम्बरी जगति कस्य न कौतुकाय ॥

अश्वद्भिरिश्वरमणीयरणार . . . . .
. . . . . नमकरन्दरसाभिषिक्ताः ।
येषां गिरस्सुरभयन्ति जगन्ति . . .
... ... ... ... ... ॥

शब्देन कर्णकटुना पुनरर्थमन्यै-
रुत्कृष्टमुद्यतधियो नियतं. . . .
. . . . . . . . . .शः कवयः पृथिव्यां
काका इव प्रकटयन्ति कुलायदोषम् ॥

शुद्धात्मनामपि सतां गतिमावृणोति
रुन्धे कवेरमृतगोरपि गोविलासम् ।
कं बाधते न खलता भुवनेषु पश्चा-
दाविर्भवेदभिभवश्शशशृङ्गतोऽपि ॥

दूरोज्झितापि सुमनोभिरलं भुजङ्गै-
रङ्गीकृता च परिहीणफला द्रुमा च ।
आमोदहेतुरिह यद्यभविष्यदेषा
स्पर्धां प- रलतया खलताकरिष्यत् ॥

गोभिर्निसर्गमधुराभिरतिप्रसन्न-
मारूढलक्षणमनूदितमेव सद्भिः ।
काव्यं हि सत्स. . . .शु रसं त्यजद्भि-
राच्छाद्यते जलधरैरिव चन्द्रबिम्बम् ॥

उद्दाममत्सरमहाज्वरमन्यदीय-
कौशल्यशल्यपरिकीलितमानसानाम् ।
तन्वन्तमन्तरतिखेदमशेषजन्तो-
र्धन्वन्तरिश्च न चिकित्सितुमुत्सहेत ॥

उत्सार्य मत्सरभरं भुवि यः खलाना-
मारिप्सते विशदमात्मयशो निबन्धुम् ।
वीचीविजृम्भितमसौ विनिवार्य दूरा-
दम्भोनिधेरिव जिगाहिषते जलानि ॥

सत्काव्यसूक्तिमकरन्दमधुव्रतेभ्यो
मत्काः कथं भणितयो विरसाः स्वदेरन् ।
किं वा रतिस्त्रिदशमन्दिरसुन्दरीणां
बिम्बोकडम्बरविदां नरपामरीषु ॥

नास्तीदृशो विधिरिह क्वचनापि तूष्णी-
    मास्तां जनो गुणविहीन. . . . .लोक्याम् ।
केकाविलापिनि कलापिनि किन्न भेका-
... ... ... ...

... ... ... ...
    केचित् क्वचित् गुणलवा यदि मन्निबन्धे ।
सन्तस्सदैव सुलभान्महतोऽपि दोषा-
    नर्हन्ति सो. . . .धीरधियो नहि न स्यात् (?) ॥

सर्वस्य सर्वमनवद्यमथाप्यवद्य-
    मासिन्नवद्यमपनुद्य गुणैकलोला ।
यद्यस्ति कश्चन रसस्सुधियो धयन्ति
    धूळीं विधूय विरसां मधुराम्मधूळी ॥

नालीकतः कबळयन्ति हि चञ्चलीकाः
गद्यैरवद्यरहितैरमयैश्च पद्यै-
    राबद्धया मम गिरा गुरुभक्तिभाजः ।
पुष्पैर्नवैः किसलयैश्च निबद्ध एव
    दाम्ना चिराय परमेति मुदं मुकुन्दः ॥

अथ कदाचिदनुष्ठितप्रगेतननियमो भगवानखिलभुवनाभय-भावनापरमनिष्ठः परमेष्ठी परतरतपोगरिष्ठैर्वसिष्ठादिमुनिवरिष्ठैर्वास्तोष्पतिप्रमुखैश्च बर्हिर्मुखैर्विश्वावसुप्रभृतिभिश्च गन्धर्वपतिभिरन्यैश्च शुद्धचर्यैः सिद्धवर्यैः पर्युपास्यमानं पर्यन्तवाहिमन्दाकिनी-विकचकनकारविन्दान्दोलनकेलीखिन्दाननन्दनवनमन्दानिलमन्दा-चलितमन्दारतरुमञ्जरीविसृमरमकरन्दपानतुन्दिलमन्दचलंनि. . ."

---

## ॥ कुमारसम्भवम् ॥

### 1707. KUMĀRASAMBHAVAM.

Substance—Palm leaf. Size—11″ × 2″. Leaves—30. 9 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—750.

Subject etc.—Same as No. 1702.

Remarks—The Ms. extends up to a fragment of the 8th *Sarga.*

---

## ॥ कुमारसम्भवम् ॥

### 1708. KUMĀRASAMBHAVAM.

Substance—Palm leaf. Size—7″ × 1½″. Leaves—64. 8 lines per page and 22 letters per line. Script—Malayāḷam. No. of Granthas—700.

Subject etc —Same as No. 1702.

Remarks—The Ms. extends up to a fragment of the 7th *Sarga.*

---

## ॥ कुमारसम्भवम् ॥

### 1709. KUMĀRASAMBHAVAM.

Substance—Palm leaf. Size—8″ × 1½″. Leaves—45. 8 lines per page and 30—35 letters per line. Script—Malayāḷam. No. of Granthas—750. Incomplete.

Subject etc.—Same as No. 1702.

Remarks—The Ms. contains the first 7 *Sargas* only.

---

॥ कुमारसम्भवम् ॥

1710. KUMĀRASAMBHAVAM.

Substance—Palm leaf. Size—9½″ × 1½″. Leaves—24. 8 lines per page and 26 letters per line. Script—Malayāḷam. No. of Granthas—425.

Subject etc.—Same as No. 1702.

Remarks—The Ms. embodies only five *Sargas.*

---

॥ कुमारसम्भवम् ॥

1711. KUMĀRASAMBHAVAM.

Substance—Palm leaf. Size—10″ × 1½″. Leaves—7. 7 lines per page and 24—28 letters per line. Script—Malayāḷam. No. of Granthas—75.

Subject etc.—Same as No. 1702.

Remarks—Only 52 verses of the opening *Sarga* are embodied in this Ms.

---

॥ कुमारसम्भवम् ॥

1712. KUMĀRASAMBHAVAM.

Substance—Palm leaf. Size—10½″ × 1½″. Leaves—8.

7 lines per page and 36 letters per line. Script—Grantha. No. of Granthas—125.

Subject etc.—Same as No. 1702.

Remarks—Only the first 5 *Sargas* are embodied herein.

---

॥ कुमारसम्भवव्याख्या ॥

1713. KUMĀRASAMBHAVAVYĀKHYĀ.

Substance—Palm leaf. Size—14″ × 2″. Leaves—24. 9 lines per page and 46—56 letters per line. Script—Malayāḷam. No. of Granthas—800.

Subject—Elucidation of the Kumārasambhava.

Beginning:

श्रीकण्ठार्धमयी मह्यं श्रीविद्यानन्दसम्पदः ।
देवताभिः स्तुता दद्याद् देवता सर्वमङ्गला ॥
सर्वमङ्गलदातारौ पार्वतीपरमेश्वरौ ।
गणेशस्कन्दसंयुक्तौ वन्दे वाञ्छितसिद्धये ॥
महाकविमहेन्द्रेण कालिदासेन यत् कृतम् ।
कुमारसंभवाख्यं तत् काव्यं व्याख्यातुमारभे ॥

काव्यादौ वस्तुनिर्देशं करोति अस्त्युत्तरस्यामित्यादि । हिमालयो नाम नगाधिराजः उत्तरस्यां दिशि अस्ति । ... ...
... ... ... ...

End:

रुद्रस्यापि धैर्यं विनाशयेयमित्यर्थः । अन्ये धन्विनो मम के

अगण्याः तृणसमा इत्यर्थः। अत्र किंशब्दः क्षेपे वर्तते। मधुर्वसन्ते दैत्ये च मधु मद्ये च माक्षिके इति भोजः। पिनाकः शूलिनो धनुः इति एवं कामोक्ते.... .... .... ....

Colophon:

इति विद्यामाधवीये कुमारसम्भवव्याख्याने द्वितियः सर्गः।

Author—Vidyāmādhava.

Remarks—The Ms. embodies the commentary on the first two *Sargas* and on 10 verses of the 3rd.

---

## ॥ कृष्णकर्णामृतम् ॥

## 1714. KṚṢṆAKARṆĀMṚTAM.

Substance—Palm leaf. Size—7″ × 1½″. Leaves—48. 8—9 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—600.

Subject—Description of the noble deeds of Kṛṣṇa.

Beginning:

हरिः। श्रीगणपतये नमः। अविघ्नमस्तु।

लोकानामवनाय यादवकुले जातं रमावल्लभं
माकाधीशविरिञ्चदेवमुनिभिः संसेविताङ्घ्रिद्वयम्।
नीलाम्भोदगणातिकोमलतनुं केलीकरं सर्वदा
लीलामानुषविग्रहं मुररिपुं वन्दे जगन्मोहनम्॥

यौ तौ शङ्खकपालभूषणकरौ मुक्तास्थिमालाधरौ
देवौ द्वारवतीश्मशाननिलयौ नागारिगोवाहनौ।

द्वित्र्यक्षौ बलिदक्षयज्ञमथनौ श्रीशैलजावल्लभौ
पापं मे हरतामुभौ हरिहरौ श्रीवत्सगङ्गाधरौ ॥

चिन्तामणिर्जयति सोमगिरिर्गुरुर्मे
शिक्षागुरुश्च भगवाञ्छिखिपिञ्छमौलिः ।
यत्पादकल्पतरुपल्लवशेखरेषु
लीलास्वयंवररसं लभते जयश्रीः ॥

अस्ति स्वस्तरुणीकराग्रविगलत्कल्पप्रसूनाप्लुतं
वस्तु प्रस्तुतवेणुनादलहरीनिर्वाणनिर्व्याकुलम् ।
स्रस्तस्रस्तनिरुद्धनीविविलसद्गोपीसहस्रावृतं
हस्तन्यस्तनतापवर्गमखिलोदारं किशोराकृति ॥

चातुर्यैकनिधानसीम चपलापाङ्गच्छटामन्थरं
लावण्यामृतवीचिलालितदृशं लक्ष्मीकटाक्षादृतम् ।
कालिन्दीपुलिनाङ्गणप्रणयिनं कामावताराङ्कुरं
बालं नीलममी वयं मधुरिपुं स्वाराज्यमाराध्नुमः ॥

End:

वक्रान्तध्वस्तवैरिव्रजमजितमपास्तावनीभारमाद्यै-
रापीतं नारदाद्यैर्मुनिभिरभिरतं तत्त्वनिर्णीतहेतोः ।
मन्त्रि?तं निर्मलाङ्गं निरुपमरुचिरं चिन्तये नीलभासं
सार्यं विश्वोदयस्थित्यपहरणपरं मुक्तिदं वासुदेवम् ॥

कोदण्डमैक्षवमखण्डमिषुं च पौष्पं-
चक्राङ्कुशाब्जसृणिकाञ्चनवंशनालम् ।
बिभ्राणमष्टभुजमिष्टदमग्रगण्यं
ध्यायेद्धरिं मदनगोपविलासवेषम् ॥

या प्रीतिर्विदुरार्पिते मुररिपो कुन्त्यार्पिते यादृशी
या गोवर्धनमूर्ध्नि या च पृथुके स्तन्ये यशोदार्पिते ।
भारद्वाजसमर्पिते शबरिकादत्तेऽधरे योषितां
या प्रीतिर्मुनिपत्निभक्तिरचितेऽप्यत्रापि तां तां कुरु ॥

Colophon :

इति श्रीकृष्णकर्णामृते तृतीयोऽध्यायः ।
शुभमस्तु ।

Author :

Remarks—In RCMPL, the authorship of this work is attributed to Jayadeva. But many scholars are of opinion that it is composed by Kṛṣṇalīlāśukamuni. The author's preceptor was Somagiri.

---

॥ कृष्णकर्णामृतम् ॥

## 1715. KṚṢṆAKARṆĀMṚTAM.

Substance—Palm leaf. Size—2¾″ × 1½″. Leaves—100. 8—10 lines per page and 10—12 letters per line. Script—Malayāḷam. No. of Granthas—600.

Subject etc.—Same as No. 1714.

---

॥ कृष्णकर्णामृतम् ॥

## 1716. KṚṢṆAKARṆĀMṚTAM.

Substance—Palm leaf. Size—4″ × 1″. Leaves—98.

End:

पाणौ वेणुं प्रकृतिसुकुमाराकृतौ बाल्यलक्ष्मीः
पार्श्वे बालाः प्रणयसरसालोकितापाङ्गलीलाः ।
मौलौ बर्हं मधुरवदनाम्भोरुहे मध्यमुद्रे(?)-
त्याद्राकारं किमपि किमपि ज्योतिरन्वेषयामि ॥

आरूढवेणुतरुणाधरविभ्रमेण
माधुर्यशालिवदनाम्बुजमुद्वहन्ती ।
कैशोरके वयसि काञ्चन कान्तियष्टि-
रालोक्यतां किमनया वनदेवता वः ॥

अनन्यसा... .... ... ... ।

Colophon:

इति श्रीकृष्णकर्णामृते द्वितीयोऽध्यायः ।

Author—Same as No. 1714.

Remarks—The Ms. ends on a fragment of the 3rd chapter.

## ॥ कृष्णकर्णामृतम् ॥

### 1717. KṚṢṆAKARṆĀMṚTAM.

Substance—Palm leaf. Size—18″ × 1¾″. Leaves—4. 7—8 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—125.

Subject—Same as No. 1714.

Beginning:

हरिः ।

अभिनवनवनीतास्निग्धमापीतदुग्धं
दधिकणपरिदिग्धं मुग्धमङ्गं मुरारेः ।
दिशतु भुवनकृच्छ्रच्छेदि तापिञ्छगुच्छ-
च्छविनवशिखिपिञ्छालाञ्छितं वाञ्छितं नः ॥

यां दृष्ट्वा यमुनां पिपासुरनिशं व्यूहो गवां गाहते
विद्युत्वानिव नीलकण्ठनिवहो यां द्रष्टुमुत्कण्ठते ।
उत्तंसाय तमालपल्लवमिति च्छिन्दन्ति यां गोपिका
कान्तिः कालियशासनस्य वपुषः सा पावनी पातु वः ॥

देवः पायात् पयसि विमले यामुने मज्जतीनां
याचन्तीनामनुनयपदैर्वञ्चितान्यंशुकानि ।
लज्जालोलैरलसविलसैरुन्मिषत्पञ्चबाणै-
र्गोपस्त्रीणां नयनकुसुमैरञ्चितः केशवो नः ॥

End:

वत्स जागृहि विभातमागतं
जीव कृष्ण शरदां शतं शतम् ।
इत्युदीर्य चिरमस्य शोभया(?)
दृश्यमानवदनं भजामहे ॥

ओष्ठं गृह्णन् शिशुरिति धिया चुम्बितो बल्लवीभिः
कण्ठं जिघ्रन्नरुणितपदं गाढमालिङ्गिताङ्गः ।
दोष्णा लज्जापदमभिमृशन्नङ्कमारोपितात्मा
धूर्तस्वामी हरतु दुरितं दूरतो बालकृष्णः ॥

Colophon :

Author—Same as No. 1714.

Remarks—The Ms. contains only a fragment of the 3rd chapter.

---

## ॥ कृष्णकर्णामृतं (सुवर्णचषकोपेतम्) ॥

## 1718. KṚṢṆAKARṆĀMṚTAM

with the commentary, Suvarṇacaṣaka.

Substance—Palm leaf. Size—8¼″×2″. Leaves—123. 12—15 lines per page and 30 letters per line. Script—Grantha. No. of Granthas—3100. Complete.

Subject—Same as No. 1714.

Beginning :

चिन्तामणिर्जयति सोमगिरिर्गुरुर्मे
शिक्षागुरुश्च भगवान् शिखिपिञ्छमौलिः ।
यत्पादकल्पतरुपल्लवशेखरेषु
लीलास्वयंवररसं लभते जयश्रीः ॥

चिन्तामणिर्नाम मन्त्रविशेषः तच्चिन्तनवशात् कृतार्थोऽभूत् । कविः स जयति सर्वोत्कर्षेण वर्तते इत्यर्थः । ननु "गुरुं प्रकाशयेद्धीमान्नतु मन्त्रं प्रकाशये"दित्यादिना मन्त्रो न प्रकाश्य इति चेत् तच्चिन्तामणिमन्त्रचिन्तनफल इत्यादिना श्रीहर्षेण प्रकाशितत्वात् ।

End :

या प्रीतिः पृथुके कुचेलार्पिताचिपिटके । या प्रीतिर्यशोदयार्पिते दत्ते स्तन्ये क्षीरे । या प्रीतिर्भारद्वाजसमर्पिते । रामवनवासवेलायां प्रयागे भारद्वाजेन दीयमानफलादावित्यर्थः । या प्रीतिः शबरिकादत्ते मतङ्गाश्रमे शबरिकया दीयमानकन्दमूलफलादावित्यर्थः । या प्रीतिः योषितामधरे गोपस्त्रीजनाधरे । या प्रीतिः मुनिपत्नीभिः भक्तरचिते या प्रीतिः बृन्दावने यज्वपत्नीभिराराधमानान्न इत्यर्थः । अत्रापि मत्प्रणीतकर्णामृतग्रन्थे तां तां प्रीतिम् । वीप्सार्थे द्विर्भावः ।

Colophon :

इति श्रीपदवाक्यप्रमाणपारावारपारीणपशुपतितिरुमलभट्टोपाध्यायपुत्रेण कोदण्डाम्बागर्भशुक्तिमुक्तामणिना पावयल्लयसूरिणा विरचितायां सुवर्णचषकसमाख्यायां तृतीयशतकं समाप्तम् । श्रीदक्षिणामूर्तये नमः । श्रीगोपालकृष्णाय नमः ।

Author—Pavayallayasūri.

Remarks—The colophon discloses that the author's mother was Kodaṇḍāmbā and his father, Paśupati Tirumala Bhaṭṭopādhyāya. A commentary with the same title is noticed under No. 1464, TCM. Vol. II, Part I C. The work is attributed to Palaki Brahmabhaṭṭa and the colophon is as follows :

इति श्रीमत्पालकिब्रह्मभट्टकृते कर्णामृतव्याख्याने सुवर्णचषकसमाख्याने द्वादशोत्तरमाद्यशतकं सम्पूर्णम् ।

## ॥ कृष्णगीतिः ॥

## 1719. KṚṢṆAGĪTI.

Substance—Palm leaf. Size—9″ × 1″. Leaves—142. 6 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—1700.

Subject—The story of Śrī Kṛṣṇa.

Beginning:

... ... ... ... ... ... ...

. . . .रणे काव्यं मम व्यापयेद्

विक्रान्त्याक्रान्तविश्वद्विष...त इ. . . .

.... ....रे ।

.... .... .... ....

... ....विक्रमाख्यस्य राज्ञः ॥

स्वश्रीर्यो मानवेदो सुरमथ.... ....

.... ....वर्णनालोभनुन्नः ॥

विष्णोर्वृष्णीश्वरस्य प्रथयति... ....

... ...पेण किञ्चित् कथां ताम् ।

कान्तां विश्वव्यथान्तामिह वि(बुध) जनाः सन्तु सन्तोषवन्तः

लक्ष्मीनाथपुरासुरासुरम. . . .नैः सर्वसन्तोषवन्तः ॥

... ... ... ...

End:

संयोज्यात्मानमात्मन्यतिविशदधिया ध्यानरम्या रमायाः

काम्यां वि. . . .रम्यां त्रिभुवनजनतागीतकीर्तिं स्वमूर्तिम् ।

आदायागाः स्वधाम प्रकटनि. . . .भूत्या महत्या च भूत्या ।
क्षित्या युक्तस्सुतोषे मृदुतळिमविशेषे च शेषे. . . . .षे ॥

Colophon :

स्फायद्भक्तिभरेण नुन्नमनसा श्रीमानवेदाभिध-
क्षोणीपालकृता निराकृतकलिग्राह्या स्तुतिर्गाथकैः ।
लक्ष्मीवल्लभकृष्णगीति. . . .विविख्याता तवानुग्रहा-
देषा पुष्करलोचने पिपठतां पुष्णातु मोक्षश्रियम् ॥

इति मानवेदकृता कृष्णगीतिः समाप्ता । श्रीगुरवे नमः ।

शुभमस्तु ।

Author—Mānavedabhūpa.

Remarks—The Ms. is much damaged. This work is noticed as No. 2810, TCM. Vol. III. Part I C under the designation Kṛṣṇa-carita, based on the following colophon :

इति मानवेदकृते कृष्णचरिते प्रथमः सर्गः ।

---

## ॥ कृष्णगीतिः ॥

## 1720. KṚṢṆAGĪTI.

Substance—Palm leaf. Size—13″ × 2½″. Leaves—53. 10 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—1700.

Subject—Same as No. 1719.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

जगति सुकृतिलोकैर्नन्दितानन्दिताशा
कलविरणितवंशीभासमाना समाना ।
पशुपयुवतिभोग्या देवता देवता मा
सजलजलदपालीमेचका मे चकास्तु ॥

प्रेम्णालं लाल्यमानस्सदयमिह सदा नन्दसंज्ञेन पित्रा
रामेण ज्यायसा वा विवशमति यशोदाख्यया वा जनन्या ।
आदीव्यन्दिव्यगव्या विबुधपरिवृढोऽरिष्टदाताघमोक्षं
पुष्णन् कृष्णो गुरुर्मे परमतमवदोद्भासको बोभवीतु ॥

सौवर्णाद्भुतभूषणोज्ज्वलवचस्संवीतपीताम्बरो
नीलाम्भोदनिभो भुजैर्धृतगदाशङ्खारिपङ्केरुहैः ।
भ्राजिष्णुर्गुरुवायुमन्दिरविरोचिष्णुः स विष्णुः स्वयं
धृष्णुर्विश्वजनोपतापहरणे काव्यं समाख्यापयेत् ॥

विक्रान्त्याक्रान्तविश्वद्विपत इह गुरोर्विक्रमाख्यस्य राज्ञः
स्वस्रीयो मानवेदो मुरमथनकथावर्णनालोभनुन्नः ।
विष्णोर्वृष्णीश्वरस्य प्रथयति पदरूपेण किञ्चित् कथान्तां
कान्तां विश्वव्यथान्तामिह विबुधजनास्सन्तु सन्तोषवन्तः ॥

End etc.—Same as No. 1719.

---

## ॥ कृष्णविजयम् ॥

### 1721. KṚṢṆAVIJAYAM.

Substance—Palm leaf. Size—$15\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—

76. 7—9 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—1800.

Subject—Kṛṣṇa's birth and parentage.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

मदापगाशीकरसेकशीता
माध्वीलिहां मांसलिता निनादैः ।
हरन्तु तापं हरनन्दनस्य
कल्याणदाः कर्णसमीरणा मे ॥

आकम्रमन्दाररुचं कवीन्द्र-
माकन्दवासन्तरमाविलासम् ।
एकं निधानं वचसामुपासे
पाकं पयोजासनपुण्यराशेः ॥

कल्याणबीजाङ्कुरजन्महेतुः
कटाक्षकालाम्बुधरो गुरूणाम् ।
प्रणर्तयत्वाशु कृपाम्बुवर्षैः
प्रज्ञामयुरीं मम दीनदीनाम् ॥

End:

निरस्य सर्वं निजलीलयासौ
भूभारमेवं भुवनैकनाथः ।
मुहुर्मुहुश्शक्रमुखानमर्त्या-
नानन्दभाराकुलितान् वितेने ॥

हृत्पङ्कजेषु महतां विहृतिं वितन्वन्
वक्षोरुहेष्वपि च पक्ष्मविलोचनानाम् ।

7 lines per page and 30 letters per line. Script—Malayāḷam. No. of Granthas—500.

Subject—Beginning : Same as No. 1721.

End :

...त्य तस्मादुदकप्रवाहे पपात वेगेन पयोजनेत्रः ।
अमन्दफेनस्फुटहासलक्ष्मीस्तदाननं देवकळिन्दकन्या ॥

.... तिष्णुगरळस्य भुजङ्गमस्य ।
निष्कासनं विपहुताशनशोपितानाम् ।
तास्मिन् क्षणे तपनजाशु तरङ्गहस्तै-
र्मूलं सिषेच मुदितेव तटद्रुमाणाम् ॥

क्षोभं प्रपेदे पयसा सहैव
काकोदरः काळियनामधेयः ।
शोकेन पूर्वं कलुषीकृतानि
प्रसादमापुर्जगतां मनांसि ॥

आस्यामु(?)दस्य तरळान् गरळाग्निलेशा-
नाशामुखेषु विकिरन्मुखरीकृतापः ।
भो.........जेन परितस्तरितस्समेतः
पाताळतस्स निरगात्.... .... ॥

Colophon :

इति श्रीकृष्णविजये तृतीयस्सर्गः ।

Author—Same as No. 1721.

Remarks—FF. 18—22 are missing. The Ms. ends on a fragment of the 4th *Sarga.*

## ॥ कृष्णविजयम् ॥

## 1723. KṚṢṆAVIJAYAM.

Substance—Palm leaf. Size—14½″×2½″. Leaves—6. 8—9 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—150.

Subject—Beginning: Same as No. 1721.

End:

अथ गर्भं गते देवे वसुदेवकुटुम्बिनी ।
लोध्रकुड्मळसध्रीचीं रुचमूरीचकार सा ॥
प्रसन्नतां वहन्ती सा परिपाण्डुपयोधरा ।
पूर्णचन्द्रमुखी रेजे शरदीव नभःस्थली ॥
गर्भस्थेन मुकुन्देन मुखे कलितपाण्डिमा ।
प्राचीव चन्द्रबिम्बेन चकाशे चारुलोचना ॥
शनकैस्तनुतां मुक्त्वा तन्मध्यं गुरुतां दधौ ।
दुःखन्तु गुरुतां त्यक्त्वा नाकिनां तनुतामपि ॥
दीना गमनमान्द्यस्य पौनरुक्त्यं प्रपेदुषी ।
शनैश्शनैर्निशश्वास शतपत्रविलोचना ॥
उद्वृत्तेन कठोरेण विना हारेण तिष्ठता ।
कंसेन तत्कुचेनापि मुखे मलिनमादधे ॥
निर्यान्तीव हरेः कान्तिः कापि तापिञ्छसोदरी ।
घनयोः स्तनयोरस्याश्चूचुकं मेचकं व्यधात् ॥
अधःकृतस्य मध्यस्य दरिद्रस्य(।)शु वर्धने ।
शुचेव कुचयोरस्याः कृष्णिमानं दधौ मुखम् ॥

परस्मिन् पुंसि गर्भस्थे परमानन्दनिर्वृता ।
पाने च भोजने चापि पराची पद्मलोचना ॥

अस्तस्तया धृते तस्मिन्दीप्ते विश्वैकभूषणे ।
अन्ध.... ... .... .... .... ॥

Colophon :

इति शङ्करकविरचिते श्रीकृष्णविजये प्रथमस्सर्गः ।

Author—Same as No. 1721.

Remarks—The Ms. contains the first *Sarga* and a fragment of the 2nd.

---

॥ कृष्णविलासम् ॥

1724. KṚṢṆAVILĀSAM.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—140. 7 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—1700.

Subject—The story of Śrī Kṛṣṇa.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।
अस्ति श्रियस्सद्म सुमे ... ...
.... ...ल्याणनिधिर्गिरीन्द्रः ।
तिष्ठन्निदं विश्वमनुप्रविश्य
स्वेनात्मना विष्णुरिवोर्जितेन ॥

मिथस्तिरोभावविलोकनाभ्यां
संक्रीडमानाविव बालकौ द्वौ ।
पार्श्वेषु यस्याशु परिभ्रमन्तौ
चन्द्रांशुमन्तौ नयतो दिनानि ॥

उच्चैश्शिखः काञ्चनगौरवर्ण-
स्तमो निगृह्णन्महसा निजेन ।
दीपस्त्रयाणामिव विष्टपानां
यो भाति पर्यन्तचरत्पत... ॥

End :

रम्भोरु लङ्काधिपतेर्भगिन्याः
क्रोधेन सीताक्रमणोद्यतायाः ।
रामेण नासाहृतिरत्र चक्रे
नान्दीव रक्षोवधनाटकस्य ॥

स्वनामचिह्नेषु निवातभूतान्
ख्याताभिधानान् युधि यातुधानान् ।
एकस्सहस्राणि चतुर्दशास्या-
मारोपयामास दिवः स वीरः ॥

आपूर्णपूगद्रुमवाटिकानां
निवार्यमाणा क्रमशः प्रकाशान् ।
परा श्रियः पश्चिमवारिराशेः
पश्य प्रिये कोङ्कणभूमिभागान् ॥

Colophon :

इति श्रीकृष्णविलासे द्वादशस्सर्गः । इति सुकुमारविरचितं श्रीकृष्णविलासं समाप्तम् ।

Author—Sukumāra.

Remarks—The following two verses are quoted after the end :

शीलानन्दितयोगीन्द्रं शालानिलयवासिनम् ।
बालार्कसदृशं स्कन्दं कालारातिसुतं भजे ॥

यः कर्णाञ्जलिसम्पुटैरहरहः सम्यक् पिबत्यादराद्
वाल्मीकेर्वदनारविन्दगलितं रामायणाख्यं मधु ।
जन्मव्याधिजराविपत्तिमरणैरत्यन्तसोपद्रवैः
संसारं स विहाय गच्छति पुमान् विष्णोः पदं शाश्वतम् ॥

---

## ॥ कृष्णविलासम् ॥

## 1725. KṚṢṆAVILĀSAM.

Substance—Palm leaf. Size—8″ × 1½″. Leaves—84. 9 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—1700.

Subject etc.—Same as No. 1724.

Remarks—After colophon occur the following stanzas:

क्षेत्रं पुरः पश्य वृषाग्रहारं
क्षेमङ्करं केरलमण्डलस्य ।
यस्मिन् समुन्मीलति विश्वमूल-
ज्योतिर्मयं लिङ्गमनङ्गशत्रोः ॥

विधित्सया यन्मनुजोपभोग्यं
 विप्रर्षिणा विश्वनृपान्तकर्त्रा ।
असह्यवीरेण वराङ्गि सह्या-
 दुत्सारितं दूरमुदन्वदम्भः ॥

प्रायो युगस्य स्मरयश्चतुर्भिः ?
 पादैः परेषु त्रिषु चाङ्गभाजः ।
वासं विधत्ते वृषरूपधारी
 देवोऽपि यत्र स्वयमेव धर्मः ॥

अधीयते केचन यत्र वेदा-
 नाभ्यस्यते कैश्चन यत्र योगः ।
आवर्त्यते यत्र च कैश्चिदुच्चै-
 र्नाम्नां सहस्रं नर(दोर?सोद)रस्य ॥

ये ये जगद्विस्मयदा विशेषाः
 कैलासनामन्यचलाधिराजे ।
ते ते मृगप्रेक्षणि सन्ति यस्मि-
 न्नन्यत्र लङ्केश्वरकम्पितत्वात् ॥

---

## ॥ कृष्णविलासम् ॥

## 1726. KṚṢṆAVILĀSAM.

Substance—Palm leaf. Size—18″ × 2″. Leaves—55. 7—9 lines per page and 60 letters per line. Script—Malayāḷam. No. of Granthas—1650.

Subject—Beginning: Same as No. 1724.

End :

तमारुह्य गरुत्मन्तं सहितः सत्यभामया ।
अविज्ञातगतिश्शौरिः प्राग्ज्योतिषपुरं ययौ ॥
दुर्गाणि गिरिशस्त्राग्निजलपाशमयानि सः ।
ज्वलद्भिरायुधैर्दिव्यैर्निमेषेण निराकरोत् ॥
उपसृत्य पुरद्वारं प्रियया सह लीलया ।
युयुत्सुः पूरया ... ... न्यं जनार्दनः ॥
निशम्य तस्य गम्भीरं घोषं दिङ्मुखसर्पिणम् ।
भित्त्वा सागरमुत्तस्थौ मु...मुखरितोदकः ॥
नद... .... ... रे ।

Colophon :

इति कृष्णविलासे दशमस्सर्गः ।

Author—Same as No. 1724.

Remarks—The Ms. extends up to the close of the 11th canto. The leaves are old and injured. A few lines from the Bhāratam Kiḷippāṭṭu are quoted in the last Fol.

---

## ॥ कृष्णविलासम् ॥

### 1727. KṚṢṆAVILĀSAM.

Substance—Palm leaf. Size—$10\frac{1}{4}'' \times 1\frac{1}{2}''$. Leaves—54. 9 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—925.

Subject—Beginning : Same as No. 1724.

End :

अथ दोर्भ्यां समुत्क्षिप्य निर्णेजक इवाम्बरम् ।
प्रजहार शिलापृष्ठे चाणूरं लीलयाच्युतः ॥
हतं कुवलयापीडमानेतुमिव भूभुजे ।
प्रपेदे पदवीं तस्य चाणूरस्त्वरयान्वितः ॥
मुष्टिकं मुष्टिवज्रेण हत्वा हलधरः क्षणात् ।
अन्यानापततो मल्लान् पातयामास भूतले ॥
तेषु युद्धश्रमेणेव शयानेषु महीतले ।
सिंहनादं विमुञ्चन्तो ननृतुर्गोपसूनवः ॥
आत्मीयनिधनं दृष्ट्वा दृष्ट्वा च द्विपदुर्नातिम् ।
प्राह कञ्चुकिनः कंसो गोपान् प्रहरतेति सः ॥
तथेति ताड्यमानानां चण्डैः कञ्चुकिमण्डलैः ।
... ... ... ... ॥

Colophon :

इति श्रीकृष्णविलासे सप्तमस्सर्गः ।

Author—Same as No. 1724.

Remarks—The work ends on the 8th *Sarga*.

---

## ॥ कृष्णविलासम् ॥

## 1728. KṚṢṆAVILĀSAM.

Substance—Palm leaf. Size—7″ × 1½″. Leaves—60. 7 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—850.

Subject—Beginning : Same as No. 1724.

End :

उत्प्लुत्य धावद्भिरुदस्तशस्त्रैः
क्ष्वेळारवक्षोभितदिग्विभागैः ।
आभीरवीरैः स वृतः प्रपेदे
घोषं समापूरिततूर्यघोषम् ॥ ७९ ॥

चाटूक्तिभिः पार्श्वचरानशेषान्
विसृज्य गोपान् सहितः स मित्रैः ।
विवेश कृष्णो भवनं दिनान्ते
समुज्ज्व(ल)न्मङ्ग(ळ)दीपिकाभिः ॥ ८० ॥

कामं दिवा कर्णपथं गतेन
नीताः प्रियं वेणुरवेण विष्णोः ।
प्रतिप्रियं चक्रुरमुष्य सायं
गावः पयोदोहननिस्वनेन ॥ ८१ ॥

अनुदिनमिति कुर्वन् पालनं गोकुलस्य
क्षणमिव दिवसानि क्रीडया यापयन् सः ।
अखिलमपि धरित्रीभारमभ्युद्धरिष्य-
न्नरमत सह शौरिस्तत्र सङ्कर्षणेन ॥ ८२ ॥

Colophon :

इति श्रीकृष्णविलासे चतुर्थस्सर्गः ।

Author—Same as No. 1724.

Remarks—The Ms. contains four *Sargas*. A few leaves at the close are much injured.

## ॥ कृष्णविलासम् ॥

## 1729. KṚṢṆAVILĀSAM.

Substance—Palm leaf. Size—$9\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—55.
10 lines per page and 38 letters per line.
Script—Malayāḷam. No. of Granthas—1300.

Subject—Same as No. 1724.

Beginning :

..... ....श्चितं तस्य विलोक्य पादं
वेधा पुनर्विक्रमशङ्किचेताः ।
कमण्डलुं पाणितलेन गृह्ण-
न्नभ्युद्यतोऽभूदवनेजनाय ॥

नृत्तामृतं गोकुलयोषितस्तत्
कृष्णस्य नेत्राञ्जलिभिः पिबन्त्यः ।
प्रीतिप्रकर्षं स्तिमितैर्मनोभि-
रालेख्ययोषित्प्रतिमा बभूवुः ॥

विदुर्न तद्दर्शनपारवश्या-
द्दातुं करस्थं नवनीतमेका ।
विस्रस्य भूमौ पतितं तदन्या
न मेनिरे पाणिपयोरुहेभ्यः ॥

अजस्रमेवं भवनेषु तासां
बभ्राम कृष्णो नवनीतभिक्षाम् ।
पुरा किलान्यैरनिवर्त्तनीया
निवर्तिता येन हरस्य भिक्षा ॥

End :

इत्युक्तवन्तं पुनराह देवी
  पतिं परेणैव कुतूहलेन ।
सत्यं...स्निह्यति चेन्मनस्ते
  मदीयमुद्यानममुं नयेति ॥

तरुं हरिष्यामि कथं मघोनः
  कथं करिष्यामि न काममस्याः ।
इति क्षणं तत्र सरोजनेत्रः
  प्रकामपर्याकुलधीर्बभूव ॥

भूयोऽपि भूयोऽपि तयार्थ्यमानः
  सविक्लबस्तत्प्रणयातिवृत्तौ ।
गन्धानुसारेण जगाम मूलं
  द्रुमस्य तस्य द्विपसन्निकाशः ॥

उत्सार्य मा मेति निरुन्धतस्ता-
  नारामपालानखिलान् बलेन ।
दिव्यं समृद्ध.... .... ....
  ... ... ... ... ॥

Colophon :

इति श्रीकृष्णविलासे एकादशस्सर्गः ।

Author—Same as No. 1724.

Remarks—The Ms. extends from a portion of the 8th *Sarga*. It is old and worn out.

## ॥ कृष्णविलासम् ॥

## 1730. KṚṢṆAVILĀSAM.

Substance—Palm leaf. Size—17½″ × 2″. Leaves—10.
12 lines per page and 60 letters per line.
Script—Grantha. No. of Granthas—450.

Subject—Same as No. 1724.

Beginning:

प्रीतो नि.....महसा विवेश ॥

प्रविश्य जानन्निव नन्दगोप-
निवेशनं सुप्तशरीरिवर्गम् ।
सुतां प्रसूय प्रतिपन्ननिद्रां
दे...लयमे....यशोदा (?) ॥

तं शाययित्वा शयने तदीये
कन्यां समादाय निवृत्त्य गच्छन् ।
शुश्राव पुत्रोदयहर्षमूलं
कोलाहलं गोपवधूजनानाम् ॥

करेण कन्यां मनसा च पुत्रं
वहन् मुहूर्त्तेन विलङ्घ्य मार्गम् ।
विशङ्कमाविश्य गृहं गृहिण्या
निधाय बालां शयनेऽथ तस्थौ ॥

सा चञ्चरीकस्वनसन्निभेन
नादेन लोकस्य मनो हरन्ती ।
रुरोद किञ्चिद्विवृतेन बाला
स्फुटत्पयोजाकृतिना मुखेन ॥

End :

कथं ह्युदासीत स शार्ङ्गधन्वा
गोब्राह्मणक्षेमविधानशीलः ॥
.... ....त्युदीर्य प्रतिपन्नहर्षं
विसृज्य गोपं पुरुषः पुराणः ।
भूयोऽपि गास्तत्र वनेऽनुगच्छ-
न्नालोक्य सङ्कर्षणमाबभाषे ॥
देशस्स ए.... ....हेर्निवासो
निवेदितोऽयं पुरुषेन तेन ।
.... ....ष्कमा.......त्थितोष्मा
यद् दृश्यते दृश्यजनप्रचारा ॥
तदार्य तिष्ठ क्षणमत्र तीरे
तं प्राण.... .... .... ।

... ... ... ... ... ... ...
... ... ... ... ... ...

Colophon :

इति.... .... ....से चतुर्थस्सर्गः ।

Author—Same as No. 1724.

Remarks—The Ms. extends from a portion of the 2nd *Sarga* up to a fragment of the 5th *Sarga*. It is much damaged.

## ॥ कृष्णविलासम् ॥

## 1731. KṚṢṆAVILĀSAM.

Substance—Palm leaf. Size—5″ × 1½″. Leaves—28. 7—9 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—280.

Subject—Beginning: Same as No. 1724.

End:

इति नृपमभिधाय ज्योतिषा कुर्वती सा
ताटिदिव नयनानि प्राणिनामाकुलानि ।
सुरयुवतिभिरुच्चैर्गीयमानापदाना
सुरपदमभिपेदे पाटिताभ्रा जवेन ।

श्रुत्वा तस्याः श्रवणपरुषां वाचमन्तर्विषण्णः
पुत्रापायव्यथितमनसं सान्त्वयित्वा स्वसारम् ।
पद्भ्यामेव स्वभवनमथ प्राप्य कृच्छ्रादनैषीत्
कंसश्चिन्ताकुलितहृदयो जाग्रदेव त्रियामाम् ॥

प्रातः प्रलम्बप्रमुखानमात्यान्
सर्वान् समाहूय स भोजराजः ।
सविभ्रमप्रेरितदृष्टिदत्ते
स्थाने निषण्णानवदद्विनीतः ॥

Colophon:

इति श्रीकृष्णविलासे द्वितीयस्सर्गः ।

Author—Same as No. 1724.

Remarks—The Ms. ends on a verse in the 3rd *Sarga*. It is in good condition. The script is legible.

---

## ॥ कृष्णविलासम् ॥

## 1732 A. KṚṢṆAVILĀSAM.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—38. 6—8 lines per page and 26 letters per line. Script—Malayāḷam. No. of Granthas—425

Subject—Beginning : Same as No. 1724.

End :

महर्षयस्तत्र महानुभावा
  गृहीतरूपान्तरदुर्न्निरूपाः ।
भवाग्निसन्तापहरे ममज्जुः
  पदोत्थिते तस्य परागपूरे ॥

प्रहर्षमालोकयतां जनानां
  क्रीडाभिरापाद्य मनोहराभिः ।
उत्थापयामास स चीत्कृतेन
  गोष्ठे हरिर्गोसमजं शयानम् ॥

तस्मिन् गवां पालनकौतुकेन
  वनाय... ... ... ...

Colophon:

इति श्रीकृष्णविलासे तृतीयस्सर्गः ।

Author—Same as No. 1724.

Remarks—The Ms. contains the first four *Sargas* only.

## ॥ ज्योतिषवाक्यानि ॥

## 1732 B. JYOTIṢAVĀKYĀNI.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—6. 6 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—50.

Subject—Certain technicalities bearing upon *Grahasphuṭa*.

Beginning :

हरिः ।

नाभिनन्द्यो जनं भीरुकस्स्नुतकः
किंकरश्शैशिरे नुन्नगुर्विश्वगुः ।
देहि गोनागवद्रासभो गोदतां
रोमशं देहि मे प्रद्रुतं गोधनम् ॥

रञ्जितं संनसं धीरसे सेवसे
याचसे कत्थसे जित्थसे स्नेहसे
कुजमन्दज्या—निधानिनी, धीसुपनी, सुतीरनी, नभालमी, शोभवली, फलाशिनी जपान्तमी, मीनसुमी कळांथिंमी ... ...

... ... ... ... ... ... ...
... ... ...

End :

शनिमकरज्या
हरज्ञ्चमंज्ञगुहज्ञ धेनुका
भगस्य सोमस्य नदीपतिर्भरी ।

चरित्रधीगोत्रतृणेन्द्रकेसरी
महेन्द्रदुग्धाग्रधनांबुहव्यगुः ।
तरङ्गिगङ्गाम्बुजलाम्बुकुम्भगी
विभङ्गिशोभाङ्गिभवाङ्गिलदिगुः ॥

शनिकक्यादि---तीरुह ।

Colophon :

Author :

Remarks—The Ms. is much damaged.

---

## ॥ कृष्णाभ्युदयम् ॥

## 1733. KṚṢṆĀBHYUDAYAM.

Substance—Palm leaf. Size—7″ × 2″. Leaves—38. 8 lines per page and 28—32 letters per line. Script—Malayāḷam. No. of Granthas—500. Incomplete.

Subject—Same as No. 1724.

Beginning :

अविघ्नमस्तु ।

मदाद्रिवक्षालित दशारद्युतिद्योतितशीतभा...वृताः
प्रद्युम्नरुद्देलमया मुदष्टः
तरप्रभातर्जिततारको... .... ...
पाथोजकृता ...मनः प्रसादं मम सन्निधचामृतुक्षयं पुण्यतती
विधा ।

गिरा महत्व. . . .तनानाम् ।
जयन्ति पुण्यानि गिरीन्द्रजाया-
न्तिका··· ···यन्ति ।
शोणाचलं शरासीकृत सा
कलिन्दजा कूलच, . . . .था
ङ्गपीतदण्डवक्षोरुहपुण्यभूम्ने ।
बृन्दावनाङ्गीकृतगोपधेनु--
वृन्दावनाया. . . .भोम. . .कुरद्वतीम् (?) ॥

End:

कोपातिमोह. . .मुनिमण्डली
गोपालवाचमवधीर्य. . .किञ्चिदूचे ॥
पापी स ... भवतु जातु चि···खाणाम्
आपूरणे कुशलता नहि याचकानम् ॥
विज्ञाप्यता मुरभिदे मुनिमौनमुद्रां
तत्प्रेरिता मुनिवधूरपि गोपपाली ।
गत्वा नवौदनमयाचत यज्ञवाटे
दीप्तक्षुदग्निपरिशोषितधैर्यसाराः ॥
आकर्ण्य बल्लवगि

इति श्रीकृष्णाभ्युदये काव्ये तृतीयस्सर्गः ।

Colophon:

Author:

Remarks—The Ms. breaks off on a fragment of the 4th *Sarga*. A work with the same title attributed to Śrīnivāsarāghavasūri is noticed as No. 4016, TCM, Vol. IV, Part I C.

## ॥ कंसवधम् ॥

## 1734. KAMSAVADHAM.

Substance—Palm leaf. Size—3″ × 1½″. Leaves—55. 9 lines per page and 12 letters per line. Script—Malayāḷam. No. of Granthas—375. Incomplete.

Subject—The story of the annihilation of Kamsa.

Beginning :

हरिः ।

श्रियो नाथः शिखिपिञ्छशेखरः
स्निग्धगोपीनयनाञ्चलाश्रितः ।
स्वयं यशोदातनयत्वं गतो
विभुर्व्यभूषयद् गोपवाटिकाम् ॥

कथां खल्वस्य कंसवधं सुखावहां
सुधामिव गृह्णीत वले सुखी जनः (?) ।
सदा गुरूणां चरणौ समाश्रितो
भणामि यां भक्तिगुणेन नुन्नः ॥

अथैकदा चङ्क्रमणशीलो व्रजाङ्गणे
दिनान्तगोदोहनव्यापृताङ्गने ।
सहाग्रजस्सोऽभिसरन्तमग्रतो
गदाग्रजोऽद्राक्षीद् गान्दिनीसुतम् ॥

End :

इति मुदितमनसोस्तयोराशीभिस्ताव-
च्छरदिव सनिशाभिश्चन्द्रसूर्याविव रम्यौ (?) ।

समधिकमभिरामौ रामकृष्णौ प्रसन्नौ
सकलजनमनोज्ञां लम्भितौ कामपि लक्ष्मीम् ॥

Colophon :

इति कंसवधे चतुर्थस्सर्गः ।
श्रीगुरुपादेभ्यो नमः ।

Author :

Remarks—The work is a Kāvya in Prākṛt. The Ms. contains the *Chāyā* of *Prākṛtaślokas.*

## ॥ कंसवधम् ॥

### 1735. KAMSAVADHAM.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 2''$. Leaves—12. 8 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas — 275. Incomplete.

Subject—Beginning: Same as No. 1734.

End :

क्रीडाशैलाग्रलग्नस्तनितघनघनोत्सृष्टवृष्टिप्रणाली-
झात्कारोत्कण्ठमयूरस्फुटनटनकोलाहलदीप्यमानकामाः ।
वामा वामा अपि पीनस्तनकनकघटौ संघटय्य गाढं
कण्ठे गृह्णन्ति कुण्ठेतरमिह पृथुरागार्द्रशीला वल्लभानाम् ॥

इति बहुविस्तृतानि विपक्षाणां बहुत्वतः
सक्षमथ गोशतान्युपसंहृत्य सुखम् ।

वसतिमुपासरद्वसुदेवसुतस्स यदा
तदा खलु दिवाकरोऽपि चरमाचलमौलिभुवम् ॥

Colophon :

इति कंसवंध द्वितीयः सर्गः ।

Author :

Remarks—The Ms. contains the first two *sargas* only.

---

॥ कंसवधम् ॥

## 1736. KAMSAVADHAM.

Substance—Palm leaf. Size—$8\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—88. 5 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas — 560. Incomplete.

Subject—Same as No. 1734.

Beginning :

वनविहारमिति प्रतनः पुमान्
समनुभूय चिरं खलनं ...त...वान् ।
तदिङ्मुखां हृदि वसन् यमिनां
यमुनां ययौ स वनितोपगतस्य ॥

. . . स या सरिदसौ जगृहे
लघुतरङ्गकरेण न मातु . . . ।
रलमितीव भयाज्जलकेलने
अपययौ विमनाश्चतुरा गतीः ॥

समभिवीक्ष्य च हंसगणः स्त्रियाम् ।
सपदि मानसमानवहो जनः
पर. . . . . . . ते कृतः ॥

End :

कपितघुसृणहंसचन्द्रमिश्र-
शतफलसङ्ख्यपटीरकामसार्गः ।
प्रतिदिनमचलात्मजा... यस्य
गगगा ॥

यतःश्री(बलि?)बलिवेलायां मनोज्ञायां विशेषतः ।
द्विपश्चाशन्महावाद्यध्वनिभिः पूर्यते नभः ॥
पश्चिम . . . . . . . ... ॥

Colophon :

इति कंसवधे दशमस्सर्गः ।

Author :

Remarks—The Ms. extends from the fifth *Sarga* up to a fragment of the eleventh. It is much injured.

---

## ॥ कंसवधम् ॥

### 1737. KAMSAVADHAM.

Substance—Palm leaf. Size—10″ × 2″. Leaves—47. 8 lines per page and 32 letters per line. Script—Malayaḷam. No. of Granthas—752. Incomplete.

Subject—Same as No. 1734.

Beginning :

यस्योपरि क्रुद्धतरं प्रतीर्या-
मासीनमर्थो य....कुटिकासनेन (?) ।
च...ब्जपाणिं...भिजानुं
द्रवन्ति दृष्ट्वा दनुजा नृसिंहम् ॥

चतुर्भिरास्यैस्स दधद् भुजा...
... .... .... कमण्डलुं च ।
अङ्काहिताग्रद्विशयो यदीमां
स्रष्ट.......कन्यकाष्ठा...... ॥

यं तीक्ष्णदंष्ट्रैर्बृहदुग्रनेत्रै-
... ... ... ... ...
श्शूलाङ्किता मूर्धसु राजयन्ते
विनिर्मिताः किंपुरुषाश्च दिक्षु ॥

End :

सत्राष्टिपान् वृष्णिप उद्यतान् गतौ
व्यसर्जयत्ताननुगम्य सादरम् ॥
हरिबलसरसावलोकनाय
त्वरिततरा पौरसङ्कुलं तत् ॥

प्रियतरतनयापि हृष्टशौरि
क्षणविहितक्षणमात्रभौ त...
दनुजैर्जाग्रद्विरैर्जगद्व्यथनायतै-
रनिशमवनी कंसाद्यैर्या भृ......

मलं कुर्वद् बभ्रु प्रभावहन्तपु तेष्व-

पम्भुवनैस्सा सद्यः पर्ग प्रमर्द यथा ॥

युधि सदृशदकंसं घातयित्वा दधानो (?)

मुदमपि निजपित्रोरुग्रसेनेन राज्ञा ।

सकलविभवपूर्णां पालयन्नब्धिनेमिं

हरिरथ मधुरां तां साग्रजस्सोऽध्युवास ॥

Colophon :

इति कंसवधे नवमस्सर्गः ।

शुभम् ।

Author :

Remarks—Only 6 *Sargas* (4—9,) are extant in this Ms.

---

## ॥ गजेन्द्रमोक्षम् ॥

### 1738. GAJENDRAMOKSAM.

Substance—Palm leaf. Size—5″ × 1″. Leaves—51. 7 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas—350.

Subject—The story of the emancipation of an elephant from the clutches of a crocodile.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

कल्याणं कुरुताद्वो भूतानामधिपतिः स [illegible] ।

रक्षार्थं सुजनानां सन्निदधत् पुरवने कुम्भे ॥

शक्त्योभयरूपस्मन् यं किल नाथः स भुवनचक्रस्य ।
चाक्रिणि मातरि जनयाम्बभूव जगदवनजानितरसम् ॥
यस्य च भाजकरूपः प्रसादतो विश्ववितविमलयशाः ।
यमयामास सुमेधाः कथासुधां वासुदेवकविः ॥
त्रयं सामान्येन ।

उपारकरी.....करुणामयं शिरोधेरधश्च
पृरुपाकियदिद्....न्तरायं दैवतमध्येऽभिरूपमहम् ।
ज्ञानगृ–या कल्यते चतुःस्थानकलितसान्निध्य
सा भारती महितधाम्नि कल्याणं विलभतां वः (?) ॥

विपुला ।

जगतां शिवाय नित्यं प्रवर्तमानस्य शिवसमानस्य ।
समनुसरामि साक्षात् पराशरीयस्य पुण्यस्य ॥

चपला ।

भक्त्या प्रणम्य देवं हरिं गुरुं श्रीगुरुप्रसादेन ।
वृत्तैर्गजेन्द्रमोक्षं ब्रूमस्तं शृणुत वृत्तज्ञाः ॥

मुखचपला ।

येषां न मत्सरोत्थं चेतस्सद्वृत्तवासनावन्तः ।
ते शोधयन्त्विमं तं स्खलेन्नतो वृत्ततो नेह ॥

जघनचपला । आर्याप्रकरणम् ।

श्रीमानशेषसद्गुणपात्रं शास्त्रार्थसारविस्सुकृती ।
पाण्ड्येषु नीवृति श्रमाविन्द्रद्युम्नो नराधिपः पूर्वम् ॥

गीतिः ।

विहितानि विदधदखिलान्यपि च निषिद्धानि ।

कर्म च फलमात्मनि हरौ समर्पाश्रुहह्न्मो (?) यापयत् समयम् ॥

End :

उपाक्षितप्रचुम्बितम् ।

एवं तान् प्रथमानभक्तिभारविनम्रान्
निजभृत्यवरोल्लसत्प्रमोदान् ।
अतिमधुरमभिदधद्विहगकुलपरिवृढं
कनकगिरिमममारुरोह मुकुन्दः ॥

वर्तमानलघुवृत्तम् ।

इन्द्रद्युम्नमुखैस्स्वपार्षदैस्सह देवः ।
त्रिदिवादिभुवनगैः स्तुतो जनौघैः ।
लोकान् समतीत्य भास्वरं
स्वपदमलङ्कृतजगतामभिवन्द्यम् ॥

शुद्धविराधाभम् । उपस्थितप्रचुम्बितप्रकरणम् ।
उषसि प्रतिबुद्धश्शुचिरन्वहमुद्गृणन् मोक्षम् ।
नागेश्वरस्य भक्त्या हरौ विन्दते मुक्तिम् ॥
गाथा । विषमवृत्तविलसितम् ।

Colophon :

इति गजेन्द्रमोक्षे पञ्चमः सर्गः ।
वृत्तरत्नाकरप्रोक्तवृत्तलक्ष्यतया क्रमात् ।
गजेन्द्रमोक्षः सन्दब्धो वासुदेवेन सादरम् ॥

अ(पि हि पीह) महतां कृतिं श्रुतिमनोहरां निस्त्रपं
तृणीकृतजगत्त्रयो जगति दुर्जनो दूषयेत् ।

मया किमुत मादृशामिति विजानता ....
 ...द्धिपरिशुद्धये कृतिरियं ... ... ॥
शङ्करेण च नीलकण्ठन च लिखितामिदं पुस्तकम् ।

കൊല്ലം ൯൩൨-ാമാണ്ടു ചിങ്ങ.....൨൧-ാംനു എഴുതി തീൎന്നു. സ അടി ൯൭൦. ശ്രീകൃഷ്ണായ നമഃ.

नमस्सवित्रे जगदकचंक्षुषे
 जगत्प्रसूति ... ... नाशहेतवे ।
त्रयीमयाय त्रिगुणात्मधारिणे
 विरिञ्चिनाराय ... .... .... ॥

Author—Vāsudeva.

Remarks—The Ms. is much injured. The work is noticed as No. 3637, TCM. Vol. IV, Part I C. It consists of verses illustrative of various metres.

---

## ॥ गीतगोविन्दम् ॥

### 1739. GĪTAGOVINDAM.

Substance—Palm leaf. Size—$5\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—30. 12 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—450.

Subject—Description of the feelings of Mādhava and Rādhā consequent on their separation.

Beginning:

श्रीगणपतये नमः । अविघ्नमस्तु ।

मेघैर्मेदुरमम्बरं वनभुवः श्यमास्तमालद्रुमै-
 र्नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय ।

इत्थं नन्दनिदेशतश्चलितयोः प्रत्यध्वकुञ्जद्रुमं
राधामाधवयोर्जयन्ति यमुनाकूले रहःकेलयः ॥

वाग्देवताचरितचित्रितचित्तसद्मा
पद्मावतीचरणचारणचक्रवर्ती ।
श्रीवासुदेवरतिकेलिकथासमेत-
मेतत्करोति जयदेवकविः प्रबन्धम् ॥

यदि हरिस्मरणे सरसं मनो
यदि विलासकलासु कुतूहलम् ।
मधुरकोमलकान्तपदावलीं
शृणु तदा जयदेवसरस्वतीम् ॥

वाचः पल्लवयत्युमापतिधरः सन्दर्भशुद्धिं गिरां
जानीते जयदेव एव चरणश्लाघ्यो दुरूहाद्दते ।
शृङ्गारोत्तरसत्प्रमेयचरणैराचार्यगोवर्धन-
स्पर्धी कोऽपि न विश्रुतं श्रुतिधरो धोयी कविक्ष्मापतिः ॥

भूपालरागम् । चेम्पट ।
प्रलयपयोधिजले धृतवानसि वेदं
विहितविचित्रचरित्रमखेदम् ।
केशव धृतमीनशरीर जय जगदीशहरे ।

End :

कामप्राप्य धृतस्वयंवररसात् क्षीरोदतीरोदरे
शङ्के कामिनि! कालकूटमपिबन्मूढो मृडानीपतिः ।
इत्थं पूर्वकथाभिरन्यमनसो विक्षिप्य वक्षोऽञ्चलं
राधायाः स्तनकोरकोपरि लसन्नेत्रो हरिः पातु वः ॥

पर्यङ्कीकृतनागनायकफणाश्रेणीमणीनां गणैः
  सङ्क्रान्तप्रतिबिम्बसंकुलनया बिभ्रद्वपुःप्रक्रियाम् ।
पादाम्भोजविहारिवारिधिसुतामक्ष्णां दिदृक्षुश्शतैः
  कायव्यूहमिवाकरोदुरु मुदा योऽसौ हरिः पातु वः ॥

यद्गान्धर्वकलासु कौशलमनुध्यानञ्च यद्वैष्णवं
यः शृङ्गारविवेकतत्त्वमपि यत् काव्येषु लीलायितम् ।
  कः सर्वा जयदेवपण्डितकवेः कृष्णैकतानात्मनः
सानन्दं परिशोधयन्तु सुधियः श्रीगीतगोविन्दकम् ॥

यन्नित्यैर्वचनैर्विरिञ्चगिरिजाप्राणेशमुख्यैर्मुहु-
  र्नानाकारविचारसारचतुरैर्नाद्यापि निश्चयिते ।
तत्सर्वं जयदेवकाव्यघटितैः सत्सूरिसंशोधितै-
  राद्यं वस्तु चकास्तु चेतसि परं सारस्यसीमाजुषाम् ॥

Colophon :

इति गीतगोविन्दे शृङ्गारमहाकाव्ये श्रीकृष्णदासजयदेव-
कृतौ सरससरसीरुहाक्षो नाम द्वादशः सर्गः समाप्तः ॥

കൊല്ലം 977-ാ മാണ്ടു° ഇടവമാസം 4-ാംനു- കൊച്ചു കൊ
ട്ടാരത്തിൽ ഇരുന്നു° എഴുതിത്തീൎത്ത പുസ്തകം. ശുഭം. ശ്രീ കൃഷ്ണാ
യ നമഃ.

Author—Jayadeva.

Remarks—The colophon furnishes the date of transcription as 977 M. E.

## ॥ गीतगोविन्दम् ॥

## 1740. GĪTAGOVINDAM.

Substance—Palm leaf. Size—7" × 1½". Leaves—32. 9 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—450.

Subject—Beginning: Same as No. 1739.

End:

घनरुचिरे चिकुरे कुरु मानदमानसज-
ध्वजध्वजचामरे रतिगमिते ललिते
कुसुमानि शिखण्डिशिखण्डकमम्बरनिजगाद
सरसघने जघने मम शम्बरदारणवारणकन्दं
रमयिरशनावसनाभरणान् सुभूषय वासय सुन्दरे निजगाद ।
श्रीजयदेववचासि रुचिं हृदयं सदयं
कुरु मण्डने हरिचरणस्मरणामृतनिर्मित-
कलिकलुषज्वरखण्डने । निजगाद ।
रचय कुचयोश्चित्रं पत्रं करेण कपोलयो-
र्घटय जघने काञ्चीं मञ्जुस्रजं कबरीभरे ।
कलय वलयश्रेणीं पाणौ पदे मणिनूपुराविति हृषितः कृतः
पीताम्बरोऽपि तथाकरोत् ।

Colophon:

इति श्रीगीतगोविन्दे शृङ्गारमहाकाव्ये श्रीकृष्णदासजयदेवकृतौ नागरिकनारायणो नाम द्वादशस्सर्गः । जयदेवप्रबन्धस्समाप्तः । श्रीषिडङ्कुरेशाय नमः ।

कोलम्बे शशिशैलशेखरामिते भव्ये धनुर्मासके
द्वादश्यां शशिसूनुमैत्रदिवसर्क्षाढ्ये विलग्ने घटे ।
यो नारायणनामकेन लिखितः श्रीकृष्णलीलाश्रितो
ग्रन्थः श्रीजयदेवसूरिरचितः श्रीमत्सकर्णामृतः ॥

Author—Same as No. 1739.

Remarks—The verse in the colophon denotes date of transcription of the work.

---

## ॥ गीतगोविन्दम् ॥

## 1741. GĪTAGOVINDAM.

Substance—Palm leaf. Size—8½" × 1½". Leaves
8 lines per page and 20 letters per
Script—Malayāḷam. No. of Granthas-

Subject etc.—Same as No. 1739.

Remarks—The Ms. contains 12 *Sargas*. The phon in the 12th canto is missing. The ing verse occurs after the end :

साध्वी माध्वीक चिन्ता न भवति भवतः शर्करे कर्करासि
द्राक्षे द्रक्ष्यन्ति के त्वाममृत मृतमासि क्षीर नीरस्त्वमेषि ।
मोचे मा जीव जायाधर धरकुहरे मज्ज युष्मज्जयायै-
वाकल्पं कल्पिताज्ञ्या यदिह भुवि गिरा स्थीयते जायदेव्या ।

## ॥ गीतगोविन्दम् ॥

### 1742. GĪTAGOVINDAM.

Substance—Palm leaf. Size—7″ × 1¼″. Leaves—52. 8 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—500.

Subject etc.—Same as No. 1739.

---

## ॥ गीतगोविन्दम् ॥

### 1743. GĪTAGOVINDAM.

Substance—Palm leaf. Size—7″ × 1½″. Leaves—19. 10 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—250. Incomplete.

Subject—Beginning: Same as No. 1739.

End:

जनयसि मनसि किमिति बहुखेदम् । शृणु मम वचनमनिहितभेदम् । माधवे । हरिरुपयातु वदतु बहुमधुरम् । किमिति करोषि हृदयमतिविधुरम् । माधवे । श्रीजयदेवभणितमतिलळितं सुखयतु रसिकजनं हरिचरितम् । माधवे ।

Colophon:

इति गीतगोविन्दे कविराजजयदेवकृतौ खण्डितावर्णने कलहान्तरितराधामाधवसंवादो नामाष्टमः सर्गः ।

Author—Same as No. 1739.

Remarks—The Ms. contains 8 *Sargas*.

---

## ॥ गीतगोविन्दम् ( श्रुतिरञ्जिनीसहितम् ) ॥

### 1744. GĪTAGOVINDAM
with the commentary, Śrutirañjinī.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves 174. 11 lines per page and 32 letters per Script—Malayāḷam. No. of Granthas—

Subject—Same as No. 1739.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

धवळजलदवर्णं चन्द्रमःखण्डचूडं
परशुहरिणहस्तं ज्ञानमुद्राभिरामम् ।
भुजगवरविराजत्कङ्कणं जानुबाहुं
दलितनतजनार्त्तिं दक्षिणामूर्त्तिमीडे ॥

अस्त्यान्ध्रदेशे चरकूरिवंशः
कृष्णातटे काश्यपगो(त्र)रूढः ।
यो बह्वृचानां बहुमाननीयो
धत्ते सदा कीर्त्तिसुवैजयन्तीम् ॥

आसप्तपूरुषं यत्र लक्ष्मीवाण्योरवस्थितिः ।
आसीत् कपोतालिङ्गस्य वराक्कुडविलासिनः ॥
यत्र नामाद्रिशिखयोराङ्कितं वेङ्कटेशितुः ।
सलक्ष्मीकः स एवार्यो भगवान् गृहदेवता ॥

तत्रोद्भूत्तिम्मयाजि....
बुधोऽष्टभाषाकविभट्टभद्रः ।
नित्यान्नदाता निजभक्तिलब्ध-
वृषाकपायीरमणप्रसादः ॥

* * * *

End :

अधुना तु परमपुरुषार्थसाधनभूतमतीतसकलमधुरपदार्थकं सकलजनहृदयानन्दकरं जयदेववागमृतमाकलय्य कोऽपि त्वां न वीक्षत इति तवापि जन्म वृथेति भावः। तथाच मधुरप्रियैः सात्त्विकैश्चैहिकामुष्मिकसुखार्थिभिः जयदेवसरस्वत्येवास्वादनीया न वस्त्वन्तरमिति भावः ।

Colophon :

इति श्रीमदखिलविद्यापरिवारदक्षिणामूर्त्तिमहादेवप्रसादलब्धविद्यपूर्वोत्तरमीमांसाशब्दतर्कसाहित्यसार्वभौमचरकोण्डुभट्टोपाध्यायानुजेन सर्वाम्बिकागर्भशुक्तिमुक्तामणिना लक्ष्मण(?)सूरिणा विरचितायां गीतगोविन्दव्याख्यायां श्रुतिरञ्जिनीसमाख्यायां द्वादशः सर्गः ।

Text—Same as No. 1739.

Author—Com : Lakṣmīdhara.

Remarks—Many illustrations are given in this work. The following portion is quoted after the end :

लालामृतस्नातभुजान्तराले बाले वलारातिमणिप्रकाशे ।
फालेन्दुखण्डावधिलम्बमानवाले सदा खेलति मानसं मे ॥

...മത മുഗരവിഭ-൧൦൩൯ ചങ്ങവാരവും പ്രഥമയും തിരുവോണവും ഇന്നാളിൽ എഴുതിയ ഗ്രന്ഥം.

The text with commentary is noticed as No. 22, in Mr. Śeṣagiriśāstrī's Report No. 2. Jayadeva was the court-poet of Lakṣmaṇasena, king of Bengal who flourished in the first quarter of the 12th century A. D. Lakṣmīdhara was a native of the Telugu country in Kṛṣṇā District. He was the second son of Yajñeśvara.

---

## ॥ गीतगोविन्दम् (श्रुतिरञ्जिनीसहितम्) ॥

## 1745. GĪTAGOVINDAM
with the commentary, Śrutirañjinī.

Substance—Palm leaf. Size—14″ × 2″. Leaves—118. 9—11 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—3800.

Subject--Same as No. 1739.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

धवळजलदवर्णं चन्द्रमःखण्डचूडं
परशुहरिणहस्तं ज्ञानमुद्राभिरामम् ।
भुजगवरविराजत्कङ्कणं जानुबाहुं
दलितनतजनार्त्तिं दक्षिणामूर्त्तिमीडे ॥

लक्ष्मीधरेण विदुषा क्रियते श्रुतिरञ्जिनी ।
विद्वत्कविमुदे गीतगोविन्दस्यार्थदीपिका ॥

End :

एवमविज्ञेयसाराणां जयदेवगिरां विवरणापराधक्षमापणमेव मया कृतमिति कृष्णार्पणमस्तु ।

Colophon :

इत्यखिलविद्यापरिवारश्रीमद्दक्षिणामूर्त्तिमहादेवप्रसादलब्धसाङ्गवेदपूर्वोत्तरमीमांसाशब्दतर्कसाहित्यसार्वभौमचरकुरुकोण्डुभट्टमहोपाध्यायानुजेन सर्वाम्बिकागर्भशुक्तिमुक्तामणिना लक्ष्मीधरसूरिणा विरचितायां गीतगोविन्दव्याख्यायां श्रुतिरञ्जिन्याख्यायां सरससरसीरुहाक्षनामकद्वादशसर्गभावार्थविमर्शः समापितः ।

Author—Same as No. 1744.

Remarks—The Ms. is in neat legible hand.

---

## ॥ गीतगोविन्दम् ( श्रुतिरञ्जिनीसहितम् ) ॥

### 1746. GĪTAGOVINDAM

with the commentary, Śrutirañjinī.

Substance—Palm leaf. Size—15″ × 1½″. Leaves—263. 6—7 lines per page and 38 letters per line. Script—Malayāḷam. No. of Granthas—3800.

Subject—Same as No. 1739.

Beginning etc.—1744.

---

## ॥ गीतगोविन्दम् (श्रुतिरञ्जिनीसहितम्) ॥

### 1747. GĪTAGOVINDAM

with the commentary, Śrutirañjinī.

Substance—Palm leaf. Size—15″ × 1½″. Leaves—96.

10—13 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—3800.

Subject—Same as No. 1739.

Beginning etc.—Same as No. 1744.

Remarks—The following verse occurs after the colophon :

एतास्मिन् बन्धनिर्मित्या या परोपकृतिस्तया ।
वृषाकपाय्या रमणः प्रीयतां परमेश्वरः ॥"

---

## ॥ गीतगोविन्दम् (श्रुतिरञ्जिनीसहितम्) ॥

### 1748. GĪTAGOVINDAM
with the commentary, Śrutirañjinī.

Substance—Palm leaf. Size—14½" × 1½". Leaves—113. 9—10 lines per page and 60 letters per line. Script—Malayāḷam. No. of Granthas—3800.

Subject—Same as No. 1739.

Beginning etc.—Same as No. 1744.

Remarks—The following portion occurs after the colophon :

"एतास्मिन् बन्धनिर्मित्या या परोपकृतिस्तया ।
वृषाकपाय्या रमणः प्रीयतां परमेश्वरः ॥"

व्याख्या सम्पूर्णा श्रीगुरुभ्यो नमः । श्रीगोमतिनायिकाममेताय श्रीशङ्करनारायणाय परस्मै ब्रह्मणे नमः ।

എണ്ണൂറ്റു യെണ്പത്തു ആറാമാണ്ടു ആവണിമാസം ആറാ ന്തെതി എഴുതിമുകിത്തേൻ തിരുവടിദേശത്തു കൊണ്ടാനാകര മാനകുരിയുടെയ പാണ്ടിയപുരത്തിലിരുക്കും യെജ്ഞനാരായ ണഭട്ടമലൈമണ്ഡലത്തു കല്ലിടൈദേശത്തു ഇലഞ്ഞിമനെപ്പെത്ത കുളന്തഗ്രന്ധം ഇലഞ്ഞമനെപ്പെത്തിയുടെ ഗ്രന്ഥം ശുഭമസ്തു."

---

## ॥ गीतगोविन्दम् (श्रुतिरञ्जिनीसहितम्) ॥

### 1749. GĪTAGOVINDAM
with the commentary, Śrutirañjinī.

Substance—Palm leaf. Size—13″ × 2″. Leaves—201. 7 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—3800.

Subject—Same as No. 1739.

Beginning etc.—Same as No. 1744.

Remarks—The following verse occurs after the end :

"लालामृतस्नातभुजान्तराले
बाले बलारातिमणिप्रकाशे ।
फालेन्दुखण्डावधिलम्बमान-
वाले सदा खेलति मानसं मे ॥"

---

## ॥ गीतगोविन्दम् (श्रुतिरञ्जिनीसहितम्) ॥

### 1750. GĪTAGOVINDAM
with the commentary, Śrutirañjinī.

Substance—Palm leaf. Size—14″—1¾″. Leaves—

123. 8—11 lines per page and 50—56 letters per line. Script—Malayāḷam. No. of Granthas —3800.

Subject—Same as No. 1739.

Beginning etc.—Same as No. 1744.

Remarks—The following portion is noticed after the colophon :

"876-ാമാണ്ടു പുരട്ടാശിമാസം എഴുതിമുടിത്തു ചാരക്കോട്ടു കാത്തു ശംകരനാരണൻ പുത്രൻ ശംകരനാരായണനെന ലിഖിതമിദം പുസ്തകം."

---

## ॥ गीतगोविन्दम् (श्रुतिरञ्जिनीसहितम्) ॥

### 1751. GĪTAGOVINDAM

with the commentary, Śrutirañjinī.

Substance—Palm leaf. Size—14″ × 2″. Leaves—73. 9—11 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—2500. Incomplete.

Subject—Same as No. 1739.

Beginning : Same as No. 1744.

End :

अतिवितथमत्यन्तमृषाभूतं केतनं सङ्केतो यस्याः सा तादृशी श्रीकृष्णस्यानागमनान्निष्फलीभूतसङ्केतेत्यर्थः । अत एवाचेतना-आमूलविलुप्तविवेका इतिकर्तव्यतामूढेति यावत् । तादृशी च सती अहं किमिति कस्मात् कारणात् विरहानलं श्रीकृष्णवियोगज्व-

रसन्तापरूपं वह्निं विषहामि । विविधं सहामि । मन्ये अचेतन-
त्वप्रयुक्तादविवेकादृते किमपि कारणं...... ।

Colophon :

इत्यखिलविद्यापरिवारश्रीमद्दक्षिणामूर्त्तिमहादेवप्रसादलब्धसाङ्ग-
वेदपूर्वोत्तरमीमांसाशब्दतर्कसाहित्यसार्वभौमचरकुरुकोण्डुभट्टमहोपा-
ध्यायानुजेन सर्वाम्बिकागर्भशुक्तिमुक्तामणिना लक्ष्मीधरसूरिणा
विरचितायां गीतगोविन्दव्याख्यायां श्रुतिरञ्जिनीसमा-
ख्यायां साकाङ्क्षपुण्डरीकाक्षसंज्ञः पञ्चमसर्गार्थविमर्शः ॥

Author—Same as No. 1744.

Remarks—The Ms. contains 6 *Sargas*

---

॥ गीतगोविन्दम् (सव्याख्यम्) ॥

1752. GĪTAGOVINDAM
with commentary.

Substance—Palm leaf. Size—4¾″ × 2″. Leaves—92. 11—13 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—1750.

Subject—Same as No. 1739.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु । श्रीकृष्णाय नमः ।
मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमै-
र्नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय ।
इत्थं नन्दनिदेशतश्चलितयोः प्रत्यध्वकुञ्जद्रुमं
राधामाधवयोर्जयन्ति यमुनाकूले रहःकेलयः ॥

वाग्देवताचरितचित्रितचित्तसद्मा
पद्मावतीचरणचारणचक्रवर्ती ।
श्रीवासुदेवरतिकेलिकथासमेत-
मेतत्तनोति रतिकेलिकथाप्रबन्धम् ।

....... ..... ....

मेघैरित्यादि । हे राधे अम्बरं मेघैर्मेदुरम् । वसन्तेऽपि कृष्णाहृतैर्मेघैस्तिमिरैर्वा मेदुरं निबिडम् । वनभुवः तमालद्रुमैः श्यामाः । अतः अभिसरन्तीं त्वां कोऽपि न जानातीति भावः । तत्तस्मादिमं कृष्णं त्वमेव गृहं प्रापय । लतागृहं प्राप्य रमय ॥

End :

यन्नित्यैरिति । यद्वस्तु विरिञ्चगिरिजाप्राणेशमुख्यैः ब्रह्मेशमुख्यैर्मुहुः (आस्रजं अजस्रं) नानाकारविकारसारचतुरैः नानाविधचिन्ताविशेषनिपुणैः विद्वद्भिर्नित्यैर्वचनैरुपनिषद्वाक्यैः अद्यापि निश्चीयते । तदाद्यं परं वस्तु भव्यैः मधुरैः मत्सूक्तिसंशोधितैः जयदेवकाव्यघटितैः गीतगोविन्दवाक्यैः सारस्यसीमाजुषां व्यक्तिविशेषशायिनां चेतसि चकास्तु स्फुरतु ।

Colophon :

इति गीतगोविन्दव्याख्याने सरससरसीरुहाक्षो नाम द्वादशः सर्गः ॥ समाप्तश्चाध्यायः ।

श्रीकृष्णाय नमः ।

Author—Text : Jayadeva.

Remarks—The commentary appended to thi Ms. is different from Śrutirañjinī.

## ॥ गीतगोविन्दम् ( केरलभाषाव्याख्योपेतम् ) ॥

## 1753. GĪTAGOVINDAM

### with Malayāḷam commentary.

Substance—Palm leaf. Size—" 2". Leaves—85. 11—12 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—2000.

Subject—Same as No. 1739.

Beginning:

श्रीगणपतये नमः । अविघ्नमस्तु ।

मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमै-
र्नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय ।
इत्थं नन्दनिदेशतश्चलितयोः प्रत्यध्वकुञ्जद्रुमं
राधामाधवयोर्जयन्ति यमुनाकूले रहःकेळयः ॥

ജയദേവനെന്നു പേരായിരിക്കുന്ന കവീന്ദ്രൻ ഗീതഗോവിന്ദമായിരിക്കുന്ന പ്രബന്ധത്തെച്ചമപ്പാൻ തുടങ്ങുമ്പോൾ അതിങ്കൽ പ്രതിപാദിപ്പാൻ യോഗ്യമായിരിക്കുന്ന വസ്തുവിനെ ഉള്ളിൽ സംഗ്രഹിച്ചു് അതിന്റെ ഉദ്ദേശസ്വരൂപമായി മംഗലത്തെ ആചരിക്കുന്നു മേഘൈരെന്നാദിയായുള്ള ശ്ലോകംകൊണ്ടു്. എടോ രാധേ അംബരം മേഘൈർമ്മേദുരം ഇപ്പോൾ വസന്തകാലം എന്നാവൂ ഇരിപ്പതെങ്കിലും കൃഷ്ണനാൽ വിഹരിക്കപ്പെട്ടിരിക്കുന്ന മേഘങ്ങളെക്കൊണ്ടു് മേദുരമായിരിക്കുന്ന ആകാശം മേദുരം നിബിഡം നിറയപ്പെട്ടിരിപ്പോന്നു് എന്നു പൊരുൾ

End:

स्मरशरसुभगनखेन सखीमवलम्ब्य करेण सलीलम् । चलवलयक्षणितैरवरोधय हरिमपि निजगतिशीलम् । मुग्धे मधुमथनम् ।

കാമന്റെ ശരങ്ങളോടു സമങ്ങളായിരിക്കുന്ന നഖങ്ങളോടുകൂടിയ കരങ്ങൾകൊണ്ടു് വ്രീളയോടു കൂടുംവണ്ണം സഖിയെ അവലംബിച്ചിട്ടു് ഇളകിയിരിക്കുന്ന പദങ്ങളുടെ ശബ്ദത്തോടുകൂടി ഹരിയുടെ ഉരഃസ്ഥലത്തുങ്കൽ അധിരോഹണം ചെയ്ക. സഖിയുടെ കൈയുംപിടിച്ചു് ശ്രീകൃഷ്ണന്റെ തിരുമാർവിടത്തുങ്കൽ വീഴുക. ഔവണ്ണമനുസരിക്ക. സ്വച്ഛന്ദാനുവർത്തിയല്ലോ ശ്രീകൃഷ്ണൻ.

श्रीजयदेवभणितमधरीकृतहारमुदासितवामं
हरिविनिहितमनसामधितिष्ठतु कण्ठतटीमभिरामम् ।
मुग्धे मधुमथनम् ।

ശ്രീകൃഷ്ണന്റെ മന്ദഹാസമാധുര്യത്തെ അധഃകരിച്ചിരിക്കുന്ന ശ്രീജയദേവന്റെ ഭണിതം ഹരിവിനിഹിതമനസ്സുകൾക്കു് കണ്ഠനടീയായി സ്ഥിതിചെയ്യേണമേ അഭിരാമം അങ്ങനെയിരുന്ന ഹാസവും ഭണിതവും. ഉപാസിതരാമം എന്നുള്ള പാഠത്തുങ്കൽ രാമമാരാൽ ഉപാസിക്കപ്പെട്ടിരുന്നു. ഉദാസിതവാമം വാമഭാഗത്തെ ഉദാസീനമാക്കിയിരുന്നു. ഇങ്ങനെയിരിക്കുന്ന ശ്രീജയദേവസാരസ്വതം വിഷ്ണുഭക്തന്മാർക്കു് അലങ്കാരമായി ഭവിക്കേണമേ.

Colophon :

इति श्रीगीतगोविन्दे मानिनीवर्णने चतुरचतुर्भुजो नाम दशमः सर्गः ।

Author :

Remarks—The commentary is very exhaustive and elegant.

## ॥ गीतगोविन्दम् (केरलभाषाव्याख्योपेतम्) ॥

### 1754. GĪTAGOVINDAM
with Malayāḷam commentary.

Substance—Palm leaf. Size—$9\frac{3}{4}'' \times 1\frac{3}{4}''$. Leaves—94. 9—11 lines per page and 26—38 letters per line. Script—Malayāḷam. No. of Granthas—2000. Incomplete.

Subject—Same as No. 1739.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमै-
र्नक्तं भीरुरयं त्वमेव तादिमं राधे गृहं प्रापय ।
इत्थं नन्दनिदेशतश्चलितयोः प्रत्यध्वकुञ्जद्रुमं
राधामाधवयोर्जयन्ति यमुनाकूले रहःकेळयः ॥

मेघैः मेदुरं अम्बरं वनभुवः श्यामाः तमालद्रुमैः नक्तं भीरुः अयं त्वम् एव तत् इमं राधे गृहं प्रापय । इत्थं नन्दनिदेशतः चलितयोः प्रत्यध्वकुञ्जद्रुमं राधामाधवयोः जयन्ति यमुनाकूले रहःकेळयः ।

हे राधे अम्बरं मेघैर्मेदुरम् । वनभुवस्तमालद्रुमैः श्यामाः । नक्तं अयं भीरुश्च । तत् इमं त्वं एव गृहं प्रापय । इत्थं नन्दनिदेशतः चलितयोः राधामाधवयोः यमुनाकूले रहःकेळयः जयन्ति ।

അല്ലയോ രാധേ അംബരം ആകാശം മേഘങ്ങളാൽ വാരിദങ്ങളാൽ മേദുരമായിചമഞ്ഞു നിബിഡമായിചമഞ്ഞു. വനഭുക്കൾ വനസ്ഥലികൾ തമാലദ്രുമങ്ങളാൽ പച്ചിലമരങ്ങളാൽ

ശ്യാമകളായിച്ചമഞ്ഞു ഇരുളിടപ്പെട്ടുചമഞ്ഞു നക്തം രാത്രിയാവൃത്തം ചെയ്തു. ഇവൻ ഇക്കൃഷ്ണൻ ഭീരുവാകയുമൊണ്ടു് ഏററവും ഭയശീലനാകയുമൊണ്ടു് അതുഹേതുവായിട്ടു് ഇവനെ ഇക്കൃഷ്ണനെ നീ തന്നെ ഗൃഹത്തെ ഭവനത്തെ പ്രാപിപ്പിച്ചാലും കൊണ്ടുപോയാക്കിയാലും.

End :

स्थलजलरुहरुचिकरचरणेन लुठति न सा हिमकरकिरणेन ।
हे सखि स्थलजलरुहकरचरणेन हिमकरकिरणेन न सा लुठति ।

അല്ലയോ സഖി സ്ഥലജലരുഹരുചികരചരണനാലും സ്ഥലജലരുഹങ്ങളുടെ സ്ഥലകമലങ്ങളുടെ രുചിപോലെ ഉള്ള രുചിയോടു് കാന്തിയോടു് കൂടിയവയായിരിക്കുന്ന കരചരണങ്ങളോടു് കരങ്ങളോടും കൈകളോടും ചരണങ്ങളോടും പാദങ്ങളോടും കൂടിയവനായിരിക്കുന്ന കരചരണങ്ങളോടു് കരങ്ങളോടും കൈകളോടും ചരണങ്ങളോടും പാദങ്ങളോടും കൂടിയവനായിരിക്കുന്ന കൃഷ്ണനാലും ഹിമകരകിരണത്താലും അവൾ പീഡിക്കുന്നു അല്ല.

Colophon :

षष्ठः सर्गः ।

Author :

Remarks—The Ms. extends up to the seventh *Sarga*.

। गोपिकोन्मादः ॥

## 1755. GOPIKONMĀDA.

Substance—Palm leaf. Size—4" × 3". Leaves—40. 8 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas—320.

Subject—Description of Kṛṣṇa's sports.

Beginning :

हरिः । श्रीगणपतये नमः ।

वृन्दारण्ये विलसितशरच्चन्द्रिकायां निशायां
गोपस्त्रीभिः करमुरलिकानादसम्मोदिताभिः ।
रासक्रीडामधिकमधुरामादधानं युवानं
वन्दे मूर्ध्ना वलभिदुपलश्यामलाङ्गं मुकुन्दम् ॥

अत्राश्चर्यं रसमभिनवं सेव्यशृङ्गारसारं
मान्या मूर्तिर्मुरविजयिनो.....नो मूर्तिभेदात् ।
वेदान्तार्था.......कमपि व्यज्यमानं च मध्ये
काव्ये ......व्ये शृणुत रसिका गोपिकोन्मादसंज्ञे ॥

काचिद् वृन्दावनपरिसरे गोकुलं चारयन्तं
पश्चादेत्य प्रकृतिमधुरं वंशमापूरयन्तम् ।
तन्नादेन श्रुतिसुरभिणा तिर्यगाकृष्यमाणा
कृष्णं क्रीडारसपरवशं पुष्पलावी ददर्श ॥

End :

काव्याकारा कृतिरभिनवा कृष्णकेलिप्रशंसा
भक्त्या क्लृप्ता स्फुरदुपनिषद्वाक्यगूढार्थपूर्णा

पापच्छेत्री जगति पठतां शृण्वतां कर्णभूषा
मोदाय स्तान्मुरविजयिनो गोपिकोन्मादसंज्ञा ॥

Colophon :

इति गोपिकोन्मादं काव्यं समाप्तम् ।

Author :

Remarks—The work is noticed as No. 3798 TCM, Vol. IV, Part I C.

---

## ॥ घण्टापथः (किरातार्जुनीयव्याख्या) ॥

### 1755. GHAṆṬĀPATHA

Commentary on Kirātārjunīya.

Substance—Palm leaf. Size—14″ × 2″. Leaves—79. 10 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—2500.

Subject—Elucidation of the Kirātārjunīya.

Beginning :

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।
अर्धाङ्गीकृतदाम्पत्यमपि गाढानुरागि यत् ।
पितृभ्यां जगतस्तस्मै कस्मैचिन्महसे नमः ॥
आलम्बे जगदालम्बं हेरम्बचरणाम्बुजम् ।
शुष्यन्ति यद्रजःस्पर्शात्सद्यः प्रत्यूहवार्धयः ॥
मल्लिनाथकविः सोऽयं मन्दात्मानुजिघृक्षया ।
तत्किरातार्जुनीयाख्यं काव्यं व्याख्यातुमिच्छति ।

नारिकेलफलसम्मितं वचो भारवेः सपदि तद्विभज्यते ।
स्वादयन्तु रसगर्भनिर्भरं सारमस्य रसिका यथेप्सितम् ॥

नानानिबन्धविषमैकपदैर्नितान्तं
साशङ्कचङ्क्रमणखिन्नधियामशङ्कम् ।
कर्तुं प्रवेशमिह भारविकाव्यबन्धे
घण्टापथं कमपि नूतनमातनिष्ये ॥

End :

क्षितिपतेस्तनयस्यार्जुनस्य वीर्यं शौर्यं सम्पश्यतां तत्त्वविदामपि हरेरंशावतारो विदुषामपि । किमुतान्येषामिति भावः । मुनीनामङ्गानि गात्राण्यभिन्नमविरलमञ्चिततरमतिरुचिरतरं रोमाञ्चं रोमहर्षं बिभराम्बभूवुः बभ्रुः । 'भीह्री' इत्यादिना विकल्पादाम्प्रत्ययः ।

Colophon :

इति श्रीमहोपाध्यायकोलचलमल्लिनाथविरचितायां किरातार्जुनीयव्याख्यायां घण्टापथसमाख्यायां पञ्चदशः सर्गः ।

सुब्रह्मण्याय नमः ।

നാരായണപ്പിള്ള കൈയ്യെഴുത്തു. സരസ്വതീ നിത്യം തുണക്ക

शुभमस्तु ।

Author—Mallinatha.

Remarks—The Ms. extends up to the 15th canto.

---

## ॥ चाटुश्लोकाः ॥

## 1757. CĀṬUŚLOKĀ.

Substance—Palm leaf. Size—9″ × 1″. Leaves—19. 5 lines per page and 18 letters per line. Script—Malayāḷam. No. of Granthas—100. Incomplete.

Subject—Apophthegmatic verses.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

प्रातर्निद्राविरामः स्मरणमथ गुरोः स्नानसन्ध्याप्रणामौ
जापो होमश्च पूजा प्रमुदितमनसो वेदशास्त्रादिपाठः ।
भुक्तिर्नैवेद्यशेषैरतिथिसहकृतैस्सत्पुराणावलोको
रात्रौ ध्यानञ्च विष्णोरिति हि सुकृतिनामन्वहं याति कालः ॥

प्रथमवयसि दत्तं तोयमल्पं स्मरन्तः
शिरसि विहितभारा नालिकेरा नराणाम् ।
सलिलममृतकल्पं दद्युराजीवनान्तं
नहि कृतमुपकारं साधवो विस्मरन्ति ॥

सोऽस्मिम् वेश्मनि पूर्णविश्वविभवैः पूज्यान् समाराधयन्
प्रेयस्या गुणपूर्णया गुणवता पुत्रेण मित्रेण च ।
सार्धं प्रावृषि केरलेषु हि भवद्भक्त्या समाकर्णयन्
क्रीडां राघवकृष्णयोः क्षपयते कालस्स धन्यो जनः ॥

End:

കൂടപ്പോന്നോരു ധൈര്യോദയമിവിട വരുന്നേര—
മെഞ്ഞാന്നുമുണ്ടോ
ടിപ്പോടെക്കൊണ്ടിതന്നെ വിരസ നവനനാലംബിതാ
ന്ദം മനോ മേ,

ഗ്രന്ഥം നിൻധീരതപ്പെണ്ണിനെ വിരവിനോടേന്നരായ്
വതിത്തെങ്കിലോ
കാരിക്കോടംബുവിട്ടീകലിതരുചി കളിച്ചിങ്ങിരി
ക്കായിരുന്നു.

न श्मश्रूणि न पट्टबन्धतिलकं नह्यम्बराडम्बरं
न च्छत्रं न तुरङ्गमो न वदतां बृन्दानि नो वन्दिनः ।
अस्त्यस्माकममन्दमन्दरगिरिप्रक्षुब्धदुग्धाम्बुधिः
प्रेङ्खद्वीचिपरम्परापरिणता वाणी तु नाणीयसी ॥

नहि वर्तनमात्रेण धनेन रमते मनः ।

Colophon :

Author :

Remarks—These verses are collected from various works.

---

## ॥ चाटुश्लोकाः ॥

## 1758. CĀṬUŚLOKĀ.

Substance—Palm leaf. Size—10″ × 1½″. Leaves—16. 6 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas — 140. Incomplete.

Subject—Same as No. 1757.

Beginning :

राजा राजार्चिताङ्घ्रेरनुपचितकलो यस्य चूडामणि.....
नानागा......जार्धं नभसितधवलं यद्वपुर्भूषयन्ति ।

मा रामा रागिणी भून्मतिरिति यमि येन वोदाहि मारः (?)
सप्तास्सप्ताश्वनुन्नारुणकिरणनिभा भातु बिभ्रत् त्रिणेत्रः ॥

नटनपटुमृडानीनाथ को......कोटी
.......लतटिन्याटोपपाटच्चरी ते ।
जयति विजितजाती जातमा.....वेणी
विमतमतकृपाणी वीरमार्ताण्डवाणी ॥

नटान्निटिललोचनो......जटा...टाम्लुठ-
त्परिध्वनिवियद्धुनीद्रुततरङ्गभङ्गाग्रता ।
वृथाकृतसु....विजयते वचोवीचिका
सुधाकृतविधातृदुर्लिपिविधानमार्ताण्ड..... ॥

End :

चान्द्री रेखा तिमिराकिरणैः सामरस्यं प्रसूते
चाम्पेयेन प्रणयलहरीचञ्चरीको विविङ्क्ते ।
ज्योत्स्नाबालातपकलिकयोर्ज्योतिषी सङ्कटेते
मन्ये धन्ये तव मुखमिदं मन्मथेन्द्रस्य जालम् ॥

अनाघ्रातं पुष्पं किसलयमलूनं कररुहै-
रनाविद्धं रत्नं मधु नवमनास्वादितरसम् ।
अखण्डं पुण्यानां फलमपि च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति विधिः ॥

Colophon :

Author :

Remarks—Same as No. 1757.

## ॥ चाटुश्लोकाः ॥

## 1759. CAṬUŚLOKA.

Substance—Palm leaf. Size—7" × 1¼". Leaves—23. 6—8 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—200.

Subject—Same as No. 1757.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नेन परिसमाप्तिरस्तु ।

इन्दीवरप्रतिममिन्दिरयोपगूढ-
मिन्दिन्दिरानुगतसौरभचारुमालम् ।
मन्दारकुन्दसितसुन्दरमन्दहासं
वन्दामहे किमपि चन्द्रकभूषमोजः ॥

मन्दं मन्दं मधुरनिनदं वेणुमापूरयन्तं
वृन्दं वृन्दावनभुवि गवाश्चारयन्तं चरन्तम् ।
छन्दोभागैश्शतमखमखध्वंसिनां दा(नवानां)
हन्तारं तं कथय रसने गोपकन्याभुजङ्गम् ॥

मन्दमन्ददलितारविन्दमकरन्दशीकरकणाकुला
नन्दितालिनिकुरुम्बकामकरकेतुमेदुरमदप्रदाः ।
सुन्दरीचि(कु)रमल्लिकाकुसुमसौरभीभरणतुन्दिलां
दन्दशूकसुखदायिनो बत खलन्ति मालयसमीरणाः ॥

स्पन्दमाननवचम्पकप्रसवबन्धनोदरनिरन्तर-
स्यन्दमानमकरन्दवारिकणगन्धवासितदिगन्तराः ।
मन्दमाचालितसुन्दरीचिकुरबन्धना मदनबन्धवो
मुञ्चमानमति हन्त मानिनि सरन्ति सायमनिलाङ्कुराः ॥

End :

क्रौर्यं स्त्रीषु कृतज्ञता शुनि कवौ नैर्धन्यमज्ञे धनं
धर्मे दुःखमघे सुखं गवि पयः क्षारं समुद्रेऽर्पितम् ।
दौर्मुख्यं नृपतौ कुशे सुमुखता चायुर्द्रुमेऽल्पं नृणा-
मित्थं धातुरकौशलं गणयितुं व्यासोऽपि नो शक्नुयात् ॥

कामिन्यः कुटिलास्सपङ्कमुदकं कर्णेजपप्रत्ययाः
राजानः कृतमत्सराः कृतधियः कल्माषधारी शशी ।
इक्षुः पर्वनिरन्तरा भगवती लक्ष्मीः खलान्वेषिणी
प्रायो हन्त सुखावहेषु सकलेष्वासक्तिदोषो विधिः ॥

स्थाणुः प्रियस्ते तनयो विशाखः
त्वमप्यपर्णा गिरिजे तथापि ।
छायाप्रदानेन तपोधनानां
सांसारिकं तापमपाकरोषि ॥

श्रुतिर्नष्टा स्मृतिर्नष्टा प्रायेण पतिता द्विजाः ।
अङ्गान्यपि च जीर्णानि हा वृद्धो वर्तते कलिः ॥
अनौचित्यादृते नान्यद् रसभङ्गस्य कारणम् ।
प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषद् वरा ॥

प्रकाममभ्यस्यतु नाम विद्यासौजन्यमभ्यासवशादलभ्यम् ।
कर्णं युवत्यः प्रविशालयेयुर्विशालयेदक्षियुगं न काचित् ॥

Colophon :

शिवम् ।

Author :

Remarks—Same as No. 1757.

॥ चाटुश्लोकाः ॥

## 1760. CATUŚLOKA.

Substance—Palm leaf. Size—$9\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—11, 8 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—150.

Subject—Same as No. 1757.

Beginning:

ग० अविघ्नमस्तु ।

त्रयी य ... सीमन्तसीमासिन्दूरव ... वः ।
संसाराब्धिं पिबेयुर्वः कंसारेः पादपांसवः ॥
गुणदोषौ बुधो गृह्णन्निन्दुक्ष्वेडाविवेश्वरः ।
शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छति ॥
शब्दशक्त्यैव कुर्वाणा सर्वदा नवनिर्वृतिम् ।
काप्याविद्या श्रुतिगता स्यान्मृतस्यापि जीवनी ॥
कल्याणवर्णपदतां वाग्विद्युदिव बिभ्रती ।
अभ्रान्तेषु सदासारसङ्गिषु स्यात् स्फुरद्गुणा ॥
यदनादेयवद्भाति गूढभावेन यो गतः ।
सारस्वतामृतं सर्वे कवयस्तन्न जानते ॥

End :

आजन्मसिद्धं कौटिल्यं ...स्य च खलस्य च ।
साधुस्तयोर्मुखाक्षेपमलमेकैव सा .... ॥
अहो प्रकृति .... मद्दलस्य खलस्य च ।
यावन्मुखगतं पिण्डं तावन्मधुरभाषणम् ॥
.... गाधा नूनमस्त्र .... इव कुपार्थिवाः ।
गुणिनो घट(का) नो चेत् कथं संप्रा.... नाम् ॥

जीवनहग्रणे नम्रा गृहीत्वा पुनरुन्नताः ।
किं कनिष्ठाः किमु ज्येष्ठा (घटीयन्त्र)स्य दुर्जनाः ॥

Colophon :

शिव । ओन्नमो नारायणाय नमः । हरिः । नील.... ....
न लिखितमिदं पु.... कम् । हरिः ।

Author :

Remarks—The Ms. is much damaged and worn out.

---

॥ चाटुश्लोकाः ॥

1751. CĀṬUŚLOKA.

Substance—Palm leaf. Size—7″ × 1″. Leaves—32. 5 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—250.

Subject—Same as No. 1757.

Beginning :

... ... ... ... मूहः ॥

यद्दृश्यशृङ्गं स्मृतिबीजमाधा-
द्विस्मापनं .... .... विलासिनीनाम् ।
उपात्तनेपथ्यविशेषशोभि
प्रवालपुष्पप्रकराभि(रा)मम् ॥

हारी नराणान्निवहस्समूहं
वल्लीद्रुमाणां विगुणीचकार ।
निदर्शिताशेषविशेषरूपं
वृक्षं लतावेष्टितमीक्षमाणम् ॥

जामातरि स्मेरमुखे नवोढा
तिरोदधे स्वेन सखीजनेन ।
सर्वस्वभूतानि विलासयोने-
रामोदमानानि विकस्वराणि ॥

जहार पुष्पव्यपदेशपूर्वं
तन्वीमनांसीव वनस्पतीनाम् ।
नेदीयसा सौरभनिर्भरेण
दत्ताधिवासं कुसुमस्मितेन ॥

End :

प्रक्रीडितस्त्रीस्तनचक्रवाळ-
प्रक्षोभतान्तैरुषसि प्रपीतम् ।
महोर्मियः कुङ्कुमरागमूढ-
बालातपं वान्तमिवारविन्दैः ॥

सखीमृषात्वञ्च .... ला जनेन
कान्तापराधं च विभावयन्त्योः ।
धौतेऽङ्गरागे स्फुरता सपत्न्योः
परस्परं प्रत्युत पक्षपातः ॥

कोपात्पराचीं मम सम्मुखीनां
छायाच्छलेन त्वमिहावहेति ।
आकर्णनात्तान्तगिरामकाण्डे
चण्डी विचिक्षे .... तरङ्ग .... खा ॥

वक्त्रैस्सरोजानि विलोचनाभ्या-
मिन्दीवरं मीनकुलं कटाक्षैः ।

स्त्रैणं विनिर्जित्य जलाशयानां
रक्तोत्पलं पाणिभिरुत्ततार ।

Colophon :

Author :

Remarks—Same as No. 1757.

---

## ॥ चाटुश्लोकाः ॥

## 1762. CĀṬUŚLOKA.

Substance—Palm leaf. Size—$9\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—6. 10—11 lines per page and 34—40 letters per line. Script—Malayāḷam. No. of Granthas—150.

Subject—Same as No. 1757.

Beginning :

हरिः ।

यान्त्या मुहुर्वलितकन्धरमाननं त-
दावृत्तवृन्तशतपत्रनिभं वहन्त्या ।
दिग्धोऽमृतेन च विषेण च पक्ष्मलाक्ष्या
गाढं निखात इव मे हृदये कटाक्षः ॥

अङ्गुष्ठमात्रतनुरेव स कुम्भजन्मा
पथ्यैष्ट?योजनशतं मकराधिवासम् ।
आचान्तमम्बु सकृदेव समीनफेनं
शक्यं न देहमहिमा महतां प्रमाणम् ॥

निरानन्दः कौन्दे मधुनि विधुरो बालबकुले
रसाले सालम्बो लवमपि लवङ्गे न रमते ।
प्रियङ्गौ नो सङ्गं रचयति न चूते विचरति
स्मरल्लँक्ष्मीलीलाकमलमधुपानं मधुकरः ॥

End :

गहिअमरासणबाणो इन्दीवरसामळो सरोरुहणयणो ।
समसीरवं महणिदो सो विअ एसो वि अम्महे रहुतणओ ॥

कालिन्दीकुवलयकोमलः कृतोऽस्मी
कारुण्यान्मयि दयिते कटाक्षमोक्षम् ।
विस्पष्टं विरचय मेच किन्न वाचं ?
विक्रीते करिणि किमङ्कुशे विवादः ॥

अङ्गुल्या मन्दमन्दं प्रहरसि दयिते मन्मथार्ते कवाटे
सङ्केताज्ञाव्रती सा मदनपरवशा सस्मिता चोत्थिता च ।
आरावान्नूपुराणां निजपितृजननीबोधमाशङ्कमाना
तेषां वक्त्रान्तराळे क्षिपति सुमनसः केशपाशाद्विमुच्य ॥

वेधा द्वेधा भ्रमं चक्रे .... ... .... ।

Colophon :

Author :

Remarks—Same as No. 1757.

---

॥ चाटुश्लोकाः ॥

1763. CATUŚLOKA.

Substance—Palm leaf. Size—14″ × 1⅜″. Leaves—22.

7—9 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—525.

Subject—Same as No. 1757.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

षट्पदमुखरितगण्डं कोटीरभरावबद्धशशिखण्डम् ।
प्रणमत वारणतुण्डं पदकमलप्रणतसकलसुरषण्डम् ॥

शारदां शरणं यामः शारदाम्भोजसन्निभाम् ।
यस्याः प्रसादादभवत् कालिदासः कवीश्वरः ॥

कलवेणुरवः कलायनीलः कमलाचुम्बनलम्पटोऽतिरम्यः ।
अलिपोत इवारविन्दमध्ये रमतां मे हृदि देवकीकिशोरः ॥

End:

कमले निधाय कमलं कलयन्ती कमललोचनं कमलम् ।
कमलादद्भुतकमलं कमलं कमलेन वारयत्यबला ॥

वेणीं कृत्वा विमलमुकुरे वक्त्रमालोकयन्ती
बाला नीलोरगकबलितं वीक्ष्य शीतांशुबिम्बम् ।
जाताश्चर्या तदनु बहुधा वीक्ष्य सारङ्गहीनं
मुद्राहीनं मुरमधुरिपोर्विस्मिता सस्मिता च ॥

अर्कौघाभं किरीटान्वितमकरलसत्कुण्डलं दीप्तिराज-
त्केयूरं कौस्तुभाभाशबलरुचिहरं पीतकौशेयवासम् ।
नानारत्नांशुभिन्नाभरणशतयुजं श्रीधराश्लिष्टपार्श्वं
वन्दे दोःसक्तचक्राम्बुरुहदरगदं विश्ववन्द्यं मुकुन्दम् ॥

Colophon :

Author :

Remarks—Same as No. 1757.

## ॥ चाणक्यकथासारः ॥

### 1764. CĀṆAKYAKATHĀSĀRA.

Substance—Palm leaf. Size—12″ × 2″. Leaves—12. 10 lines per page and 48 letters per line. Script—Grantha. No. of Granthas—375.

Subject—A compendium of the Mudrārākṣasa.

Beginning :

हरिः । श्रीगणपतये नमः ।

स्वभावमहितैर्वेषैः पुष्णान् विबुधमम्मदम् ।
ख्यापितो गीर्भिरख्याभिः श्रीमान् नारायणो जयेत् ॥

बुद्धिरेव जयत्येका पुंसः सर्वार्थसाधिनी ।
यद्बलादेव किं किं न चक्रे चाणक्यभूसुरः ॥

चाणक्यस्य कथा सेयं विद्यते हृद्यरूपिणी ।
अद्य तां पद्यतां नेतुमुद्यतो रविनर्तकः ॥
नयप्रयोगप्राचण्ड्यस्फुरद्वीराद्भुतात्मना ।
अनया कथया को न मतिमानतिमाद्यति ॥

अस्ति सुस्थितभूपालवृन्दं मन्दाकिनीतटे ।
रक्तांशुपटलीभूतं पाटलीपुत्रकं पुरम् ॥

बहुजातिसमाकीर्णमशोकोदयशोभनम् ।
भूमौ तिलकभूतं यदाहुः पुष्पपुरं जनाः ॥

सर्वार्थसिद्धिस्तत्रासीद्राजा नन्दापराभिधः ।
अमात्यश्चाभवत्तस्य राक्षसो नाम रूक्षधीः ॥

End :

इति श्रुत्वा तथेत्याह राक्षसो मतिमत्तमः ।
साचिव्यं ग्राहयामास तेन मौर्यात्मजस्तदा ॥

वधाच्चन्दनदासं च मोचयित्वा महीतले ।
वणिजामग्र्यमकरोद्राक्षसस्य हितेप्सया ॥

बद्धं मलयकेतुं च नीतं भद्रभटादिभिः ।
राक्षसाभ्यर्थितो मुक्त्वा म्लेच्छराज्यं तदादिशत् ॥

इत्थं विधाय बहु नन्दकुलस्य नाशं
कृत्वा नृपं च भुवि मौर्यसुतं स्वबुद्ध्या ।
बद्ध्वा शिखाश्च चणकस्य सुतः स्वदेश-
मभ्या(ययौ) नयजुषां किमु दुष्करं स्यात् ॥

Colophon :

इति मुद्राराक्षसकथासारः समाप्तः ॥
रविनर्त्तककृतः कथासारः समाप्तः ।
हरिः । शुभमस्तु ।

Author—Ravinartaka.

Remarks—The following portion of the commentary occurs after the close of the work :

दुश्शीला च दुराकृतिश्च यदि तत् को गगवत्या गुणः
शीलाकृत्यभिरूपयापि हि भवेद्....न्धया किं फलम् ।
शीलाकृत्यनुरक्तयस्समुदिता यासां गुणाः प्रीतये
ताः कान्ताः कमितुः परास्तपरिहासायासमात्रप्र- .....? ॥

पर्वतकविनाशः केवलं कृतघ्नतामात्रफल एव स्यादिति अन्ये-नापि कृते पर्वतकविनाशेऽस्या कृतघ्नता प्रत्युपकारकरणाभावरू ... स्माकं जाता तन्मात्रफल एव स्यात् न तु राज्यापरार्धलोभफलोऽपि इत्यर्थः । द्वेधा हि कृतघ्नता उपकारिणं प्रत्यपकारकरणरूपा प्रत्युपकाराकरणरूपा च । तत्र पर्वतकविनाशोऽस्माभिः कृत इति प्रथायां सत्यां प्रथमा कृतघ्नता प्रसज्येत । येनकेनचित् कृतेऽपि पुनस्तद्विनाशे अनन्तप्रत्युपकारयोग्यस्य तस्याकृतप्रत्युपकारस्यैव विनष्टत्वात् तद्व(न्त्रि?न्तृ)निधनस्यापि पुनरलाभाच्च प्रत्युपकाराकरणरूपा कृतघ्नतास्माकं प्रसक्तैव । तत्पुत्राय राज्यदानेऽपि पुनस्तत्प्रत्युपकाराभावो न सम्यक् समाहितो भवति । राज्यं च गतं भवतीति भावः ।

---

## ॥ चाणक्यकथासारः ॥

### 1765. CĀṆAKYAKATHĀSĀRA.

Substance—Palm leaf. Size—$14\frac{1}{4}'' \times 1\frac{3}{4}''$. Leaves—21. 7 lines per page and 42 letters per line. Script—Malayāḷam. No. of Granthas—375.

Subject—Beginning: Same as No. 1764.

End:

तद्वाचान्ये कुसुमपुरगा राक्षसस्य प्रिया ये
चाणक्यस्तानभिमतशतैः प्रीणयामास राज्ञा ।
आसीदन्यादृशमिव तदा राक्षसस्यापि चेत-
स्सम्मानैश्च क्षितिपतिगुणैः प्रेम चासीत् क्रमेण ॥

प्रतिज्ञां तीर्त्वैवं विपुलमतिराबद्ध्य च शिखां
निराशोऽपि प्रीत्या नरपतिकृताशेषविभवः ।
स कौटिल्यो धर्मान् विधिवदकरोदात्मभवने
वदन् काले काले हितमखिलमस्मै नरभुजे ॥

स चन्द्रगुप्तोऽपि विधाय भाग्यवान्
योग्यां पितृभ्रातृवधप्रतिक्रियाम् ।
गुणोत्तरं राक्षसमेत्य मन्त्रिणं
नवे वयस्यन्वशिषन्महीं सुखम् ॥

Colophon:

**इति मुद्राराक्षसे कथासारः ।**

Author--Same as No. 1764.

Remarks—Many variants are noticeable herein. The Ms. is in fairly good condition.

---

## ॥ चाणक्यकथासारः ॥

## 1766. CĀṆAKYAKATHĀSĀRA.

Substance—Palm leaf. Size—$9\frac{1}{2}'' \times 2''$. Leaves—22.

8 lines per page and 30—34 letters per line. Script—Malayāḷam. No. of Granthas—350.

Subject—Same as No. 1764.

Beginning:

.... .... श्चिरेण कालेन धन्या गर्भमथाम्सुग ।
सुषुवे च म.... .... .... .... .... ॥
.... .... .... .... .... ....प्तकालम् ।
नृपो वि.... .... ....स्त्रथीनिर्जमशेपनः ॥
ग्राहयामास कोदण्डविद्या.... ....हृतम् ।
तस्मिंस्तस्मि....चन्द्रराजा सोऽपि तस्य मनो स्थितः ॥
मात्रोश्च हृदयानन्दकारी जनपदस्य च ।

ततः सुनन्दापि बभार गर्भं
बभार हर्षं नृपतिः प्रजाश्च ।
स गर्भसंस्कारमशेषमस्या-
श्चकार राजा रजसा वियुक्तः ॥

End etc.—Same as No. 1765.

---

## ॥ चाणक्यकथासारः ॥

## 1767. CĀṆAKYAKATHĀSĀRA.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 2''$. Leaves—33. 8 lines per page and 22 letters per line. Script—Malayāḷam. No. of Granthas—365.

Subject—Same as No. 1764.

Beginning etc.—Same as No. 1765.

## ॥ चिन्तातिलकम् (शुकसन्देशव्याख्या) ॥

### 1768. CINTĀTILAKAM.

Commentary on Śukasandeśa.

Substance—Palm leaf. Size—14″ × 1¾″. Leaves—46. 10 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—1500. Incomplete.

Subject—Elucidation of the Śukasandeśa.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

मदवारिषु मिलितालिभिरुपशोभितवदनं
वरवारणमुखपङ्कजमखिलार्थदममलम् ।
करसंभृतसृणिपाशकरदण्डाडिमकलशं
नमताखिलजनवन्दितचरणं भवतनयम् ॥

प्रसरति जगतीह यत्प्रसादा-
दमृतमयी भणितिर्नितान्तहृद्या ।
तुहिनकरकलाकृतावतंसां
शरणमहं समुपैमि भारतीं ताम् ॥

अन्तराहितसन्तापशान्तये सततं भजे ।
तारकान्तकरं देवमन्तकान्तकृतः सुतम् ॥

वासुदेवपदाम्भोजपरागपरमाणवः ।
परिशोधितमच्चेतोमुकुराः पान्तु सन्ततम् ॥

व्याख्यास्ये शुकसन्देशं देशिकापाङ्गसंश्रयः ।
पूर्वव्याख्यानुसारेण तत्र सन्तः प्रसीदत ॥

भुजङ्गभूषं भमिताङ्गरागं भूतापवर्गप्रभवैकहेतुम् ।
भवाब्धिकल्लोलनिमग्नचेता भवं शरण्यं शरणं प्रपद्ये ॥

अथ सकलविबुधजनहृदयकमलमार्ताण्डः कविकुलावतंसः सकलरसिकजनरसायनं शुकसन्देशसंज्ञितं काव्यभार(भमा)ण आशीरादिष्वन्यतमेन प्रबन्धमुखे भवितव्यमिति प्रथमपद्येन वस्तुनिर्देशं करोति—लक्ष्म्या रङ्गे इत्यादिना ।

पदच्छेदः स्फुटप्रायः पदार्थपदविग्रहौ ।
साभिप्रायौ प्रदर्श्येते पदभङ्गोऽपि कुत्रचित् ॥

शशिनो लक्ष्म्या रङ्गे शरदि सौधशृङ्गे प्रेम्णा पेशलाभिः कलाभिस्सह विहरतोः कयोश्चिद्यूनोः स्वप्ने तस्या दूरनीतः श्राव्यया इति गिरा शुकं इति सन्दिदेश इत्यन्वयः ।

End :

"ततं वीणादिकं वाद्यमानद्धं मुरजादिकमि"ति । आदिशब्दान्मुखादिः संगृह्यते । अमत्सरसंघोषं कदाचिन्मूर्च्छज्जनप्रसरसंघोषमितिवन्मूर्च्छाशब्दोऽत्र द्रष्टव्यः । "शब्दे निनादनिनदध्वनिध्वानरवस्वनाः" इत्यमरः । निपतनमधःपतनं रङ्गगतानामुद्धतनृत्तपदविन्यासादिषु गिरिशिखरनिभकुचयुगलजनिघनमण्डलादिभरजनितमिह पारिपतनमपिभवेदस्माकमिति भिया सचकित.... ... ....

Colophon :

इति गौरीदासविरचिते शुकसन्देशविवरणे चिन्तानिलके प्रथमो भागोऽतीतः ॥

Author—Gaurīdāsa.

Remarks—The Ms. contains the *Pūrvasandeśa* and a few verses of the *Uttarasandeśa*. The commentary along with the text is noticed as No. 2819, TCM. Vol. III, Part I C.

---

## ॥ चिन्तातिलकम् (शुकसन्देशव्याख्या) ॥

### 1769. CINTĀTILAKAM.
### Commentary on Śukasandeśa.

Substance—Palm leaf. Size—8" × 1". Leaves—104. 5 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—900. Incomplete.

Subject—Beginning : Same as No. 1768.

End :

सौम्यजान इति । सौम्या जाया यस्येत्यनेन प्रियया सह विहरतस्तवेदृशव्यापारनियोगश्रवणस्य कर्णारुन्तुदता योग्यैवेति ध्वन्यते । एवं किमिति तर्हि मां नियोजयसि यदि जानीषे तत्राह । बन्धु.... ....धृतिं धैर्यं श्लथयति शिथिलं करोति नाशयतीति यावत् । अत्र बन्धुशब्दः प्रियावाचकः । 'नाहि भार्यासमं मित्रमि'ति वचनात् । प्रेयसी तावदद्यास्मद्दयित आयास्यतीति स्थिता कश्चित्कालं पुनस्सन्ध्यायां नायातो मे दयितःसञ्जाता रजनी तस्य मध्येमार्गे प्रभाते तावदायास्यतीति अस्मत्समागमं चिन्तयन्ती तर्ककर्कशं विरहमसहमाना मरिष्यतीत्यादि चिन्त.... ...

Colophon :

Author—Same as No. 1768.

Remarks—The Ms. contains the commentary on 50 verses of the *Pavanasandeśa*.

---

## ॥ जीवातुः (नैषधीयव्याख्या) ॥

### 1770. JĪVĀTU.

Commentary on Naiṣadhīya.

Substance—Palm leaf. Size—19″ × 1¾″. Leaves—88. 8 lines per page and 64 letters per line. Script—Grantha. No. of Granthas—2800.

Subject—Elaborate exposition of the Naiṣadha.

Beginning:

वृन्दारका यत्र भवन्ति भृङ्गा
मन्दाकिनी यन्मकरन्दबिन्दुः ।
तवारविन्दाक्ष पदारविन्दं
वन्दे चतुर्वर्गचतुष्पथं तत् ॥

आलम्बे जगदालम्बं लम्बोदरपदाम्बुजम् ।
शुष्यन्ति यद्रजःस्पर्शात् सद्यः प्रत्यूह..... ॥

तद्दिव्यमव्ययं धाम सारस्वतमुपास्महे ।
यत्प्रकाशात् प्र.....मोहान्धतमसच्छ.... ॥

वाणीं काणभुजीमजीगणदवाशासीच्च वैयासिकी-
मन्तस्तन्त्रमरंस्त पन्नगगवीगुम्फेषु चाजागरीत् ।
वाचामाचकलद्रहस्यमखिलं यश्चाक्षपादस्फुरां
लोकेऽभूद्यदुपज्ञमेव विदुषां सौजन्यजन्यं यशः ॥

श्रीमल्लिनाथविदुषा विदुषां मतेन
तेन....कथामृतकाव्यबन्धः ।
व्याख्या...स्फुटसभावगुणार्थशब्द-
स्ध्वन्यलङ्कृतिरहस्यविदां मुदे तत् ॥

क्षुद्रव्याख्याविषार्त्ता श्रीहर्षकविदुर्गता ।
उज्जीवनाय जीवातुर्जीयादेष मया कृता ॥

इहान्वयमुखेनैव सर्वं व्याख्यास्यते मया ।
नामूलं लिख्यते किञ्चिन्नानपेक्षितमुच्यते ॥

अथ तत्रभवान् श्रीहर्षकविः—
"काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे" ॥

इत्यालङ्कारिकवचनप्रामाण्यात् काव्यस्यानेकश्रेयस्साधनतां काव्यालापांश्च वर्जयेदिति निषेधस्यासत्काव्यविषयताञ्च पश्यन् नैष(धाख्यं) महाकाव्यं चिकीर्षुश्चिकीर्षिताविघ्नपरिसमाप्तिसम्प्रदायाविच्छेदलक्षणफलत्वात् 'आशीर्नमस्क्रियावस्तुनिर्देशो वापि तन्मुख'मित्याशीराद्यन्यतमस्य प्रबन्धमुखलक्षणत्वाच्च कथानाय.... ,...लक्षणं परममङ्गलं .... ....निपीयेति । यस्य क्षितिरक्षिणः क्षमापालस्य नलाख्यस्य. कथा उपाख्यानं निपीय नितरामास्वाद्य... .... ... ....

End :

कतिपयेति । किञ्च कतिपयदिवसैः अल्पदिनैरेव वो युष्माकं वयस्यया सख्या भैम्या वरीयान् श्रेष्ठः पुमान् कामयिता स्वयं अभिलष्य वरिष्यते । यं कामयते तं वरिष्यत इत्यर्थः । तत्तस्मादथेदानीमनया दमयन्त्या भवतीनां विधेय-

विधावासां तासां भवद्विधानां सखीनां सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः। अभिधाभिरुक्तिभिर्या क्रशिमशमना कार्श्यनिवर्तना तया उपायभूतया रुचिः कान्तिः प्रीतिश्च आप्तम् उचिता। आप्तव्यां (?)। स्वयंवरपर्यन्तं भवदुपलालनावचनैः खेदं विहाय प्रसन्नया मन्तुष्टया च....तव्यामित्यर्थः। द्रुतेत्यादिश्लोकचतुष्टये पुष्पिताग्रा- वृत्तम्।

Colophon:

इति पदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलाचल- मल्लिनाथसूरिविरचितायां नैषधव्याख्यायां तृतीयः सर्गः।

Author—Mallīnātha.

Remarks—The commentary ends on verse 121 in the 4th *Sarga*.

---

## ॥ जीवातुः (नैषधीयव्याख्या) ॥

### 1771. JĪVĀTU.

Commentary on Naiṣadhīya.

Substance—Palm leaf. Size 14″ × 2″. Leaves—30. 10 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—975. Incomplete.

Subject—Same as No. 1770.

Beginning:

हरिः। श्रीगणपतये नमः। अविघ्नमस्तु।

अथ तत्रभवान् श्रीहर्षकविः—

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥

इत्याद्यालङ्कारिकवचनप्रामाण्यात् काव्यस्यानेकश्रेयःसाधनत्वात् काव्यालापांश्च वर्जयेदिति निषेधस्यासत्काव्यविषयतां च पश्यन् नैषधाख्यमहाकाव्यं चिकीर्षुश्चिकीर्षिताविघ्नपरिसमाप्तिसम्प्रदायाविच्छेदलक्षणफलसाधनत्वादाशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमित्याशीराद्यन्यतमस्य प्रबन्धमुखलक्षणत्वाच्च कथानायकस्य राज्ञो नलस्य भूतिलक्षणं परममङ्गलं वस्तु निर्दिशति—निपीयेति ।

End:

अधिगत्येति । अथ मोचनानन्तरं स द्विजः पक्षी विप्रश्च दन्तविप्राण्डजा द्विजा इत्यमरः । जगत्यधीश्वरात् क्ष्मापतेर्भुवनपतेश्च । जगती भुवने क्ष्मायामिति विश्वः । पुरुषोत्तमात् पुरुषश्रेष्ठाद्विष्णोश्च ततस्तस्मात् प्रकृतान्नलात् अन्यत्र सिद्धाच्च मुक्तिं मोचनं निर्वाणञ्चाधिगत्य प्राप्य य आनन्दो वचसामपि न गोचरः वक्तुमशक्यः यतो वाच इत्यादिरवाङ्मनसगोचर इत्यादेश्च प्रसिद्धिः । तमानन्दं परमानन्दमविन्दत ।

Colophon:

इति पदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां नैषधव्याख्यायां प्रथमस्सर्गः ।

Author—Same as No. 1770.

Remarks—The Ms. comprises the commentary on the first *Sarga* only.

## ॥ जीवातुः (नैषधीयव्याख्या) ॥

### 1772. JĪVĀTU.

Commentary on Naiṣadhīya.

Substance—Palm leaf. Size—16″ × 1½″. Leaves—19. 10 lines per page and 64 letters per line. Script—Grantha. No. of Granthas—750.

Subject—Same as No. 1770.

Beginning :

अधिगत्येति । अथ मोचनानन्तरं स द्विजः पक्षी विप्रश्च । दन्तविप्राण्डजा द्विजाः इत्यमरः । जगत्यधीश्वरात् क्षमापतेर्भुवनपतेश्च जगती भुवने क्ष्मायामिति विश्वः । पुरुषोत्तमाद् पुरुषश्रेष्ठात् विष्णोश्च तस्मात् प्रकृतान्नलात् । अन्यत्र सिद्धाच्च मुक्तिं मोचनं परमानन्दमविन्दत अलभत । विदिर्लाभे । कर्त्रभिप्राय आत्मनेपदम् ॥

End :

अनुभवतीति । विपिनभुवि प्रमदावनदेशे सखीभिस्सहचरीभिः सख्यशिश्वीति भाषायामिति निपातनाद् ङीप् । सार्धमाबद्धहोर?-सुखं नानुभवतीति मतिः बुद्धिरुदयासीत् उत्थिता । अत्र प्रेक्षतां मतिरिति मनःक्रियापेक्षया समानकर्तृकत्वात् पूर्वकालत्वाच्च प्रेक्ष्येति क्त्वा निर्देशोप(प)त्तिः तावन्मात्रस्यैव तत्प्रत्ययोत्पत्तौ प्रयोजकत्वात् । प्राधान्यश्च प्रयोजकमिति न कश्चिद्विरोधः । अत्रोपमानादुपमेयस्याधिक्याद् व्यतिरेकालङ्कारः ।

श्रीहर्षमित्यादि गतम् । द्वितीय एव द्वैतीयी । तृतीयास्मिन् स्वार्थे वक्तव्या । द्वैतीयीकतया मितः द्वितीयत्वेन गणितः द्वितीय इत्यर्थः । सुगमः सुकृत् ।

Colophon :

इति पदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां नैषधव्याख्यायां जीवातुसमाख्यायां द्वितीयः सर्गः ।

Author—Same as No. 1770.

Remarks—25 leaves are missing in the beginning. The Ms. contains the commentary on the 2nd *Sarga* only.

## ॥ जीवातुः (नैषधीयव्याख्या) ॥

### 1773. JĪVĀTU.

Commentary on Naiṣadhīya.

Substance—Palm leaf. Size—14″ × 2″. Leaves—30. 12—14 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—1350.

Subject—Same as No. 1770.

Beginning :

.........जघ्नुः न्यरौत्सुः अन्यथा ते सद्यो म्रियेरन्नित्यहो दमयन्त्या दयालुत्वमौचित्यं चेति भावः ।

अहहेति । अथेन्द्रादिप्रस्थानानन्तरं मघोना इन्द्रेण सह श्रीप्रतिष्ठया संपत्स्थेम्ना समाने सदृशे नले स्वं निलयमभि स्वशिबिरं प्रति । अभिरभागे इति लक्षणार्थे कर्मप्रवचनीयत्वात्तद्योगे द्वितीया ।

End:

जवादिति । जवान्निजवेगाज्जातेन वातेन बलादाकृष्टा बलाहका मेघा यैस्तैरेषामिन्द्रादीनां रथैर्विमानैः स्वस्यात्मनः श्वसनशीघ्रत्वं वायुवेगित्वम् अकथीव कथितमिवेत्युत्प्रेक्षा । अन्यथा कथं तथा मेघानामाकर्षणमिति भावः । कथेश्चौरादिकात् कर्मणि लुङि तङ् मित्वाद्ध्रस्वत्वम् । क्रमादिति । क्रमाद्वीयमां दूरनिपण्णानां सतां दूरशब्द... ... .... .... ॥

Colophon:

इति पदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते नैषधव्याख्याने जीवातुसमाख्याने षोडशः सर्गः ।

Author—Same as No. 1770.

Remarks—The Ms. contains the commentary on *Sargas* 15 and 16.

---

## ॥ तत्त्वप्रकाशिका (शौरिकथाव्याख्या) ॥

### 1774. TATTVAPRAKĀŚIKĀ.

Commentary on Śaurikathā.

Substance—Palm leaf. Size—21″ × 2½″. Leaves—98. 8—9 lines per page and 72—80 letters per line. Script—Malayāḷam. No. of Granthas—4000.

Subject—Elucidation of the Śaurikatha of Vāsudeva, son of Ravi,

Beginning :

हरिः। श्रीगणपतये नमः । अविघ्नमस्तु ।

अखिलासुरनरमानुषनिकराननतचरणं
गगनेचरवनिताजननुतिगीतिसुमुदितम् ।
तुहिनाचलतनयासुरमनुजेतरमनिशं
प्रणमामि तमहिमण्डितचरणाम्बुजयुगलम् ॥

यदनुग्रहविरहे मति भवक्लेशवविधयः
प्रभवन्ति न वदितुं गिर इह किं पुनरपरे ।
तुहिनद्युतिशकलच्छविनिलसज्जटमनिशं
प्रणमामि तदाधिदैवतममलच्छवि वचसाम् ॥

तुहिनदीधितिखण्डलसज्जटं
रविशशाङ्ककृशानुविलोचनम् ।
वटतटीकृतराममहं भजे
रजतवर्णमनङ्गहरं हरम् ॥

महिपप्रोथनिहितचरणं करणं महः ।
मुक्तेर्मुक्तिस्थलास्थावद्दोर्गं दुर्गं भजे मुहुः (?) ॥

यदनुग्रहतः पुंसां मतिदर्पणनिर्मला ।
यतीशं तं गुरुं वन्दे त्रय्यन्तोदधिपारगम् ॥

वेणुनिनादविनोदितविश्वं गोपजनोचितवेषविलासम् ।
तुम्बुरुनारदगीतचरित्रं नौमि सदा वसुदेवसुतं तम् ॥

तत्त्वप्रकाशिका नाम्ना व्याख्या शौरिकथाश्रया ।
क्रियते नीलकण्ठेन श्रुतार्थपरिशुद्धये ॥

End :

श्रुतमपि गुरुमुख्याद्वक्तुमर्थं न दक्षो
बहुदिनमनुचिन्ताहानिदोषेण यः स्यात् ।
मनसि जनिततापं तस्य हातुं कृतेयं
महति यमककाव्ये वृत्तिरेषा स्फुटार्था ॥

मुक्तिस्थलोद्वसितो गिरिराजकन्या-
पादाब्जधूळिरनिशं निगमान्तमैत्री ।
गोविन्दभक्तिरसमंभृतिभुग्नकण्ठो
व्याख्यामिमां व्यरचयत् खलु नीलकण्ठः ॥

Colophon :

इतीशानसूनुनीलकण्ठपूज्यपादविरचितायां शौरिकथाव्याख्यायां तत्त्वप्रकाशिकायां षष्ठ आश्वासः समाप्तः । समाप्ता चेयं तत्त्वप्रकाशिकाव्याख्या ।

Author—Nīlakaṇṭhapūjyapāda.

Remarks—Another commentary designated Anvayabodhikā on the text is noticed under No. 3718, TCM. Vol. IV, Part I C.

## ॥ त्रिपुरदहनम् ॥

### 1775 A. TRIPURADAHANAM.

Substance—Palm leaf. Size—11″ × 1½″. Leaves—15. 7—8 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—275.

Subject—Annihilation of *Tripuras*.

Beginning :

वपुरतिगौरच्छायं जयति विभोरभिदधाति गौरच्छायम् ।
विषकटुकायेनाहिश्रेणी भूषणमिव स्वकायेनाहि ॥ १ ॥
येन च कालोऽलोपि स्मरं च निजघान योऽम्बिकालोलोऽपि ।
योऽस्थाद्विषमास्वाद्य स्वस्थः सुरततिषु जातविपमास्वाद्यः ॥ २ ॥
कुलिशं चक्रमुरसि स्थेयसि नृभुजो नयस्य चक्रमुरसि ।
स दहनविधुतो येन ह्युधरान्समरुन्मयेन विधुतो येन ॥

End :

सहितवनानलसोमस्फुरितात्क्षित्रितयचुम्बनानलसोमः ।
कुर्वन्नस्तत्रासौ लोकात्रपस ? त्रिलोचनस्तत्रासौ ॥
बबन्धुरे बबन्धुरे स्ववर्त्मनि स्थितिं जनाः ।
पिनाकिनापि नाकिनाममोदि मोदकारिणा ॥

Colophon :

इति त्रिपुरदहने तृतीय आश्वासः ।
त्रिपुरदहनं समाप्तम् ।

Author—Vāsudeva.

Remarks—The Ms. consists of 3 *Āśvāsas*. The leaves are damaged. The work is noticed as as No. 1852, TCM. Vol. II, Part C.

---

## ॥ नलोदयम् ॥

### 1775 B. NALODAYAM.

Substance—Palm leaf. Size—11″ × 1½″. Leaves—5.

10 lines per page and 40—56 letters per line. Script—Malayāḷam. No. of Granthas—150.

Subject—The story of Nala.

Beginning:

हृदय सदा यादवतः पापाटव्या दुरासदाया दवतः ।
अरिसमुदायादवतस्त्रिजगन्मा गाः स्मरेण दायादवतः ॥
योजनिनागोपीतश्चचार यो वल्लवाङ्गनागोपितः ।
भूर्येनागोपीतः कंसाद्यो द्वेषमेव नागोपीतः ॥

End:

मुदा मनारमायया नळोविहारमायया (?)
वधः कृतारमायया स्वयंवरादनन्तरम् ।
...महीमहीनधी ररक्ष नैषधस्तदा
रराज राजराजरा... ...॥

Colophon:

इति नळोदये द्वितीय आश्वासः ।

Author—Vāsudeva.

Remarks—In RCMPL. the work is attributed to Vāsudeva, as per colophon under No. 1795 but the colophon under No. 1798 identifies him with Ravideva. The following verse forming a part of the former colophon discloses that Vāsudeva was the son of Ravi:

" रवितनुभूयमितायाः कृतेर्गतिः शब्दचित्रभूयमितायाः ।
जनहासायमितायाः श्रियश्च विवृता मयाधुनायमितायाः ॥"

## ॥ त्रिपुरदहनम् ॥

## 1776. TRIPURADAHANAM.

Substance—Palm leaf. Size—8″ × 1½″. Leaves—18. 9 lines per page and 28 letters per line. Script —Malayāḷam. No. of Granthas—275.

Subject etc.—Same as No. 1775 A.

Remarks—The following portion occurs after the colophon :

"ഇതു് തെങ്ങുമൺപോററിയുടെ ചെറുക്കൻ മാതിക്കുട്ടി എഴുതിയതു. മേപ്പടി പോററിക്കു ഗ്രന്ഥം."

---

## ॥ दशमुखवधम् ॥

## 1777. DAŚAMUKHAVADHAM.

Substance—Palm leaf. Size—8″ × 1½″. Leaves—104. 8 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—1450.

Subject—The story of the destruction of Rāvaṇa.

Beginning :

हरिः । श्रीगणपतये नमः ।

णमह अवाङ्कियतुंगं अपसारिअवित्थअंअणोणअगाहिरम् ।
अप्पइह्नुअपरिसंक्नं अण।अपरमत्थपाअडं महुमहणम् ॥
दणुइन्दरुहिरलग्गजडन्धुरते णहं पहाविछड्डे (?) ।
गुप्पन्तीविवलाआगालि एन्वथणंसुहे महासुरलच्छी ॥

End:

काऊण असुरकज्जं रहुणाहविसज्जिएण कइअणपुग्दं ।
जलहरहुत्तअवयो सज्जाहि मुहो श्रीदरहोमाअलिणा ॥
खेत्तूणअजणअसुअंतंचणलरींव हुअवहम्मि विसुद्धं?ध(?)
पत्तो पुरिं रहुवरो काउम्भरंहमसल्फलं अणुराअं ॥

Colophon:

इअ दहमुहवहे छोडहो आमागो ।
समत्तो दहमुहवहो ।
एत्थ समप्पइएअं सीआलम्भेण जणिअहिअअं
(सुभ)अअ दहमुहवहत्ति कव्व अणुराअंकस्मअंणसुहणीं वोमाफि-
डिअं अक्खरसज्जाअं पंहिडि अवीदुवीलमंकाणि
बहसहिऊणसअइदो सपुणो ममाहतुसूगिणो कारुणिआ ॥
गणपइणो णमो । हरिहराविरिञ्चाणं णमो ।
इउणं तणं ससी मारेणोरामसवहरंसेणं मजमो (?) ।
अह्मेहि गुरुवसासुओ अलिहिदअ मो दहमुहस्स वहो ॥
रामाअ णमो कह्वाअ णमो ।

Author—Pravarasena.

Remarks—This work in Prākṛt is also designated Setubandha. It is printed with a commentary in the Kāvyamālā Series.

---

## ॥ दशमुखवधम् ॥

## 1778. DAŚAMUKHAVADHAM.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—112. 8 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—1350.

Subject : Beginning—Same as No. 1777.

End :

वेअवात्ति अविडवं ब्रुअळकईवि सुरहत्थिपग्गिमळसुरही ।
गअ मग्गळग्गभमरं पडिमोत्तपमा रिअं सुअं कप्पद्दुमं ॥

बोळं त जळहरं मवतोसे आमारजळळवं छेआणि ह्रो । आअम मग्गमिठिओधुअपिडपुं... ... ...

... ... ... ... ... ...

Colophon :

इअ चउद्दहो आमामो ।

Author—Same as No. 1777.

Remarks—The Ms. embodies 14 *Āśvāsas* only.

---

॥ दशमुखवधव्याख्यानम् ॥

## 1779. DAŚAMUKHAVADHAVYĀKHYĀNAM.

Substance—Palm leaf. Size—$13\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—116. 8 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—2300. Incomplete.

Subject—Elucidative exposition of the Daśamukhavadha.

Beginning :

पणमह मुहपहविणिहिअमणहरकमळं जअळळ वि अपसपत सड्डि एं कच ऊ उण्णामि एं कं विळा अणम...हु महण चिरविमह अकरअणाअरगहि अपं इं सणुम एळं धवा अद्धकं पमदरगिरि

गिरिणा पं कां मह कह्नकअं कवि अणदुंपरि अंळकिहाकिविकळं भणीं मि (?)

End :

प्लवगपतिरिति । कस्मिंश्चिद्र...(क?त)टे मणिशिलातले स्थितस्य रामस्य परिषदि स्थितः सुग्रीवः पश्चात् स्थितं वलितवदनोऽवोचत् ततो वलमाननिजदेह... .... ....

Colophon :

इकुमारगणं अमेरड्डे कण्णदास्मेन कण्
दह...वहि वक्खाण ओजसासु चउड्ढो रइ आमामो ॥

Author—Kṛṣṇadāsa.

Remarks—The commentary extends up to the 14th verse in the 8th *Aśvāsa*. A few leaves in the middle are missing.

---

## ॥ दशमुखवधव्याख्यानम् ॥

## 1780. DAŚAMUKHAVADHAVYĀKHYĀNAM.

Substance—Palm leaf. Size—21″ × 1½″. Leaves—74. 8 lines per page and 76 letters per line. Script—Malayāḷam. No. of Granthas—2800.

Subject—Same as No. 1779.

Beginning :

भीर त्वमेव सेतुं बधान तदा मलयसुवेलसमुद्रान्तम् अप्येवं यथा भवेयुः तथा यत्नं कुर्विति...तो इति । ततः प्लवगबलानि स्फुटं

विज्ञानप्रीत्याप्युक्तः सोऽपि प्लवगपतिः संभ्रमलोचनो भणन् ।
नल इति ।

End :

अत्र समाप्यते — एतत् सीतालाभेन जनितहृदयाभ्युदयं रावणवधमिति काव्यं अनुरागाङ्कं सकर्णसुखनिर्विशेषं आश्वासाव-सानेष्वनुरागाङ्कमेतत् काव्यमनुरागशब्दाङ्कितं रावणवधाख्यमेतत् काव्यमन्वर्थतया रावणवधमात्र एव समापितं कृतप्रबन्धांशमात्रे-ण सुखावहं सीतालाभश्रवणात् लोके कर्णसहितानां सर्वेषामपि हर्षजनकं चेति ।

Colophon :

इति सेतुव्याख्यायां पञ्चदश आश्वासः ।

द्वेति —दशमुखवधमिति काव्यं विश्रुतं निबन्धनं प्रवरसेन-
कविसर्वस्वम् ।

लिखितं रुद्रसुतेन मनोहरं रामनाथविजयस्तम्भम् ॥

दशमुखवधमिति काव्यं तस्य व्याख्यानमित्यत्राल्पं रुद्रसुतेन चक्रपाणिना लिखितम् ।

Author :

Remarks—The Ms. extends from the 19th verse in the 8th Āśvāsa up to the end of the 16th Āśvāsa.

---

## ॥ दुष्करमाला (विशदोपेता) ॥

### 1781. DUṢKARAMĀLĀ
with the commentary, Viśadā.

Substance—Palm leaf. Size—7″ × 1½″. Leaves—105.
17

6 lines per page and 26 letters per line. Script—Malayāḷam. No. of Granthas—1000.

Subject—A panegyric of Viṣṇu.

Beginning :

गणपतये नमः ।

लक्ष्मीशं ज्ञानदं विष्णुं प्रणम्यास्य प्रसादतः ।
व्याख्या दुष्करमालाया विशदाख्या वितन्यते ॥

अत्र षट्पदात्मिकायां दुष्करमालायां प्रकीर्णकपदं प्रथमं, प्रतिरूपकपदं द्वितीयं, प्रहेळिकाप्रश्नोत्तरपदं तृतीयं, यमकपदं चतुर्थं, नियतस्वरस्थानवर्णपदं पञ्चमं, प्रस्तारपदं षष्ठम् । एतेषु प्रकीर्णपदं व्याख्यायते ।

व्युत्पत्त्यर्थं च बालानां विनोदार्थं विपश्चिताम् ।
विद्या दुष्करमालाख्या विष्णुस्तुत्या वितन्यते ॥

सानुप्रासः— अनेन प्रारिप्सितस्य ग्रन्थस्य विषयप्रयोजने उच्येते ।

End :

वन्दे त्वां दुर्जयाम्निं कलिनिवहभिदामिष्टभूमाविशोभ-
ध्यानान्निष्कल्मषोऽहं मम भव शरणं कृत्यकालेषु सांशो ! ।
सद्भावा रक्षणस्वानतभवतु दृशा तारकेयं परा मा-
माभावद्यादमदसहभव्यं भद्रशोभा विभामा (?) ॥

अयं कविः काव्यनामस्वविशेषणस्वामिनामधेयनिकरश्लोकान्तरादिगर्भकाञ्चिष्मच्च(क्र)श्लोकः । वन्दे त्वां दुर्जयासिं दुर्जयनन्दकाख्यं खड्गं कलिनिवहभिदां कलिः कलहः चतुर्थयुगो वा तत्-

प्रभावभिदामिष्टभूमा विशोभं स्वमहिमानुरूपमौन्दर्यं ध्यानात् त्वदीयचरणक .... ... ... ...

Colophon :

इति शठमर्षणगोत्राभिजन भट्टवासुदेवात्मजसिंहस्वाम्यपरपर्यायदुर्गया विरचितायां दुष्करमालाख्यायां विशदायां प्रकीर्णकपदं प्रथमम् ।

इति दुष्करमालाख्यायां नियतस्वरस्थानवर्णनपदं समाप्तम् ।

Author—Siṃhasvāmī, son of Bhaṭṭavāsudeva.

Remarks—The work is composed in *Citrālaṅkāra* style.

---

## ॥ दुष्करमाला (विशदोपेता) ॥

### 1782. DUṢKARAMĀLĀ

with the commentary, Viśadā.

Substance—Palm leaf. Size—9″ × 2½″. Leaves—86. 11 lines per page and 17 letters per line. Script—Malayāḷam. No. of Granthas—1000.

Subject—Beginning : Same as No. 1781.

End :

ध्यानात् त्वदीयचरणयुगलध्यानात् निष्कल्मषः निष्कल्मषो भूत्वाहं वन्द इति सम्बन्धः । कृत्यजालेषु श्रौतस्मार्तकर्मकलापसमाराधित..सांशो सतेजस्क सद्धात्रा कल्याणस्वभावा श्रीर्विशेष्या रक्षणस्वा समाश्रितसंरक्षणधना नतं प्रणतं मामवतु । दृशा दृष्ट्या तारक संसारतारक ।

इयं परा श्रेष्ठा माम् आभावत्प्रभेव ।

अहं त्वदीयचरणकमलयुगलध्यानान्निष्कल्मषो भूत्वाहं त्वां वन्दे । त्वं च मम शरणं भव सद्भावा रक्षणस्वा परा तव प्रभेवावबोद्धया मद्रशोभापि भायामासेयं सभयन्नतं मां दृशा अवत्वित्यर्थः । प्रस्तारः ॥

Colophon :

इदं दुष्करमालाख्यं पुस्तकं नारायणनाम्ना केनचिद्वैष्णवेन लिखितम् ।

श्रीकृष्णाय परमात्मने नमः ।
शुभम् ।

Author—Same as No. 1781.

Remarks—Same as No. 1692.

---

॥ द्रौपदीस्वयंवरम् ॥

## 1783. DRAUPADISVAYAMVARAM.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—46. 5 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—350.

Subject—Description of the wedding of Draupadī.

Beginning :

हरिः । श्रीगणपतये नमः ।
त्रिलोकीशः शार्ङ्गी शंबर.... ...गंबद्
विधाता धातॄणामलभत शिरःकृन्तनमपि ।

लभेते व्यङ्गाहेर्दिनकरशशाङ्कौ कबळतां
प्रभुर्नग्नश्शम्भुश्शिरसि लिखितं लङ्घयति कः ॥

क्रीडाशैलः सुमेरुः परिचरणकृतः स्वस्त्रियः किंकरा वै
देवा वस्त्रौकसारा वसतिरनुचरास्सेश्वरा लोकपालाः ।
त्रैलोक्यैश्वर्यसारावलिविभवपदं स स्वयं वृत्रशत्रुः
प्राविक्षद्वैरिभीत्यापि य...रमहो व्यापदः कस्य न स्युः ॥

कृष्णा येन हृता मुकुन्दसहजा चाशा जिता चोत्तरा
दत्तं खाण्डवमग्नये बलभिदो वृष्टिर्निरुद्धा शरैः ।
कोदण्डाग्रनिपीडितः पशुपतिस्सोऽयं किरीटी जितो
व्याधैर्देहभृतां विपत्सु नियता वामा विधेर्वृत्तयः ॥

End :

अथ सदसि तदानीं पश्यतामेव राज्ञा-
मविदितपरमार्थं किञ्चिदाश्चर्यमासीत् ।
घटितकठिनगोधाग्रन्थिरुद्धप्रकोष्ठः
कवचमपि सरत्नं धारयामास पार्थः ॥

स्वपदमुपगतौ द्वौ तस्य पूर्णौ कलापौ
ज्वलदनलशिखानामक्षयाणामिषूणाम् ।
गुरुकुलचिरवासप्राप्तशिक्षाविशेष-
प्रचुरवचनशक्तीवावदूकाविवास्ताम् ॥

काञ्चिद्दशनबन्धा मेखलामुद्वहन्ती
कुवलयदळनीलश्यामळा चारुवंशा ।
सफुलितपरिवासासङ्गमस्याशु पार्श्वं
प्रथममसिलतेव प्राप पश्चात् कुमारीम् ॥

जगदविदितमार्गोत्कर्षसन्धानमोक्षैः
पुरुषवरपरीक्षालक्षणं पाण्डुसूनुः ।
स्फुटमिषुभिरलावीद्यज्ञसेनस्य लक्षं ।
हृदयमिव सुतायाः पञ्चभिः पञ्चबाणः ॥

Colophon :

Author :

Remarks—Same as No. 1692.

## ॥ धातुकाव्यम् ॥

## 1784. DHĀTUKĀVYAM.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 2''$. Leaves—29. 8 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—350.

Subject—Exposition of the inflected forms of verbal roots by means of a Kāvya.

Beginning :

महागणपतये नमः । अविघ्नेन परिसमाप्य... ...

(उदा)हृतं पाणिनिसूत्रमण्डलं प्राग्वासुदेवेन तदूर्ध्वतोऽपरः ।
उदाहरत्यद्य वृकोदरोदितान् धातून् क्रमेणैव हि माधवाश्रयात् ॥
स गान्दिनीभूरथ गोकुलैधितं स्पर्द्धालुधीगाधितकार्यबाधिनम् ।
द्रक्ष्यन् हरिं नाधितलोकनाथकं देधे मुदास्कन्दितमन्तरिन्द्रियम् ॥

भूसत्तायाम् । एधवृद्धौ । स्पर्ध सङ्घर्षे । गाधृ प्रतिष्ठालिप्सयोर्ग्रन्थे च । पुराप्यसौ विवन्दिषु(?) ।

End :

कलोरुकल्लोलकलिन्दजाजले त्रालैस्तुयभिस्सह देवनोत्सुम् (?)।

मल मल्ल धारणे । भल भल्ल परिभाषणहिंसाद... ...शब्दसंख्या-नयोः । कल्ल अव्यक्ते शब्दे । तेवृ देवृ देवने ।

.... ... ....मेव्यमब्ज भूग्लेव्यं सुरैः ।
पेप्यभमेप्यमुन्मदैः अम्लेपितं रेपितवत्ममण्डलीम् (?) ॥
... ....ग्भिराभीरजनैरसूक्ष्यकैः ।

षेवृ गेवृ श्लेवृ म्लेवृ म्लेवृ सेवने । रेवृ प्लवगतौ । सूक्ष्यं ईक्ष्यं ईर्ष्य ईर्ष्यार्थाः ।

राधाकृते(क्ष्र्या?र्ष्या)कलहावलोकना-
दीर्ष्यां हयन्त्या रमया प्रमोदितम् ।
प्रशुच्य सोमं कृतहर्यतैर्न्नतं
समालित . . . फुल्लसरोजमालया ॥

हय गतौ । भक्षि शुच्य अभिषवे । हर्य गतिकान्त्योः । ञिफला विशरणे ।

Colophon :

Author—Nārāyaṇabhaṭṭa.

Remarks—The work has been composed to supplement the Vāsudevavijaya of Vāsudevakavi. It is noticed with commentary as No. 11538, DCSM, Vol. XX.

## ॥ धातुकाव्यं (कृष्णार्पणोपेतम्) ॥

## 1785. DHĀTUKĀVYAM

with the commentary, Kṛṣṇārpaṇa.

Substance—Palm leaf. Size $-10\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—123. 9 lines per page and 36—40 letters per line. Script—Malayāḷam. No. of Granthas—2700. Incomplete.

Subject—Same as No. 1784.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

स्मरत हरेर्मधुरतरं
मुरलीनिनदामृतं हि शब्दमयम् ।
पदयुगलं च तदस्या
महिषारेर्मुक्तिनिलयवामिन्याः ॥

गुरुपादाब्जसंसेवानितान्तविमलाशयैः ।
सतीर्थ्यैरद्य लिख्यन्ते धातुकाव्यार्थयोजनाः ॥

अथ वासुदेवकविविरचितस्य काव्यरत्नस्य शेषपरिपूरणाय चिकीर्षितं प्रतिजानीते—

उदाहृतं पाणिनिसूत्रमण्डलं
प्राग्वासुदेवेन तदूर्ध्वतोऽपरः ।
उदाहरत्यद्य वृकोदरोदितान्
धातून् क्रमेणैव हि माधवाश्रयात् ॥

इति । वासुदेवेन प्राक् पाणिनिसूत्रमण्डलम् उदाहृतम् । अद्यापरः तदूर्ध्वतो धातून् उदाहरति इत्यन्वयः ।

End :

विपुदिति । पुच्छादिषु धात्वर्थ इत्येव सिद्धम् । पुच्छभाण्डचीवराण्णिङिति न वक्तव्यम् । प्रातिपदिकाद्धात्वर्थ इत्येव णिच्सिद्धेर्बहुलोक्त्यात्मनेपदसिद्धेश्च । तत्र पुच्छादुदसने पर्यसने व्यसने वेति णिङि ततः क्विप् चेति क्विपि पुतं छादयतीति पुच्छमिति व्युत्पत्त्या पुच्छशब्दस्य संयोगान्तलोपे तकारशेषाद्विपुदिति स्यात् । सम्भाण्डयमानेति । भाण्डात् समाचयन इति णिङि शानच् । सञ्चीवरिता इति । चीवरादार्जने परिधाने वेति णिङि कर्तरि क्तः ॥

Colophon :

इति श्रीकृष्णार्पणनाम्नि धातुकाव्यव्याख्याने तृतीयस्सर्गः ॥

निहत्य कंसं मधुरानगर्यां निवेश्य राजानमथोग्रसेनम् ।
सम्प्रेष्य नन्दं विजहार कृष्णस्तत्रैव रामेण महात्मगेहे ॥

श्रीवासुदेवाय नमः ।

൧൦൩൩-ാമാണ്ടു ആവണിമാസം ൨൦-ാനു രാമശാസ്ത്രികൾ എഴുതിതീർത്തതു്.

Author—Text : Same as No. 1784.

Remarks—The Ms. contains three *Sargas* only.

## ॥ धातुकाव्यम् (कृष्णार्पणोपेतम्) ॥

### 1786. DHĀTUKĀVYAM
with the commentary, Kṛṣṇārpaṇa.

Substance—Palm leaf. Size—14½″ × 1½″. Leaves—76. 10 lines per page and 58—64 letters per line. Script—Malayāḷam. No. of Granthas—2700. Incomplete.

Subject etc.—Same as No. 1785.

Remarks—The following lines occur after the colophon :

वन्देऽहं परमाशिवां बालारण्याधिवासिनीं द्विपामशिवाम् ।
नित्यं दुर्जननाशां यस्या...जहुर्जननाशाम् ॥
गोगणपालं गोपकिशोरैराहृतलीलं भूसुरनाथम् ।
श्यामलवर्णं कोमलदेहं नौमि सदाहं नन्दतनूजम् ॥
कल्पश्रेणिवासिना नीलकण्ठेन लिखितमिदं पुस्तकम् ।

श्रीकृष्णाय नमः ।
नमश्शिवाय ।

---

## ॥ धातुकाव्यम् (केरलभाषाव्याख्योपेतम्) ॥

### 1787. DHĀTUKĀVYAM
with Malayāḷam commentary.

Substance—Palm leaf. Size—9″ × 2½″. Leaves—186. 10 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—4100. Incomplete.

Subject—Same as No. 1784.

Beginning :

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।

स गान्दिनीभूरथ गोकुलैधितं
स्पर्धालुधीगाधितकार्यबाधिनम् ।
द्रक्ष्यन् हरिं नाधितलोकनाथकं
देधे मुदास्कन्दितमन्तरिन्द्रियम् ॥

अथ सः गान्दिनीभूः हरिं द्रक्ष्यन् अन्तरिन्द्रियं मुदास्कन्दितं देधे

അനന്തരം അഗ്ഗാന്ദിനീഭൂവ് ഹരിയെ ദ്രക്ഷ്യനാകഹേതുവായിട്ടു അന്തരിന്ദ്രിയത്തെ മുദാസ്കന്ദിതമായി ദധിച്ചു. ഗാന്ദിനീഭൂവ് അക്രൂരൻ. ഹരിഃ ശ്രീകൃഷ്ണൻ. ദ്രക്ഷ്യൻ ദർശിപ്പാൻ തുടങ്ങുന്നവൻ. അന്തരിന്ദ്രിയം മനസ്സ്. മുദാസ്കന്ദിതം മുദയിങ്കൽ സ്കന്ദിതം, മുദാ ആനന്ദം, സ്കന്ദിതം ആപ്ലുതം. ദധിക്ക വഹിക്ക. ഗോകുലൈധിതൻ ഗോകുലത്തിങ്കൽ ഏധിതൻ ഗോകുലം അമ്പാടി. ഏധിതൻ വർദ്ധിച്ചവൻ.

End :

ശ്രീകൃഷ്ണൻ വാസിതവിചാരം വാസിതമായിരിക്കുന്ന വിചാരത്തോടു കൂടി...തം വാസിതം ഛന്നം വിചാരം സംശയം. അതിപ്രഹരിക്ക ഏററവും താഡിക്ക. ച്യവിക്ക ഹസിക്ക.

कृष्णः अपि रोषान्ध्यभावितं तम् असृग्भिः अकल्पयत्

ശ്രീകൃഷ്ണനും രോഷാന്ധ്യ ഭാവിതനായിരിക്കുന്ന അവനെ അസൃക്കുകളെക്കൊണ്ടു കല്പിച്ചു. രോഷാന്ധ്യഭാവിതൻ രോഷാന്ധ്യംകൊണ്ടു ഭാവിതൻ. രോഷാന്ധ്യം രോഷംകൊണ്ടുള്ള ആന്ധ്യം. രോഷം കോപം. ആന്ധ്യം.

Colophon :

इति नारायणभट्टकृता वासुदेवविजयस्य कंसवधभागे द्वितीयस्सर्गः ।

Author—Same as No. 1784.

Remarks—The Ms. begins on a fragment of the third *Sarga*.

---

## ॥धातुकाव्यम् (केरलभाषाव्याख्योपेतम्) ॥

## 1788. DHĀTUKĀVYAM
### with Malayaḷam commentary.

Substance—Palm leaf. Size—$9\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—200. 7—9 lines per page and 26—30 letters per line. Script—Malayaḷam. No. of Granthas—2800. Incomplete.

Subject—Same as No. 1784.

Beginning—Same as No. 1787.

End :

പിശിതാശൻ രാക്ഷസൻ. ദാരുണൻ ക്രൂരൻ. ഹരിഷ്യൻ ഹരിപ്പാൻ തുടങ്ങുന്നവൻ. മോദം സന്തോഷം. നിശാ രാത്രി. നയിക്ക കഴിക്ക. മിള സംഗമം. മുച്ലൃ മോക്ഷണെ ലുപ്ലൃ, ഛേദനെ വിദ്ലൃ ലാഭെ. ലിപ ഉപദേഹെ. ഷിച ക്ഷരണെ. ഇവറ്റാട്ടം ഉഭയപദികൾ. കൃത ഛേദനെ. ഖിദ പരിഘാതെ. പിശ അവയവെ. പരസ്മൈപദികൾ. ശവികരണം കഴിഞ്ഞു.

Colophon :

इति नारायणकृतौ वासुदेवविजयस्य कंसवधभागे द्वितीयस्सर्गः ।

श्रीवेदव्यासाय नमः । श्रीकृष्णाय नमः । श्रीमद्गुरुवे नमः ।

Author—Same as No. 1787.

Remarks—The commentary on the first two *sargas* alone is seen in the Ms. The colophon as well as the introductory verse bears out that this work is also known by the designation, Vāsudevavijaya.

---

## ॥ धातुकाव्यम् (केरलभाषाव्याख्योपेतम्) ॥

### 1789. DHĀTUKĀVYAM
### with Malayāḷam commentary.

Substance—Palm leaf. Size—7″ × 1½″. Leaves—69. 7—8 lines per page and 26 letters per line. Script—Malayāḷam. No. of Granthas—825. Incomplete.

Subject—Same as No. 1784.

Beginning—Same as No. 1787.

End :

**प्रियाः असचितां प्रियां सपन्तः चेपुः** പ്രിയന്മാർ അസചിതയായിരിക്കുന്ന പ്രിയയെ സ്സപത്നുകളായിട്ടു ചപിച്ചു. പ്രിയന്മാർ കാന്തന്മാർ. അസചിത സചിതയാകാതെയിരിക്കുന്നവൾ. സചിക്ക സംശയിക്ക. പ്രിയ കാന്ത സപത്നുകൾ സംഗമിച്ചിരിക്കുന്നവൻ ചംപിക്ക അനുസരിക്ക.

**कळलापिनः शुकाः सन्ध्या इति रेपुः** കളലാപികളായിരിക്കുന്ന ശുകങ്ങൾ സന്ധ്യ എന്നിങ്ങനെ രവിച്ചു കളലാപികൾ കളമാകും വണ്ണം ലാപിക്ക. ശി... ... ... ... യായിരിക്കുന്ന പ്രിയയെസ്സപത്നുക്കളായിട്ടു ചപിച്ചു പ്രിയന്മാർ അസഹിത സഹിതയാകാതെ.

Colophon :

Author—Same as No. 1787.

Remarks—The Ms. contains the commentary on a portion of the 1st *Sarga*.

## ॥ नरकवधम् ॥

### 1790. NARAKAVADHAM.

Substance—Palm leaf. Size—$19\frac{1}{2}'' \times 2\frac{1}{2}''$. Leaves—36. 9 lines per page and 68 letters per line. Script—Malayāḷam. No. of Granthas—1400.

Subject—The story of the destruction of Narakasura.

Beginning :

**श्रीगणपतये नमः ।**

**स्वभूः स्वशक्तिप्रतिबन्धकारणः**
**सकारणानां जगतामधी(शिता ? श्वरः) ।**
**धियां पतिर्यो भुवनानि निर्ममे**
**हिरण्यगर्भः पुरुषः पुरातनः ॥**

**अनन्तभोगस्य सितस्य भोगिनः**
**स्वयोगमायाप्रलयान्तशायिनः ।**
**विवर्तनैर्यस्य बलाद्विवर्तते**
**नतोन्नतार्धं पृथुतो(ग)मण्डलम् ॥**

विशान्ति विश्वा यमजं विभूतयो
विभूतिमद्ब्रह्म यतः प्रतायते ।
मकारणं जन्मवतां सुजन्मता-
मवाप देवो वसुदेवसद्मनि ॥

समुद्रवेलाम्बुतरङ्गवेदिना
पुरस्कृता रैवतकेन भूभृता ।
ययौ पुरी द्वारवतीति नाम भो
निवासतान्तस्य जगन्निवासिनः ॥

End :

नाङ्गीवितान ममभिवीक्ष्य जहर्ष कृष्णः
शक्रोऽथ शौरिमनुमान्य......धाम ।
कर्णादयश्च यदवश्च ततः प्रतीताः
स्नेहात्ममेत्य विविशुर्नगरं यदूनाम् ॥

कृष्णो व्यसर्जयदथ प्रतिमान्य हार्दि-
क्यछत्रुन्तपं मगधचेदिपतिं वृषश्च ।
भ्रात्रे ततः प्रातिदिदेश च यज्ञवत्याः
.........ससुरगाद्विपरत्नकोशम् ॥
स्फीतं सराज्यमुपपाद्य पुनर्भ्रमाय
प्रीतो ददौ दुहितरं सुरयाथ कृष्णः ।
सर्वासु दिक्षु विजितं समवाप्य कामं
शार्ङ्गायुधः पितुरकामयदश्व...... ॥

... ... ... ...

... ... ... ...

... ... ... ...

फलवती सुहृदाश्च कृत्वा
विश्वास्य यो निरजरं पुरुषः पुराणः
शश्वज्जगत्सुपचकार शिवान्यनन्तान् ॥

Colophon :

इति नरकवधे विंशतिः सर्गः ।
इदं महाकाव्यं समाप्तम् ।

Author :

Remarks—The Ms. is much damaged.

॥ नलाभ्युदयम् ॥

1791. NALĀBHYUDAYAM.

Substance—Palm leaf. Size—10″ × 1¾″. Leaves—55. 6—10 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—550.

Subject—The story of Nala.

Author—Vāmana Bhaṭṭabāṇa.

Remarks—This work is printed as No. 3 in TSS. The leaves are much worn out.

॥ नलोदयम् ॥

1792. NALODAYAM.

Substance—Palm leaf. Size—7½″ × 1¼″. Leaves—29. 7 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—300.

Subject—Beginning: Same as No. 1775 B.

End:

मुदममुना मुक्तेन प्राप स राज्यं महात्मनामुक्तेन ।
धृतनानामुक्तेन प्राशासि नलेन विघटनामुक्तेन ॥

अरिसंहतिरस्य वनेषु शुचां पद(पद?)मापदमापदमापदमा ।
सुखदश्च जनाय यथैव हरिं यतमायतमायतमायतमा ॥

नलेन पुर्युतायतायतायता चिराय सा मदा ।
सदयमुन्महामहामहामहास्तमम्पदम् ॥

Colophon:

इति नलोदये चतुर्थ आश्वासः ।
श्रीकेशवाय नमः, श्रीवासुदेवाय नमः, श्रीकृष्णाय नमः ।

Author—Same as No. 1775 B.

Remarks—The following verses occur after the colophon:

समानतायमानयासमानतायमानया
समानतायमानयासमानतायमानया ।
नयावलानयावलानयावलानयावला
नयावलानयावलानयावलानयावला ॥

घनं विदार्यार्जुनबाणपूगं
ससार बाणोऽयुगलोचनस्य ।
घनं विदार्यार्जुनबाणपूगं
ससारबाणो युगलोचनस्य ॥

विकासमीयुर्जगदीशमार्गणा
विकासमीयुर्जगदीशमार्गणाः ।
नासुरो यन्नवाभोगोधरासंस्थो हि राक्षसः ।
नासुरो यन्नवाभोगो धरासंस्थो हि राक्षसः ॥
श्रीमत्परशुरामाय नमः ।

---

## ॥ नलोदयम् ॥

## 1793. NALODAYAM.

Substance—Palm leaf. Size—11″ × 1¾″. Leaves—16. 8 lines per page and 38 letters per line. Script—Malayāḷam. No. of Granthas—300.

Subject—Beginning : Same as No. 1775 B.

End—Colophon : Same as No. 1792.

Author—Remarks : Same as No. 1775 B.

---

## ॥ नलोदयम् ॥

## 1794 A. NALODAYAM.

Substance—Palm leaf. Size—13½″ × 2″. Leaves—11. 8 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas—275.

Subject—Beginning : Same as No. 1775 B.

End etc. : Same as No. 1792.

## ॥ नलोदयव्याख्या ॥

### 1794 B. NALODAYAVYĀKHYĀ.

Substance—Palm leaf. Size—$13\frac{1}{2}'' \times 2''$. Leaves—4. 8—12 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—140.

Subject—Elucidation of the Nalodaya.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

हृदय सदा यादवतः पापाटव्याः दुरसदायाः दवतः अरिसमुदायात् अवतः त्रिजगत् मा गाः स्मरेण दायादवतः । हे हृदय ! हे चेतः ! सदा असकृत् यादवतः यदुवंशसंभूतात् कृष्णादित्यर्थः। पापाटव्याः दुरासदायाः दुर्धषायाः दवतः वनात् अरिसमुदायात् शत्रुसङ्घाद् अवतः पालयतः स्मरेण मन्मथेन दायादवतः पुत्रवतः प्रद्युम्नपुत्रादित्यर्थः । हे हृदय दुरासदायाः पापाटव्याः दवतः अरिसमुदायाश्रितात्.. अवता स्मरेण दायादवतः यादवतः सदा मा गाः इत्यन्वयः ।

End:

इह नलः अक्षमोत् । यानेन स नलः स्मरशरनिकरासहिष्णुः स अनेन शोभनोद्यानेन इनप्रभाभिर्हीनेन सूर्यातपरहितेन सान्द्रछायेन स्मरजा कामसंभवा आर्त्तिः पीडा न न नोद्या बाध्येयव(?) नः अस्माकं स्फुटं स्पष्टमित्येव सङ्कल्प्य इह अस्मिन्नुद्याने विषयभूते यानेन रथादिना गतिं यात्रामतनोत् कृतवान् ॥

Colophon:

Author:

Remarks—The Ms. is old and worn out. A few leaves are left blank in the middle.

---

## ॥ कल्याणसौगन्धिकम् ॥

### 1794 C. KALYĀṆASAUGANDHIKAM.

Substance—Palm leaf. Size—$13\frac{1}{2}'' \times 2''$. Leaves—5. 7 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—90. Incomplete.

Subject—Same as No. 1494.

Beginning—Same as No. 1495.

End:

विद्या....एष भीमस्तस्य कपीश्वरस्य कदलीवनमुपसर्पति । तदस्य निकटवर्तिमणिशिलातलमिममासीनावविज्ञातपरस्परयोः प्रभावान्तर्हितौ चेष्टितमवगम्य तदनुरूपमुपसर्पावः ।

अपि च—

शुष्यद्दन्तच्छदकिसलयं तान्तताम्रायताक्षं
स्वेदैः किञ्चिल्लुलिततिलकं गण्डयोर्बद्धरागम् ।
वक्त्रं जालैर्ग्लपितमदयैस्तिग्मभासः प्रभा... ...
.... .... .... ... .. . .... ॥

Colophon:

Author—Same as No. 1494.

Remarks—The leaves are much damaged.

---

## ॥ नळोदयम् (विवरणोपेतम्) ॥

## 1795. NALODAYAM with Vivaraṇa.

Substance—Palm leaf. Size—$12\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—56. 8—10 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—1500.

Subject—Same as No. 1792.

Beginning :

हरिः । श्रीगणपतये नमः ।

श्रिये स्तात् स्वप्रभं धाम तद्वो विश्वावभासकम् ।
प्रवर्तन्तेऽखिलोद्भूतिस्थितिसंहृतयो यतः ॥
प्रणम्यादौ गणाधीशं वाग्देवीं च यथागमम् ।
नलोदयस्याल्पधिया व्याख्यैषा क्रियते मया ॥

इह शब्दवैचित्र्यप्रकाशपरे काव्ये गहनार्थव्यत्तयर्थत्वासम्भवत्वा दुष्करपदच्छेदविधावस्मत्सधर्मणामल्पप्र(ज्ञां?ज्ञानां) येषां केषाञ्चिद्यदा कदाचिद्यः कश्चिदुपकारः स्यादित्येवमर्थोऽयमस्मदुद्यमो, न तु वैदग्ध्यविद्योतनाय इत्येवं विदुषा सदास्मिन्कर्मणि तितिक्षितव्यं प्रारिप्सितस्य ग्रन्थस्यादौ तावदविघ्नेन परिसमाप्त्यर्थं प्र... यार्थं च शिष्टाचारादभीष्टदेवतां प्रणमति हृदयेत्यादिश्लोकचतुष्केण—

हृदय सदा यादवतः
पापाटव्या दुरासदाया दवतः ।
अरिसमुदायादवतः
त्रिजगन्मा गाः स्मरेण दायादवतः ॥

पदच्छेदः—हृदय सदा यादवतः पापाटव्याः दुरासदाया दवतः अरिसमुदायात् अवतः त्रिजगत् मा गाः स्मरेण दायादवतः । अर्थः—हे हृदय मनः सदा सार्वकालं यादवतः यदुवंशे प्रादुर्भूतात् परस्मात् पुंसो मा गाः मा गमः । इणो (माङि?गा) लुङीति गादेश-स्सिज्लोपाडागमप्रतिषेधेषु रूपम् । कीदृशात् पापाटव्याः दुरासदाया दवतः विपिनवदतिदुर्गमस्यानेकजन्मसञ्चितस्य दावदहना(?) दवश-ब्दो वनवनानलयोर्वर्त्तते । यथा दावाग्निरटवीं भस्मसात् करोति तथा भक्तानामघौघं हरिरप्युन्मूलयतीति प्रसिद्धं ... ...

... ... ... ... ... ...

... ... ... ... ... ...

End :

नलेन पूर्यतायतायताग्रता चिराय सा ।
सदायमुन्महा महामहामहास्त संपदम् ॥

नलेन पूः यतायता आग्रत आग्रता चिराय सा सदा अयं उन्महाः महामहां अहास्त सम्पदम् । सा पूः स्वनगरी यतायता नष्टा संयतलोका आयता आयामवती नलेन चिरायायत दीर्घका-लं प्राप्ता । अयं नलः उन्महाः उदिततदीप्तिः सन् महामहां अखिला-खिललोकविहि(त)विशिष्टोत्सवां सदा नित्यशः अहास्तसम्पदं सम्यक् प्रजाः परिपाल्य परस्पराविरोधेन धर्मार्थकामानाप्नुवन् सर्वसम्पत्समृद्धस्सन् सुखं स्वपुरमध्यासीत् (?) । इत्यभ्युदयान्तात् पुंण्याख्यानकथामुपसंहृतवान् कविरिति मङ्गलसिद्धरनया सर्वेषां सुखं भवेदिति ।

Colophon :

इति नलोदये कालिदासकृतौ चतुर्थः परिच्छेदः ।

रवितनुभूयमितायाः
  कृतेर्गतिश्शब्दचित्रभूयमितायाः ।
जनहसना यमिताया
  धियश्च विवृता मयाधुनायमितायाः ॥

श्रीगुरुभ्यो नमः ।

൧൦൨൧-ാമാണ്ട് ധനു ൭-ാം൹ എഴുതി തീർത്തു.

Author—Text : Vāsudeva.

Com : Viṣṇu.

Remarks—The Ms. is in fairly good condition.

---

## ॥ नलोदयम् (विवरणोपेतम्) ॥

### 1796. NALODAYAM with Vivaraṇa.

Substance—Palm leaf. Size—12″ × 1½″. Leaves—80. 8—9 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—1500.

Subject—Beginning—End : Same as No. 1792.

Colophon :

इति नलोदयविवरणे चतुर्थः परिच्छेदः ।

रवितनुभूयमितायाः
  कृतेर्गतिश्शब्दचित्रभूयमितायाः ।
जनहासायमिताया
  धियश्च विवृता मयाधुनायमितायाः ॥

आदित्यवर्मण इदम् ।

Author—Same as No. 1795.

Remarks—The leaves are much worn out. The last Fol. is missing.

---

## ॥ नलोदयम् (विवरणोपेतम्) ॥

## 1797. NALODAYAM with Vivaraṇa.

Substance—Palm leaf. Size—15″×2″. Leaves—48. 8 lines per page and 60 letters per line. Script—Malayāḷam. No. of Granthas—1500.

Subject etc —Same as No. 1792.

Remarks—The Ms. is old and damaged. The following four verses are cited immediately after the colophon:

नलोदयाख्यकाव्यस्य व्याख्येयं चक्रपाणिना ।
लिख्यते स स्वपुत्रेभ्यो रुद्रपादाब्जसेविना ॥

चिन्तामन्तरचिन्तनीयविभवां धत्ते सृजत्यायतां
निश्वासानथ भूयते (?) परिमृशत्यापीतदीर्घान् भुजान् ।
भूयः कम्पयते शिरांसि हसति व्यक्तप्रमोदाङ्कुरं (?)
वैदेही विमुखीति दीप्तमदनस्तापेन लङ्केश्वरः ॥

पार्थः पाण्डुसुतः सखा मुरारिपोरग्रेसरो धान्विनां
पाञ्चाल्या दयितः शतक्रतुसमः शौर्येण धैर्येण च ।

सोऽयं पञ्चशरेण विद्धहृदयस्सम्मूढधीर्दृश्यते
पाषाणप्रतिमेव निश्चलतया ध्यायन्मुहुर्माधवीम् ॥

मदनधनञ्जयदग्धो
धनञ्जयो माधवीलतागेहे ।
तिष्ठन्मुररिपुसहजां
ध्यायन् वः पातु यतिवेषः ॥

स्वजनमपि कुप्यति चिरा-
दनवसरज्ञेन याचितः सुहृदा ।
सुरतान्तरे रुदन्तं
सुतमपि सुचिरं ... ...रहो जननी ॥

---

## ॥ नलोदयव्याख्या ॥

## 1798. NALODAYAVĀKHYĀ.

Substance—Palm leaf. Size—14″ × 2″. Leaves—92. 10 lines per page and 46 letters per line. Script—Malayāḷam. No. of Granthas—2650.

Subject—Explication of the Nalodaya.

Beginning :

श्रीगणपतये नमः । अविघ्नमस्तु ।
अग्रनिर्भिण्णमेघौघविद्युत्पिङ्गसटाछटा ।
दिगन्तरसुरान्वेषिबाहुं नरहरिं भजे ॥
नलोदयाख्यकाव्यस्य सागरस्येव नौरियम् ।
विष्णुनाम्नावगाहाय व्याक्रिया क्रियते मया ॥

वक्ष्ये पदार्थं प्रथमं पदानामन्वयं ततः ।
पश्चादन्वितवाक्यार्थमित्यत्र ज्ञायतां क्रमः ॥

प्रथमं तावत् कविः काव्यमारब्धुकामस्तस्याविघ्नपरिसमाप्तये स्मृतिमात्रेण सकलदुरितहारिणि भगवति भक्तवत्सले वासुदेवे हृदयं प्रति परममवधानमाशास्ते हृदयेति । हृदय सदा सर्वदा यादवतः यदुवंशसमुद्भूतात् वासुदेवात् ।

End :

आयस्य भावः आयता आयता दीर्घा आयतायता महानाममकस्य (?) भाव इति यावत् । महस्तेजः उत्कृष्टं महो यस्य सः उन्महः तेजस्वीत्यर्थः । महामहां महं कल्याणं महान्महो यस्याः सा महामहा महाकल्याणवतीत्यर्थः । तां महामहां अहास्त ओहाङ् गतौ । सम्पदं अभ्युदयं नैषधेन स्वपुरि पुरेव आयतायता अतायत उन्महा असौ नलः सदा महा महा महां (?) सम्पदमहास्त नैषधेन नलेन यस्य नगर्यां श्रीरितस्ततो विस्तृता अतितेजस्वी चायं नलः महतीमुपर्य्युपरि काल्यावती? सम्पदं प्राप्तवानिति ।

Colophon :

इति रविदेवविरचितनलोदयाख्यस्य महाकाव्यस्य विष्णुना विरचिते व्याख्याने चतुर्थ आश्वासः ॥ काव्यं च समाप्तम् ॥

Author—Viṣṇu.

Remarks—A few leaves at the beginning are missing. For further information refer to the remarks under No. 1775 B.

## ॥ नळोदयव्याख्या ॥

## 1799. NALODAYAVYĀKHYĀ.

ubstance—Palm leaf. Size—11″×1¾″. Leaves—117. 8 lines per page and 40—50 letters per line. Script—Malayāḷam. No. of Granthas—2650.

ubject etc.—Same as No. 1798.

---

## ॥ नळोदयव्याख्या ॥

## 1800. NALODAYAVYĀKHYĀ.

ubstance—Palm leaf. Size—14″×2″. Leaves—33. 10—11 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—1050.

ubject—Beginning: Same as No. 1798.

End:

यतोयतः इत्यादि । यतो यतः यस्माद्यस्माद्देशात् यतः गतः गच्छतः रवेः सूर्यस्य मरीचिसञ्चयः किरणसमूहः महाकारसमूहः अन्धकारसमूहः ततस्ततः तस्मात्तस्मात् देशात् विस्तृतः ततः पश्चाद् यतो रवेर्मरीचिसञ्चयः यतो यतो पश्चात् महान्धकारसञ्चयः ततस्ततः ततः अस्तं गच्छतः यस्य किरणसमूहो यस्माद्यस्माद्देशादपगतः तस्मात्तस्मादन्धकारसमूहोऽपि पश्चाद्विस्तृतः । छादितेत्यादि छादितरविच्छादितस्ति.... .... ....

Colophon :

Author—Same as No. 1798.

Remarks—The 27th fol. is missing.

---

## ॥ नवसाहसाङ्कचरितम् ॥

## 1801. NAVASĀHASĀṄKACARITAM.

Substance—Palm leaf. Size—18″ × 1″. Leaves—64. 7 lines per page and 58—64 letters per line. Script—Grantha. No. of Granthas—1750.

Subject—The story of Navasāhasāṅka.

Beginning :

अव्यात्स वो यस्य निसर्गवक्रः
स्पृशत्यधिज्यः स्मरचापलीलाम् ।
जटापिनद्धोरगराजरत्न-
मरीचिलीढोभयकोटिरिन्दुः ॥

चूडाभिरत्नद्युतिपाटलोऽव्यात्
स वः शशी शङ्करमौलिरत्नम् ।
श्रुत्वाव व? यशोकाङ्कुरकौतुकेन
यं वक्तुमिच्छत्यचलेन्द्रकन्या ॥

कुम्भस्थली रक्षतु वो विनिर्यत्-
सिन्दूररेणुर्द्विरदाननस्य ।
प्रशान्तये विघ्नतमश्छटानां
निष्ठ्यूतबालातपपल्लवेन ॥

End :

असिताञ्जनाङ्कमभिजातकुवलयदृशां दृशोन्तरात् ।
नीरमहृतेन (?) हिमशुचिमतां तदवृत्तिराश्रितकलङ्कमार्जने ।
तरलोर्मिलङ्घितनितम्बफलकलुलिताच्छवाससः ।
फेनवलयमसिताब्जदृशः क्षणमेकमंशुकविलासमादधे ॥
सुदृशः स्फुटं नवनखाङ्कमुरसि जलधौतकुङ्कुमे ।
का.... .... .... ....

Colophon :

इति परिमळस्य कृतौ नवसाहसाङ्कचरिते पातालावलोकनो नाम चतुर्दशोऽध्यायः (सर्गः ?)

Author—Parimala.

Remarks—The Ms. contains 15 *Sargas* only. It is available in print.

---

## ॥ निगमजपमहोत्सवशतकम् ॥

## 1802. NIGAMAJAPAMAHOTSAVAŚATAKAM.

Substance—Palm leaf. Size—$4\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—17. 10 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas—175.

Subject—Glorification of *Murajapam*.

Beginning :

हरिः । श्रीगणपतये नमः ।
अविघ्नमस्तु ।

सूर्येन्दू मज्जतोऽब्धौ प्रतिदिनमवनीशौजसा तेजसा ते
सन्तप्तौ सन्त्यशब्दाः शरदि तव वचोभीरवो नीरदाश्च ।

अम्भोधिः कम्पते च प्रलपति तत्र गाम्भीर्यनष्टात्मवीर्य-
स्त्यक्त्वाब्धिं तेऽभिवृद्ध्यै फणिपुरि निवसत्यम्बुजाक्षः सलक्ष्मीः ॥

राजन् राजीवचक्षुःपुरि पुरटलसत्स्तम्भकुम्भोज्ज्वलायां
नागागाराह्वयायां निगमजपमहत्पूज्यमाहोत्सवो यः ।
सर्वेभ्यश्चापि वर्वर्त्युपरि पुरुगुणः कल्यकल्याणकीर्त्तिं
तत्तुल्यो नोत्सवोऽन्यो जगति तदुदयं को नु शक्तः प्रवक्तुम् ॥

End :

यथाप्सु चन्द्रः स्रजि वा यथाहिः
स्वप्ने परत्वं कनके बहुत्वम् ।
तथा त्वयीदं परिभाति विश्वं
मुकुन्दमूर्त्ते भगवन्नमस्ते ॥

श्रुतिर्विभो देव भवत्कथायां
मनो भवत्पादसरोरुहे च ।
दृष्टिः शरीरे भवतो मुरारे
सदास्तु मे केशव पद्मनाभ ॥

Colophon :

Author :

Remarks—The *Murajapam* festival lasting for 56 days is celebrated in the Śrī Padmanābhasvāmikṣetra at Trivandrum once in 6 years.

---

## ॥ नीतिशतकम् ॥

### 1803. NĪTIŚATAKAM.

Substance—Palm leaf. Size—8" × 1½". Leaves—9.

8 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—125.

Subject—Same as No. 1757.

Beginning :

व्यालं बालमृणालतन्तुभिरसौ रोद्धुं समुज्जृम्भते
भेत्तुं वज्रमणिं शिरीषकुसुमप्रान्तेन सन्नह्यते ।
माधुर्यं मधुबिन्दुना रचयितुं क्षाराम्बुधेरीहते
मूर्खान् यः प्रतिनेतुमिच्छति बलात् सूक्तैः सुधास्यन्दिभिः ॥

स्वायत्तमेकान्तहितं विधात्रा
विनिर्मितं छादनमज्ञतायाः ।
विशेषतः सर्वविदां समाजे
विभूषणं मौनमपण्डितानाम् ॥

End :

जातः कूर्मः स एकः पृथुभुवनभरायार्पितं येन पृष्ठं
श्लाघ्यं जन्म ध्रुवस्य भ्रमति नियमितं यत्र तेजस्विचक्रम् ।
सञ्जातव्यर्थपक्षाः परहितकरणे नोपरिष्टान्न चाधो
ब्रह्माण्डोदुम्बुरान्तर्मशकवदपरे जन्तवो जातनष्टाः ॥

तृष्णां छिन्धि भज क्षमां जहि मदं पापे रतिं मा कृथाः
सत्यं ब्रूह्यनुयाहि साधुपदवीं सेवस्व विद्वज्जनान् ।
मान्या... ... ... ....

Colophon :

Author—Bhartṛhari.

Remarks—A few leaves are missing at the beginning and end.

## ॥ नैषधीयचरितम् ॥

## 1804. NAIṢADHĪYACARITAM.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—87. 10 lines per page and 36—40 letters per line. Script—Malayāḷam. No. of Granthas—2050.

Subject—The story of Naḷa.

Beginning:

निपीय यस्य क्षितिरक्षिणः कथा-
स्तथाद्रियन्ते न बुधाः सुधामपि ।
नलः सितच्छत्रितकीर्त्तिमण्डलः
स राशिरासीन्महसां महोज्ज्वलः ॥

रसैः कथा यस्य सुधावधीरिणी
नलः स भूजानिरभूद् गुणाद्भुतः ।
सुवर्णदण्डैकसितातपत्रित-
ज्वलत्प्रतापावलिकीर्त्तिमण्डलः ॥

End:

विराध्य दुर्वाससमस्खलद्दिवः
स्रजं त्यजन्नस्य किमिन्द्रसिन्धुरः ।
अदत्त तस्मै स मदच्छलात् सदा
यमभ्रमातङ्कतयैव वर्ष्मकम् ॥

मदान्मदग्रे भवताथवा भिया
परं दिगन्तादपि यात जीवत ।
इति स्म यो दिक्करिणः स्वकर्णयो-
र्विनैव वर्णस्रजमागतैर्गतैः ॥

अधत्त बीजं निजकीर्त्तये रदौ
द्विषामकीर्त्यै खलु दानविग्रुषः ।
श्रवः श्रमैः कुम्भ ...... ......

Colophon :

श्रीहर्षं कविराजराजिमकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
यातः पञ्चदशः कृशेतररसास्वादाविहायं महा-
काव्ये तस्य कृतौ नलीयचरिते सर्गो निसर्गोज्ज्वलः ॥

Author—Śrī Harṣa.

Remarks—The Ms. embodies 16 *Sargas* only. This work is printed in NSPB.

---

## ॥ नैषधीयचरितम् ॥

### 1805. NAIṢADHĪYACARITAM.

Substance—Palm leaf. Size—14″ × 1¾″. Leaves—30. 10 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—1000.

Subject—Beginning: Same as No. 1804.

End :

यान् वरं प्रति परेऽर्थयितार-
स्तेऽपि यं वयमहो स पुनस्त्वम् ।
नैव नः खलु मनोरथमात्रं
शूर पश्य दिशोऽपि यशोभिः ॥

अर्थितां त्वयि गतेषु सुरेषु
म्लानदानजनिजोरुयशःश्रीः ।
अद्य पाण्डु गगनं सुरशाखी
केवलेन कुसुमेन विभर्त्ताम् ॥

प्रवसते भरतार्जुनवैन्यव......... ।

Colophon :

श्रीहर्षं कविराजराजिमकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
तुर्यः स्थैर्यविचारणप्रकरणभ्रातर्ययं तन्महा-
काव्येऽत्र व्यगलन्नलस्य चरिते सर्गो निसर्गोज्ज्वलः ॥

Author—Same as No. 1804.

Remarks—The Ms. extends up to the end of the 5th *Sarga*.

---

## ॥ नैषधीयचरितम् ॥

### 1806. NAIṢADHĪYACARITAM.

Substance—Palm leaf. Size—19″ × 1¾″. Leaves—16. 10 lines per page and 95 letters per line. Script—Malayāḷam. No. of Granthas—900.

Subject—Beginning : Same as No. 1804.

End :

इष्टं नः प्रति ते प्रतिश्रुतिरभूद्याद्य स्वराह्लादिनी
धर्मार्थाः सृजतां श्रुतिप्रतिभटीकृत्यान्विताख्यापदाम् ।

त्वत्कीर्त्तिः पुनती पुनास्त्रिभुवनं शुभ्राद्वयादेशनाद्
द्रव्याणां सितपीतिलोहितहरिन्नामान्वयं लुम्पतु ॥

यं प्रासूत सहस्रपादुदभवत् पादेन खञ्जः कथं
स च्छायातनयः सुतः किल पितुः सादृश्यमन्विच्छति ।
एतस्योत्तरमद्य नः समजनि त्वत्तेजसां लङ्घने
साहस्रैरपि .... .... .... .... .... .... ॥

Colophon—Author—Remarks : Same as No. 1805.

---

## ॥ नैषधीयचरितम् ॥

### 1807. NAIṢADHĪYACARITAM.

Substance—Palm leaf. Size—7″ × $1\frac{1}{2}$″. Leaves—78.
7—9 lines per page and 20—32 letters per line.
Script—Malayaḷam. No. of Granthas—950.

Subject—Beginning: Same as No. 1804.

End:

ईदृशीं गिरमुदीर्य बिडौजा
जोषमाप न विशिष्य बभाषे ।
नात्र चित्रमभिधाकुशलत्वे
शैशवावधि गुरुर्गुरुरस्य ॥

अर्थिनामहृषिताखिलरोमा
स्वं नृपः स्फुटकदम्बकदम्बम् ।
अर्चनार्थमिव तच्चरणानां
स प्रणामकरणादुपनिन्ये ॥

Colophon—Author—Remarks: Same as No. 1805.

---

## ॥ नैषधीयचरितम् ॥

### 1808. NAIṢADHĪYACARITAM.

Substance—Palm leaf. Size—7″ × 1¾″. Leaves—48. 8—11 lines per page and 30 letters per line. Script—Grantha. No. of Granthas—875.

Subject—Beginning: Same as No. 1804.

End:

दुर्लभं दिगधिपैः किममीभि-
स्तादृशं कथमहो मदधीनम् ।
ईदृशं मनसिकृत्य विरोधं
नैषधेन समशायि चिराय ॥

जीवितावधि वनीपकमात्रै-
र्याच्यमानमखिलैः सुलभं यत् ।
अर्थिने परिवृढाय सुराणां
किं वितीर्य परितुष्यतु चेतः ॥

भीमजा च हृदि मे परमास्ते
जीवितादपि धनादपि गुर्वी ।
न स्वमेव मम नार्हति यस्याः
षोडशीमपि कलां किल नोर्वी ॥

Colophon—Author—Remarks: Same as No. 1805.

## ॥ नैषधीयचरितम् ॥

### 1809. NAIṢADHĪYACARITAM.

Substance—Palm leaf. Size—5″ × 1½″. Leaves—57. 7 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas — 400. Incomplete.

Subject—Beginning : Same as No. 1804.

End :

भ्रमणरयविकीर्णस्वर्णभासा खगेन
    क्वचन पतनयोग्यं देशमन्विष्यताधः ।
मुख...मदसीयं सेवितुं लम्बमानः
    शशिपरिधिरिवोर्ध्वं मण्डलस्तेन तेने ॥

अनुभवति शचीत्थं सा घृताचीमुखाभि-
    र्न सह सहचरीभिर्नन्दनानन्दमुच्चैः ।
इति मतिरुदयासीत् पक्षिणः प्रेक्ष्य भैमीं
    विपिनभुवि सखीभिः सार्धमाबद्धखेलाम् ॥

Colophon :

श्रीहर्षं कविराजराजिमकुटालङ्कारहीरः सुतं
    श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
द्वैतीयीकतया मितोऽयमगमत्तस्य प्रबन्धे महा-
    काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥

Author—Same as No. 1804.

Remarks—The Ms. contains only the first two *Sargas*.

## ॥ नैषधीयचरितम् ॥

## 1810 A. NAIṢADHĪYACARITAM.

Substance—Palm leaf. Size—$9\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—9. 10 lines per page and 32—40 letters per line. Script—Malayāḷam. No. of Granthas — 200. Incomplete.

Subject—Beginning : Same as No. 1804.

End :

न जातरूपच्छदजातरूपता
  द्विजस्य दृष्टेयमिति स्तुवन्मुहुः ।
अवादि तेनाथ स मानसौकसा
  जनाधिनाथः करपञ्जरस्पृशा ॥

धिगस्तु तृष्णातरलं भवन्मनः
  समीक्ष्य पक्षान्मम हेमजन्मनः ।
तवार्णवस्येव तुषारशीकरै-
  र्भवेदमीभिः कमलोदयः कियान् ॥

न केवलं प्राणिवधो वधो मम
  त्वदीक्षणाद्विश्वासितान्तरात्मनः ।
विगर्हितं धर्मधनैर्निबर्हणं
  विशिष्य विश्वासजुषां द्विषामपि ॥

पदे पदे सन्ति भटा रणोद्भटा
  न तेषु हिंसारस एष पूर्यते ।
धिगीदृशं ते नृपते कुविक्रमं
  कृपाश्रये यः कृप . . . . . . ॥

Remarks—The Ms. extends up to verse 132 in the first *Sarga*.

---

## ॥ श्रीरामाष्टोत्तरशतनामस्तोत्रम् ॥

## 1810 B. ŚRĪRĀMĀṢṬOTTARAŚATA-NĀMASTOTRAM.

Substance—Palm leaf. Size—$9\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—3. 7 lines per page and 20—28 letters per line. Script—Malayāḷam. No. of Granthas—30.

Subject—A panegyric of Śrī Rāma.

Beginning:

प्रीत्यर्थं जानकीभर्तुर्हरेरद्भुतकर्मणः ।
वदाम्यष्टाधिकं नाम्नां शतं दशमुखद्विषः ॥

श्रीरामो रामभद्रश्च रामचन्द्रश्च शाश्वतः ।
राजीवलोचनः श्रीमान् राजेन्द्रो रघुपुङ्गवः ॥

जानकीवल्लभो जैत्रो जितामित्रो जनार्दनः ।
विश्वामित्रप्रियो दान्तः शरण्यत्राणतत्परः ॥

वालिप्रमथनो वाग्मी सत्यवाक् सत्यविक्रमः ।
सत्यव्रतो व्रतधरः सदा हनुमदाश्रयः ॥

कौसलेयः खरध्वं(सी) विराधवधपण्डितः ।
जामदग्न्यमहादर्पदलनस्ताटकान्तकृत् ॥

End :

कल्पकोटिसहस्राणि कल्पकोटिशतानि च ।
वैकुण्ठे वासमाप्नोति दशपूर्वैर्दशापरैः ॥
रामं दूर्वादलश्यामं पद्माक्षं पीतवाससम् ।
स्तुवन्ति नामभिर्दिव्यं न ते संसारिणो नराः ॥
रामाय रामभद्राय रामचन्द्राय वेधसे ।
रघुनाथाय नाथाय सीतायाः पतये नमः ॥
इमं मन्त्रं महादेवि जपन्नेव दिवानिशम् ।
मुच्यते सर्वपापेभ्यो विष्णुसायुज्यमाप्नुयात् ॥
दिष्या सं (?)

Colophon :

इत्येतद्रामचन्द्रस्य नाम्नामष्टोत्तरं शतम् ।
कथितं तव... ...भक्तस्त्वं वैष्णवोत्तमः ॥
गुरवे नमः ।

Author :

Remarks—Same as No. 1692.

---

## ॥ नैषधीयचरितम् ॥

## 1811. NAIṢADHĪYACARITAM.

Substance—Palm leaf. Size—$16\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—4. 11 lines per page and 64 letters per line. Script—Grantha. No. of Granthas—175.

Subject—Same as No. 1804.

Beginning:

अधिगत्य जगत्यधीश्वरादथ मुक्तिं पुरुषोत्तमात्ततः ।
वचसामपि गोचरो न यः स तमानन्दमविन्दत द्विजः ॥
अधुनीत खगः स ...तनुमुत्फुल्लतनूरुहीगताम् ।
करयन्त्रणदन्तुरान्तरे व्यलिखच्चञ्चुपुटेन पक्षती ॥
अय... .... ... ... ...ङ्घ्रिणा ।
स्खलनक्षण एव शिश्रिये द्रुतकण्डूयितमौलिरालयम् ॥
स गरुद्वनदुर्गदुर्ग्रहान् कटुकीटान् दशतः सतः क्वचित् ।
.... ... ... ... .... ... ...द्गुनेः ॥

End:

व्यर्थीकृतं पत्ररथेन तेन
तथावसाय व्यवसायमस्याः ।
परस्परासर्पितहस्तताल
तत्कालमालीभिरहस्यतालम् ॥

उच्चाटनीयः करतालिकानां
दानादिदानीं भवतीभिरेषः ।
यान्वेति मां द्रुह्यति मह्यमेव
सात्रेत्युपालम्भि तयालिवर्गः ॥

Colophon:

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
द्वैतीयिकतया मितोऽयमगमत्तस्य प्रबन्धे महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥

Author—Same as No. 1804.

Remarks—Most of the leaves are worn out. The Ms. extends from the beginning of the 2nd *Sarga* and ends with the 7th verse in the third.

---

## ॥ नैषधीयचरितम् ॥

## 1812. NAIṢADHĪYACARITAM.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—119. 10 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—1750.

Subject—Same as No. 1804.

Beginning:

विष्टरं तटकुशालिभिरद्भिः पाद्यमर्घ्यमथ कच्छरुहाभिः ।
पद्मवृन्दमधुभिर्मधुपर्कं स्वर्गसिन्धुरदितातिथयेऽस्मै ॥
स व्यतीत्य वियदन्तरगाधं नाकनायकनिकेतमवाप ।
सम्प्रतीर्य भवसिन्धुमनादिं ब्रह्म शर्मभरचारु यतीव ॥
अर्चनाभिरुचितोच्चतराभिः साधु तं सदकृतातिथिमिन्द्रः ।
यावदर्हकरणं किल साधोः प्रत्यवायधुतये न गुणाय ॥

End:

तपति जगत एष मूर्ध्नि भूत्वा
रविरधुना त्वमिवाद्भुतप्रतापः ।
पुरमथनमुपास्य पश्य पुण्यै-
रधरितमेनमनन्तरं त्वदीयैः ॥

आनन्दं परमाहरन्निव हरध्यानार्चनादीक्षण-
स्यासक्तावपि भूपतिः प्रियतमाविच्छेदखेदालसः ।

पक्षद्वारदिशं प्रति प्रतिमुहुर्द्राङ्गनिर्गतप्रेयसी-
प्रत्यावृत्तिधिया दिशं दशमसौ निर्गन्तुमुत्तस्थिवान् ॥

Colophon :

श्रीहर्षं कविराजराजिमकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
अन्याक्षुण्णरसप्रमेयभणितौ विंशस्तदीये महा-
काव्येऽयं व्यगलन्नलस्य चरिते सर्गो निसर्गोज्वलः ॥

Author—Same as No. 1804.

Remarks—The Ms. begins from the 6th verse in the fifth *Sarga* and ends with the 20th *Sarga*.

---

## ॥ नैषधीयचरितम् ॥

### 1813. NAIṢADHĪYACARITAM.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 2''$. Leaves—25. 8—9 lines per page and 33 letters per line. Script—Grantha. No. of Granthas—425.

Subject—Same as No. 1804.

Beginning :

तं विदर्भरमणीमणिसौधा-
द्दुर्जिहानमनुदर्शितसेवैः ।
अर्पणान्निजकरस्य नरेन्द्रै-
रात्मनः करदता पुनरूचे ॥

तस्य चीनसिचयैरपि बद्धा
पद्धतिः पदयुगात्कठिनेति ।
तां व्यधत्त शिरसां खलु माल्यै-
राजराजिरभितः प्रणमन्ती ॥

End :

लावण्येन तवाखिलेन वदनं तत्पात्रमात्रस्पृशा
चन्द्रः प्राञ्चनलब्धतधर्मलिनेनारम्भिशेषेण यः ।
तल्लेखापि शिखामणिः सुषमयाहंकृत्य शंभोरभू-
दब्जं तस्य पदं यदस्पृशदतः पद्मं च सद्यः श्रियाः ॥

Colophon :

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
तस्यागादयमेकविंशगणनः काव्येऽतिरम्ये कृतौ
भैमीभर्तृचरित्रवर्णनमये सर्गो निसर्गोज्वलः ।

Author—Same as No. 1804.

Remarks—The Ms. begins on the 21st *Sarga* and ends on verse 145 in the 22 sarga.

---

## ॥ नैषधीयचरितम् ॥

### 1814. NAIṢADHĪYACARITAM.

Substance—Palm leaf. Size—11″ × 1¾″. Leaves—103. 7—9 lines per page and 36—45 letters per line. Script—Malayāḷam. No. of Granthas—2050.

Subject—Same as No. 1804.

Beginning :

. . . . . . . . . . . .

संपदो विपद एव विसृष्टाः ।
पात्रपाणि कमलार्पणभासां
तासु शान्तिकविधिर्विधिदृष्टः ॥

तद्विमृज्य मम संशयशिल्पि-
स्फीतमत्र विषये सहसाघम् ।
भूयतां भगवतः श्रुतिसारै-
रद्य वाग्भिरघमर्षणऋग्भिः ॥

End :

स्वर्भानुप्रतिवारपारणमिलद्दन्तौघयन्त्रोद्भव-
श्वभ्रालीपतयालुदीधितिसुधासारस्तुषारद्युतिः ।
पुष्पेष्वासनतत्प्रियापरिणयानन्दाभिषेकोत्सवे
देवः प्राप्तसहस्रधारकलशश्रीरस्तु नस्तुष्टये ॥

+ + + + +

दिशिदिशि गिरिग्रावाणः स्वां वमन्तु सरस्वतीं
तुलयतु मिथस्तामापातस्फुरद्ध्वनिडम्बरम् ।
स परमपरः क्षीरोदन्वान्यदीयमुदीयते
मथितुरमृतं खेदच्छेदि प्रमोदनमोदनम् ॥

Colophon :

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।

द्वाविंशो नवसाहसाङ्कचरिते चम्पूकृतोऽयं महा-
काव्य तस्य कृतौ नळीयचरिते सर्गो निसर्गोज्वलः ॥

श्रीगुरुभ्यो नमः । श्रीवेदव्यासाय नमः ।

Author—Same as No. 1804.

Remarks—The Ms. contains *Sargas* 5—9 and 14—22 only. Many leaves are missing in the middle.

---

## ॥ नैषधीयचरितम् ॥

## 1815. NAIṢADHĪYACARITAM.

Substance—Palm leaf. Size—11″ × 2″. Leaves—17. 9 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—300.

Subject—Same as No. 1804.

Beginning:

यावदागमयतेऽथ नरेन्द्रान्
स स्वयंवरमहाय महीन्द्रः ।
तावदेव ऋषिरिन्द्रदिदृक्षु-
र्नारदस्त्रिदशधाम जगाम ॥

End:

अथ प्रियासादनशीलनाद्यौ
मनोरथः पल्लवितः पुरा यः ।
विलोकनेनैव स राजपुत्र्याः
पत्या भुवः पूर्णवदभ्यमानि ॥

प्रतिप्रतीकं प्रथमं प्रियाया-
मथान्तरानन्दसुधासमुद्रे ।
ततः प्रमोदाश्रुपरम्परायां
ममज्जतुस्तस्य दृशौ नृपस्य ॥

Colophon :

श्रीहर्षं कविराजराजमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
षष्ठः खण्डनखण्डनोऽपि सहजात् क्षोदक्षमे तन्महा-
काव्येऽयं व्यगळन्नळस्य चरिते सर्गो निसर्गोज्ज्वलः ॥

Author—Same as No. 1804.

Remarks—The Ms. begins from the 5th *Sārga* and ends with a fragment of the 7th *Sarga*.

---

## ॥ नैषधीयचरितम् ॥

### 1816. NAIṢADHĪYACARITAM.

Substance—Palm leaf. Size—$14\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—86. 7—8 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas—2000.

Subject—Same as No. 1804.

Beginning :

... ....णाद्वयवादिनी सा
काचिद् द्विजेनोपनिषत्पिकेन ।
अस्याः किमास्याद्द्विजराजतो वा
नाधीयते भैक्षभुजा तरुभ्यः ॥

पद्माङ्कसद्मानमवेक्ष्य लक्ष्मी-
मेकस्य विष्णोः श्रयणात्सपत्नीम् ।
आस्येन्दुमस्या भजते जिताब्जं
सरस्वती तद्विजिगीषया किम् ॥

End :

कामिनीवर्गसंसर्गैर्नरः सम्क्रान्तपातकः ।
नाश्नाति स्नाति हा मोहात्कामक्षामव्रतं जगत् ॥
ईर्ष्यया रक्षतो नारीर्धिक्कूलस्थितिदाम्भिकान् ।
स्मरान्धत्वाविशेषेऽपि तथा नरमरक्ष(तः) ॥

Colophon—Same as No. 1813.

Author—Same as No. 1804.

Remarks—The first 68 leaves are missing- *Sargas* 7—17 are embodied in this Ms.

---

## ॥ नैषधीयचरितम् ॥

### 1817. NAIṢADHĪYACARITAM.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—10. 7 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—125.

Subject—Beginning : Same as No. 1804.

End :

विचिन्वतीः पान्थपतङ्गहिंसनै-
रपुण्यकर्माण्यलि(कज्जलच्छ)लात् ।

ञ्य. . . .क. . .ककोरकावली:
म शंव. . . .वेलिदी. . .इव ॥

अमन्यतामी कुसुमेषुगर्भजं
परागमन्धंकरणं. . . .नाम् ।
. . .क्तेपु. . .रा पुरारये
तदङ्गभस्मेव शरेषु. . . ॥

Colophon :

Author—Same as No. 1804.

Remarks—The work extends up to the 88th verse in the 1st *Sarga.* The leaves are much worn out.

---

## ॥ नैषधीयचरितम् (जीवातुसाहितम्) ॥

## 1818. NAIṢADHĪYACARITAM with Jīvātu.

Substance—Palm leaf. Size—11″ × 2″. Leaves—43. 10 lines per page and 34 letters per line. Script—Malayāḷam. No. of Granthas—900.

Subject—Same as No. 1804.

Beginning :

त्रेण पापशोधनी । सा कीर्तनात् किमुतेति कैमुत्यन्यायेन शो.... कत्वोक्तेरर्थापत्तिरलङ्कारः । "एकस्य वस्तुनो भावाद्यत्र वस्त्वन्यथापतेत् । कैमुत्यन्यायतस्सा स्यादर्थापत्तिरलङ्क्रिये"ति लक्षणात् ।

अधीतिबोधाचरणप्रचारणै-
दशाश्चतस्रः प्रणयन्नुपाधिभिः ।
चतुर्दशत्वं कृतवान् कुतः स्वयं
न वेद्मि विद्यासु चतुर्दशस्वयम् ॥

अथास्य पूर्वोक्तं गुणाद्भुतत्वं प्रपञ्चयति अधीतीत्यादिभिः । अयं नलः चतुर्दशसु चतुर्दशसंख्याकासु विद्यासु ।

End :

मदर्थसन्देशमृणाळमन्थरः
प्रियः कियद्दूर इति त्वयोदिते ।
विलोकयन्त्या रुदतोऽथ पक्षिणः
प्रिये स कीदृग्भविता तव क्षणः ॥ ॥ ३७ ॥

अथ भार्यां शोचति । मह्यामिमे मदर्थाः मदर्थे अर्थेन सह नित्यसमासः सर्वलिङ्गता च वक्तव्या । तयोस्सन्देशमृणाळयोर्वाचिकबिसयोर्मन्थरस्तन्प्रेक्षणे विळम्बितप्रवृत्तिः प्रियः कियद्दूरे कियति दूरदेशे वर्तत इति त्वयोदिते उक्ते पृष्टे सतीत्यर्थः । अथ प्रश्नानन्तरं रुदतः अनिष्टोच्चारणगत्याश्रूणि विमुञ्चतः पक्षिणः खगान् विलोकयन्त्यास्तव सः क्षणः स कालः कीदृग्भविता भविष्यति तव वज्रपातप्राय इति भावः । कर्तरि लुट् ।

कथं विधातस्तव पाणिपङ्कजा-
न्मयि प्रियाशैत्यमृदुत्वशिल्पिनः ।

... ... ... ...

... .... .... ...

Colophon :

Author—Text : Same as No. 1804.
Com : Mallinātha.

Remarks—Verses 3—13 in the opening *Sarga* are commented upon in this Ms. The work is available in print. Several errors are noticeable herein.

---

## ॥ नैषधीयचरितम् (पदवाक्यपञ्चिकोपेतम्) ॥

### 1819. NAIṢADHĪYACARITAM with Padavākyapañcikā.

Substance—Palm leaf. Size—25½″ × 2¼″. Leaves—132. About 8 lines per page and 68 letters per line. Script—Malayāḷam. No. of Granthas—4500.

Subject—Same as No. 1804.

Beginning:

पाश्च. . . . . . . . . . . . . . . .दायाः . . . . .पहारकः तद्बृहतोः करपल्योश्चोरदेवतयोस्सुद्दतलोपश्च। ततोऽपराधाद्धेतोः शोभनो राजा भीमो. . . . .भमण्डले विदर्भदेशे. . . . . .लद्धादशराजके च देशे चण्डिमत्वे च कदंके चेति विश्वः। तौ वरवधूकरौ कर्कशैः परुषैः कुशैः बद्धौ संयतौ किमु राजन्वति देशे सापरा- . . . . . . . .न्ताविवाहे हि वधूवरयोः करौ कुशैर्बध्नन्तीति देशविशेपाचारः ।

विदर्भजायाः करवारिजेन य-
न्नलस्य पाणेरुपरि स्थितं किल ।

विशङ्कय सूत्रं पुरुषायितस्य तद्
भविष्यतोऽस्मायि तदा तदालिभिः ॥

नलस्य पाण्योरुपरि विदर्भजाया दमयन्त्याः करेणैव वारिजेन यत् किल स्थितं भावे क्तः तत् स्थितं तदा तस्मिन् समये तस्या दमयन्त्या आलीभिर्भविष्यतः पुरुषायितस्य दमयन्तीसंबन्धिनः उपरिसुरतस्य पुरुषशब्दस्य उपमानादाचारे कर्तुः क्यङ् । अकृत्-सार्वधातुकयोर्दीर्घः । भावे क्तः । सूत्रं सूचनाग्रन्थं 'सूत्रं तु सूचनाग्रन्थे सूत्रंतन्तुव्यवस्थयो'रिति विश्वः । विशंकयास्मायि स्मितम् । भावे लुङ् ।

End:

ऊर्ध्वस्ते रदनच्छदः स्मरधनुर्बन्धूकमालामयं
मौर्वी तत्र तवाधराधरतटाधस्सीमरेखालता ।
एषा वागपि तावकी ननु धनुर्वेदः प्रिये मान्मथः
सोऽयं कोणधनुष्मतीभिरुचितं वीणाभिरभ्यस्यते ॥

ननु प्रिये दमयन्तिके तवोर्ध्वो रदनच्छदः ओष्ठो बन्धूकमालामयं स्मरस्य कामस्य धनुस्तत्र धनुषि तवाधराधरस्याधस्तनोष्ठस्य तदधस्सीम्नि रेखालता मौर्वी ज्या तावक्येषा वागपि मान्मथो मन्मथसम्बन्धी धनुर्वेदः कोणधनुष्मतीभिर्वादनधनुर्युक्ताभिः वीणाभिस्सो. . . .अभ्यस्येत उचितं युक्तम् ।

स ग्राम्यस्स विदग्धसंसदि सदा गच्छे. . .ज्ञेयतां
तश्च स्प्रष्टुमपि स्मरस्य विशिखा मुग्धे विगानोन्मुखाः ।
यः किं मध्विति नाधरं तव कथं हेयेति. . . .
कीदृङ्नामसुधे. . . . .च्छति न ते गिरश्चोत्तरम् ॥

... ...हेम... ... ...

... ... त्तरणं... ... ...

Colophon :

इत्याचार्यविश्वेश्वरसूरिविरचितायां नैषधचरितटीकायाम् अष्टादशस्सर्गः समाप्तः ।

Author—Text : Same as No. 1804.

Com : Viśveśvarasūri.

Remarks—The commentary commences on the 15th verse in the 16th *Sarga* and ends on the 158th verse in the 21st. The closing verses of *Sargas* 19 and 20 are missing. The leaves are much damaged.

---

## ॥ पतञ्जलिचरितम् ॥

### 1820. PATAÑJALICARITAM.

Substance—Palm leaf. Size—10″ × 2″. Leaves—69. 6—8 lines per page and 32 letters per line. Script—Grantha. No. of Granthas—950. Complete.

Subject—Description of the birth of Patañjali.

Beginning :

अस्ति श्रियश्चन्द्रमसस्सुधायाः
कल्पद्रुमाणां च पिता पयोधिः ।
रुन्धन् समन्ताद्वलयं धरण्या
दधाति यः स्वच्छदुकूललीलाम् ॥

End :

गोविन्ददेशिकमुपास्य चिराय भक्त्या
......स्थिते निजमहिम्नि विदेहमुक्त्या ।
अद्वैतभाष्यमुपकल्प्य दिशो विजित्य
काञ्चीपुरे स्थितिमवाप स शङ्करार्यः ॥

गोविन्दस्य प्रतिकुलगुरोस्सिद्धिमाकर्ण्य क.....
...कर्तव्यं तदपि वररुच्यादयो भ्रातरस्ते ।
स्वे स्वे कर्मण्यवहितधियो विद्यया कीर्तिमन्त-
श्चत्वारोऽपि स्थितिमभिमतामुज्जयिन्यामकुर्वन् ॥

Colophon :

इति श्रीयज्ञरामदीक्षितपुत्रस्य रामभद्रयज्वनः कृतौ पतञ्जलिचरितेऽष्टमः सर्गः ॥

पतञ्जलिचरितकाव्यं समाप्तम् ।

Author—Rāmabhadrayajvā.

Remarks—The work is printed in NSPB.

---

## ॥ पदभेदिनी (युधिष्ठिरविजयव्याख्या) ॥

### 1821. PADABHEDINĪ.

Commentary on Yudhiṣṭhiravijaya.

Substance—Palm leaf. Size—14″ × 2″. Leaves—30. 9 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—875.

Subject—Elucidation of the Yudhiṣṭhiravijaya.

Beginning :

श्रीगणपतये नमः । अविघ्नमस्तु ।

स्वस्ति श्रीगुरुगणपौ प्रणम्य पदभेदिनिनाम्ना ।
यमकयुधिष्ठिरविजयव्याख्यास्माभिर्विरच्यते तनुशः ॥
कर्तृकर्मक्रियायोगस्सर्वत्रेह प्रकाश्यते ।
द्रष्टव्या तु यथायोगं तद्विशेषेण योजना ॥

कविः स्वचिकीर्षितस्यास्य ग्रन्थस्याविघ्नपरिसमाप्त्यादिप्रयोजनसिद्धये विशिष्टेष्टदेवतानुस्मरणपूर्वकमाशिषं प्रयुङ्क्ते—प्रदिशत्वित्यादिना ।

End :

जपविधिं समापयन्नित्यन्वयः । इति अवदातेने अवदातः उदिततया स्वच्छः इनः आदित्यो यस्मिन्निति । समये काले जिष्णुना अर्जुनेन आदरवत् आदरयुक्तं शङ्कयुक्तेनेति वा । तेने कृतवान् । स . . . . . .
. . . . . . . . . . . . ।

Colophon :

इति युधिष्ठिरविजयव्याख्यायां पदभेदिन्यां प्रथम आश्वासः ।

Author :

Remarks—The Ms. begins on a fragment of the 2nd *Āśvāsa*.

## ॥ पद्भेदिनी (युधिष्ठिरविजयव्याख्या) ॥

### 1822. PADABHEDINĪ.

Commentary on Yudhiṣṭhiravijaya.

Substance—Palm leaf. Size—19″ × 2¼″. Leaves—17. 8 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—450. Incomplete.

Subject—Same as No. 1821.

Beginning:

आनिरूपितम् आगमनं यस्याः सा । तथा अलमत्यन्तम् । अरमिति वा । श्रितगङ्गाद्वारा नागसु . . . तमपार्थं . . . . . . . . . . . . . . . सीदित्यन्वयः । वारा अङ्गात् अंहांसि नुदन्तमिति सम्बन्धः । स च कामनया कामेच्छया कामवतीति कामने व्युत्पत्त्या इरावतीविशेषणम् । बीभत्सुः ।

End:

उपजीव्यविपत्तौ तत्परित्यागेनान्यत्र नमनशीललक्षणम् । अलिनामभूदिति भावः । ... .... ... ... .... ... ....प्रमदा दध्युः । निरूपितवत्या विपदं तावत् ततः पूर्वं... ... ....विंभूमेरुपरि अव्य. . . पदस्थानं सपदि तत्क्षणा . . . ... ... ... ... ... ... ...

Colophon :

Author :

Remarks—Same as No. 1821.

## ॥ पद्वाक्यपञ्चिका ( नैषधीयटीका) ॥

## 1823. PADAVĀKYAPAÑCIKĀ.

Commentary on Naiṣadhīya.

Substance—Palm leaf. Size—$20\frac{1}{2}'' \times 2\frac{1}{2}''$. Leaves—201. 9—10 lines per page and 72—88 letters per line. Script—Malayāḷam. No. of Granthas—11800.

Subject—Elucidation of the Naiṣadhīya.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

नमस्यामि कलानाथं कलाकलितशेखरम् ।
जटावल्लीसमुल्लासिप्रसूनमिव शेखरम् ॥
... ... ... ...
... ... ... ... ... ॥
तस्मै नमस्त्रिलोकैकरत्नदीपाय शम्भवे ।
अनन्यापेक्षमस्तोकं नित्यं जयति यन्महः ।
श्रीहर्षस्य कवेः काव्यं वर्णैश्चित्ररसान्वितैः ।
व्याख्यातूलिकयास्माभिर्व्यक्तमुन्मीलयिष्यते ।

महाकाव्यमारभमाणः कविराशीरादिष्वन्यतमेन भवितव्यमिति तथा नायकं वस्तु निर्दिशति । यदाहुः—

End :

नवसाहसाङ्कस्य नूतनविक्रमादित्यस्य चरिते चम्पूं गद्यपद्यवाणीं करोति, यस्तस्य तादृशस्य तस्य श्रीहर्षस्य कृतौ नलीयचरिते महाकाव्ये निसर्गोज्ज्वलोऽयं द्वाविंशस्सर्गो गतस्समाप्तः ।

श्रीहर्षात् कविराजतः कृतिरभूत्सा कापि लोकोत्तरा
यस्याः खेलनभूर्मनीषिहृदयप्रासादशृङ्गस्थली ।
नेपथ्यस्य विधिर्नवार्थघटनास्सख्यो रसव्यक्तयः
शीलं शब्दनयः स्वयम्वरपतिश्चैष स्वयं नैषधः ॥

Colophon:

इत्याचार्यविश्वेश्वरभट्टविरचितायां नैषधचरितटीकायां पदवाक्यपञ्चिकायां द्वाविंशस्सर्गः समाप्तः ।

कृष्णाय वासुदेवाय देवकीनन्दनाय च ।
नन्दगोपकुमाराय गोविन्दाय नमो नमः ॥
पत्राणि पात्राणि रसान्तराणां सप्ताधिका सप्ततिरीडितानि ।
शतद्वयेड्यानि षडात्मजस्य चरित्रटीका दरभाजितानि ॥

Author—Viśveśvarabhaṭṭa.

Remarks—The Ms. is much injured.

---

## ॥ पदवाक्यपञ्चिका (नैषधीयटीका) ॥

### 1824. PADAVĀKYAPAÑCIKĀ.

Commentary on Naiṣadhīya.

Substance—Palm leaf. Size—$17\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—134. 10 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—5350.

Subject—Beginning: Same as No. 1823.

End:

दमयन्त्याश्चत्वारः प्रहराः यामा अपि सा क्षपा रात्रिस्त्वरार्त्तिभिर्वेगदुःखैः क्षपा दुरतिवाहाभूत् तत्तस्मात्कारणात् तस्यां दमयन्त्यां

कृपया हेतुन्त (?) विधिना अखिलैव रात्रिः त्रयो यामा यस्यां सा त्रियामा कृता । तदखिलमिति । त्रयाणां भुवनानां समाहारस्त्रि-भुवनम् ।

Colophon:

इति नैषधचरितटीकायां पदवाक्यार्थपञ्जिकायां अष्टमस्सर्गस्समाप्तः ॥

Author—Same as No. 1823.

Remarks—The Ms. begins on a fragment of the 9th *Sarga.*

---

## ॥ पद्वाक्यपञ्चिका (नैषधीयटीका) ॥

## 1825. PADAVĀKYAPAÑCIKĀ.

Commentary on Naiṣadhīya.

Substance—Palm leaf. Size—$23\frac{1}{2}'' \times 2''$. Leaves—118. 8 lines per page and 96 letters per line. Script—Malayāḷam. No. of Granthas—5650. Incomplete.

Subject—Same as No. 1823.

Beginning—Same as No. 1824

End:

ते तं परिचारकमागतं कश्चिन्नायकं राजानमेव यथा......चन प्रकारेणाज्ञासिषुर्ज्ञातवन्तः तेषां महीभुजां परिचारके सेवकेऽपि विलासः शृङ्गारचेष्टा च वैदग्ध्यं चातुर्यं च हि भूषणानि कटक-

कुण्डलादीनि च तेषां.......स्समृद्धिस्ते तथा । तेन प्रकारेण.....
अस्वेद्....त्रा इति ॥

Colophon :

इति नैषधचरितटीकायां नवमस्सर्गः ॥

Author—Same as No. 1823.

Remarks—The commentary extends up to the 10th *Sarga*.

---

## ॥ पद्वाक्यपञ्चिका (नैषधीयटीका) ॥

### 1826. PADAVĀKYAPAÑCIKĀ.

Commentary on Naiṣadhīya.

Substance—Palm leaf. Size—$18\frac{1}{2}'' \times 2''$. Leaves—190. 7—10 lines per page and 64 letters per line. Script—Grantha. No. of Granthas—6080.

Subject—Same as No. 1823.

Beginning :

..ग्निप्राकारपरिवृतं पत्तनं नगरं बाणासुरपत्तनमग्निप्राकारपरिवृत-
मिति प्रसिद्धिः । प्रसह्य बलाद्यथा वेशितः प्रवेशितः खलु । उषाहरणो-
पाख्यानमत्रानुसन्धेयम् । तथा नलेन राज्ञावरुद्धं अवष्टब्धं विदर्भ-
जाया दमयन्त्या मनः कर्म भोगभोजिना स्रक्चन्दनादि......

End :

........विलासवति दमयन्ति अस्य वरुणस्य पुनः नावाहि-
नी नदी सम्पन्नैः सप्रस्रवणैः प्रवणैः प्रवाहैस्सघनैः प्रातिकूल्यात्र

कूलस्य पतनं न तनुते न करोति नाम............तन्तनुं ततस्या-
वाहन्या याः (?) कर्कशतां कार्कश्यं श्रिताः प्रासास्तासिततापाद् वृता
बहुतया बाहुल्येन हेतुना कथं वयं ब्रूमः.... .... ..... ....

Colophon :

इत्याचार्यविश्वेश्वरविरचितायां पददीपिकायां द्वादशः सर्गः ।

Author—Same as No. 1823.

Remarks—The first 7 leaves are missing. The Ms. contains 12 *Sargas* only.

---

## ॥ पदवाक्यपञ्चिका (नैषधीयटीका) ॥

### 1827. PADAVĀKYAPAÑCIKĀ.

Commentary on Naiṣadhīya.

Substance—Palm leaf. Size—14″ × 2″. Leaves—29. 8 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—700.

Subject—Same as No. 1823.

Beginning

हरिः । तामिति । विदर्भरमण्या वैदर्भ्या मणिसौधान्मणिमय-
प्रासादादुज्जिहानं निर्गच्छन्तं तं नलमनु तं प्रति तस्मै दर्शित-
सेवैरित्यर्थः । अनोर्लक्षणार्थे कर्मप्रवचनीयत्वं तद्योगाद् द्वितीया ।
नरेन्द्रैः निजकरस्यार्पणात् स्वहस्ता........ ।

End:

उपास्येत्यादि । धराया भूमेरिन्द्रो नलः सान्ध्यं विधिमुपास्य अनुष्ठायान्तिमाशायाः प्रतीच्या रागेण लौहित्येन हेतुना कान्ताया दमयन्त्या अधरं चुम्बति स्मरति यत्तच्चेतो यस्य (?) तादृशस्सन् सप्तमे भूमिभागे भैम्या दमयन्त्या धरन्धराकं सौधं प्रासादमेव धरं पर्वतमवाप्तवान् । "धराख्या कथिता भूमौ शैले कार्पासतूलयो" रित्यजयः । प्रासादादि द्वितलादि (ताः का) द्वादश(द?त)लपर्यन्ता ॥

Colophon:

इत्याचार्यविश्वेश्वरसूरिविरचितायां नैषधदीपिकायां एकविंशतिस्सर्गः ।

Author—Same as No. 1823.

Remarks—The Ms. contains the 21st *Sarga* and a fragment of the 22nd.

---

## ॥ पदार्थचिन्तनम् (युधिष्ठिरविजयव्याख्या) ॥

### 1828. PADĀRTHACINTANAM.

Commentary on Yudhiṣṭhiravijaya.

Substance—Palm leaf. Size—14″ × 2″. Leaves—89. 9—12 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—3600.

Subject—Explication of the Yudhiṣṭhiravijaya.

Beginning:

. . . . . . . . . . . .

इति प्रथमोऽर्थः । अपिच गिरिश इति गिरिरिव गिरिः मनः निश्चलत्वादुन्नतत्वाद् दृढ... .... . . .

णवक इति----यथा अत्र योगिमन एव विवक्षितम् । अतो योगिनामुक्तगुणयुक्तेषु मनस्सु शेते उपास्यत्वेन वर्तत इति गिरिशः । निष्कलरूपो देशका. . . . . .

End:

महेन्द्रः स्वयं जगाद नत्वन्यमुखेन । कीदृशः---सामरसेनः अमरसेनया सह वर्तमानः सामरसेनः साम एव रसः सामरसः अतिमधुरमित्यर्थः । सुकटुकेत्यादि । पार्थसुराणाममरयः सन्ति । तेषु अमराणां गणः अमरचयः यश्च । कीदृशाः--सुकटुकवचनाः सुतरां कटुकानि तीक्ष्णानि वचनानि. . . . . . . . .

Colophon:

इति युधिष्ठिरविजयव्याख्याने श्रीकण्ठदासविरचिते पदार्थचिन्तननाम्नि तृतीय आश्वासः ।

Author—Śrīkaṇṭhadāsa.

Remarks—The Ms. extends up to the close of the 4th *Āśvāsa.* The first two leaves are missing.

---

## ॥ पदार्थचिन्तनम् (युधिष्ठिरविजयव्याख्या) ॥

### 1829. PADĀRTHACINTANAM.

Commentary on Yudhiṣṭhiravijaya.

Substance—Palm leaf. Size—12″ × 2″. Leaves—190. 9—20 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—5600.

Subject—Same as No. 1828.

Beginning:

अथ जतुगेहचारितार्थानां दुर्योधनादीनां पुनरपि द्रुपदवृत्तान्ताकर्णनेन द्रुपदसन्निहितानां पाण्डवानां निग्रहे सन्नाहमाह—अथेत्यादि । अथ कुरवः क्षणादिव द्रुपदपुरस्य प्राकारं न्यरौत्सुः इत्यन्वयः ।

End:

समुद्रसम्पदं तदा विस्तरात् विस्तरात् समुद्रसम्पदं समुद्रव्याप्तेः अन्तं परिच्छेदं ददातीति । तथा समुद्रादप्यधिकाविस्तीर्णेत्यर्थः । विस्तरादित्युपचारेणोक्तिः । व्यतिरेकोऽलङ्कारः । विस्तराद् गाम्भीर्याद्दुर्निवारत्वाद्दुर्लङ्घत्वाच्च समुद्रादधिकेत्यर्थः ।

Colophon:

इति पदार्थचिन्तने षष्ठ आश्वासः ।

Author—Same as No. 1828.

Remarks—*Āśvāsas* 2—6 are embodied in this Ms. The frame is made of ivory. The name Devanārāyaṇa, King of Ambalapuzha, is engraved on it, thereby indicating that the codex belonged to him.

---

## ॥ पदार्थचिन्तनम् (युधिष्ठिरविजयव्याख्या) ॥

### 1830. PADĀRTHACINTANAM.

Commentary on Yudhiṣṭhiravijaya.

Substance—Palm leaf. Size—$20\frac{1}{2}'' \times 2''$. Leaves—118. 9—11 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—4700.

Subject—Same as No. 1828.

Beginning :

अथ तृतीयाश्वासस्यादौ कृष्णप्रसादपात्रस्यार्जुनस्य खाण्डवदाहयितृत्वं वर्णयितुमुपक्रमते—अथेत्यादि । अथ तौ कृष्णौ खाण्डवं वनमाविष्टौ तौ दुष्टनिग्रहोद्यतौ कृष्णौ 'कृष्णाख्याः शमनव्यागधनञ्जयजनार्दनाः' । खाण्डवं वनमाविष्टौ ।

End :

पुरा पुरूरवा इव सोऽपि मत्समभारतः पुरूरवोनिर्विशेषं गोरक्षणं कृतवानित्यर्थः । सुखशब्दप्रयोगेण काव्यस्य मङ्गलान्तत्वमपि प्रकटीकृतम् । सर्वालङ्काराणामुपमायामन्तर्भाव इति समाप्तावुपमानेन सूचितम् । अनेनाद्भुतरसो व्यज्यते । कुर्यान्निर्वहणेऽद्भुतमित्युक्तत्वादिति शिवम् ।

Colophon :

इति श्रीकण्ठदासविरचिते पदार्थचिन्तननाम्नि युधिष्ठिरविजयव्याख्यानेऽष्टम आश्वासः ।

इति रामेण लिखितमिदं पुस्तकम् ।

Author—Same as No. 1828.

Remarks—The work commences on the 3rd *Āśvāsa*.

## ॥ पदार्थचिन्तनम् (युधिष्ठिरविजयव्याख्या) ॥

### 1831. PADĀRTHACINTANAM.

Commentary on Yudhiṣṭhiravijaya.

Substance—Palm leaf. Size—14″ × 2″. Leaves—72.

11—13 lines per page and 72 letters per line. Script—Malayāḷam. No. of Granthas—3800.

Subject—Same as No. 1828.

Beginning :

... ... ... ... ... ...

प्रणामपूर्वं परिगृहीतः लोमश एव कुन्तो यैस्ते तथा शत्रुनिग्रहार्थं लोमशश्चामरसंहिताः कुन्ताः प्रासाः ध्रियन्ते इति च स्फुरति । कुन्तवल्लोमशस्य प्रहारसाधनत्वमेव न तु प्रहर्तृत्वमिति मन्तव्यम् ।

End—Colophon : Same as No. 1830.

Author—Same as No. 1828.

Remarks—The work begins on the 5th *Āśvāsa.*

## ॥ पदार्थचिन्तनम् (युधिष्ठिरविजयव्याख्या) ॥

### 1832. PADĀRTHACINTANAM.

Commentary on Yudhiṣṭhiravijaya.

Substance—Palm leaf. Size—$18\frac{1}{2}'' \times 2''$. Leaves—42. 7—8 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—1000.

Subject—Same as No. 1828.

Beginning :

हरिः ।

अथेत्यादि । अथ धार्तराष्ट्रादिष्टाः कुरुराष्ट्राद्गताश्चराः जगति पार्थाननवेक्ष्य आययुः । धार्तराष्ट्रेण दुर्योधनेन आदिष्टाः पाण्डवा-

न्वेषणाय नियुक्ताः कुराः राष्ट्रं कुरुराष्ट्रं तस्माद् गताः प्रस्थिताः चराः प्रणिधयः । 'यथार्हवर्णः प्रणिधिरपसर्पश्चरः स्पश' इति सिंहः ।

End—Colophon: Same as No. 1829.

Author—Same as No. 1828.

Remarks—The Ms. contains the 6th *Āśvāsa* only.

---

## ॥ पदार्थचिन्तनम् (युधिष्ठिरविजयव्याख्या) ॥

### 1833. PADĀRTHACINTANAM.

Commentary on Yudhiṣṭhiravijaya.

Substance—Palm leaf. Size—16½" × 2". Leaves—65. 9 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—1450.

Subject—Same as No. 1828.

Beginning:

हरिः । अथ युद्धं वर्णयितुमारभते अथेत्यादि । अथ कुरवः रभसेन अनीकं व्यूह्य युद्धाय तस्थुः । अथ सेनाद्वयप्रवेशानन्तरं कुरवः दुर्योधनादयः रभसेन क्रोधेन वेगेन वा 'रभसः क्रोधवेगयोरि'त्यमरः । अनीकं

End:

तस्मात् । निवृत्तवान् । कीदृशः वरीयसः श्रेष्ठस्य गुरोर्द्रोणस्य वधात् निग्रहात् दाहवान् अत्यन्तसन्तापयुक्तः कीदृशः विभाः विगता भाः यस्य स विभाः विगतकान्तिरित्यर्थः ।

Colophon :

इति पदार्थचिन्तननाम्नि युधिष्ठिरविजयव्याख्याने सप्तम आश्वासः ।

Author—Same as No. 1828.

Remarks—The Ms. contains the 7th *Āśvāsa* only.

---

## ॥ पदार्थदीपिका (रघुवंशव्याख्या) ॥

### 1834. PADĀRTHADĪPIKĀ.

Commentary on Raghuvaṃśa.

Substance—Palm leaf. Size—12″ × 1½″. Leaves—50. 8 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—1300.

Subject—Explication of the Raghuvaṃśa.

Beginning :

स इति । तत्र मञ्चेषु सिंहासनस्थान् नरलोकपालान् अपश्यत् । तत्र स्वयंवरस्थाने मञ्चेषु दारुमयेषु प्रासादेषु नरलोकपालान् राज्ञः मनोज्ञो मनोहरो वेष आकल्पो येषां उपचारो वितानादिः तद्वत्सु वैमानिकानां मरुतां आकृष्टलीलान् विमानेन चरन्तीति वैमानिकाः "चरतीति" ठक् । आकृष्टा निन्दिता लीलाविलासा यैः । लीलाविलासक्रिययोरित्यमरः ।

End :

अभीति—सहकारलताः कलिकामंजिताम् अपि मनः अमदयन् सहकाराणां चूतानां लताः शाखाः कलिं कामं च जयन्तीति कलिकामजितः कलिर्विवादः 'विवादमात्रे त्वजयः कलिश्च्वमभाषते'

इति केशवः । तेन क्रोधो लक्ष्यते ।कामक्रोधजितामपीत्यर्थः । अभि-
नयान् परिचेतुम् उद्यता इव परिचेतुम् अभ्यसितुं उद्यता आरब्धा इव
मलयमारुतेन कम्पिताः पल्लवा यासां सकलिकाः समुकुलाः अत्र
मलयानिलस्य न।ट्याचार्यत्वं पल्लवकम्पनस्याङ्गिकत्वं मुकुलस्य रोमा-
श्चत्वं च प्रती.........

Colophon :

इति श्रीकृष्णशिष्यस्य नारायणस्य कृतौ रघुवंशव्याख्या-
यां पदार्थदीपिकायां अष्टमः सर्गः ।

Author—Nārāyaṇapaṇḍita.

Remarks—4 *Sargas* (6—9) are commented upon in this codex.

## ॥ पदार्थदीपिका (रघुवंशव्याख्या) ॥

### 1835. PADĀRTHADĪPIKĀ.

Commentary on Raghuvaṃśa.

Substance—Palm leaf. Size—15″ × 2″. Leaves—28. 9 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas—800.

Subject—Same as No. 1834.

Beginning :

अथ रघोः लब्धप्रशमनार्थमनुष्ठानं वर्णयितुमारभते—स इति ।
स गुरुणा दत्तं राज्यं प्रतिपद्य अधिकं बभावित्यन्वयः ।
सः रघुः गुरुः स्वपिता दिलीप इति भावः । दत्तं कर्मणि

निष्ठा । राज्यं सप्ताङ्गलक्षणं राष्ट्रं "स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानिच । राज्याङ्गानि" इत्यमरः । एतल्लक्षणं राज्यमित्युच्यते ।

End :

प्रस्थाने......मादाय गमनकाले प्रणतिभिः नमस्कारैः मौलिस्रक्च्युतमकरन्दरेणुगौरं मौलिस्रग्भ्यः शिरोमालाभ्यः च्युतैः (गलि)तैः मकरन्दैः पुष्परसैः पुष्परेणुभिः परागैश्च गौरं अरुणवर्णं "मकरन्दः पुष्परसः" इत्यमरः । "गौरोऽरुणे सिते" इति यादवः ।

Colophon :

इति रघुवंशव्याख्यायां पदार्थदीपिकायां चतुर्थः सर्गः ।
इतः पदक्रमेण व्याख्यायते । प्रसादेन लभ्यम् ।

Author—Same as No. 1834.

Remarks—The Ms. contains the commentary on the 4th *Sarga* only.

---

## ॥ पद्मनाभविजयम् ॥

### 1836. PADMANĀBHAVIJAYAM.

Substance—Palm leaf. Size—19½″ × 2″. Leaves—37. 9 lines per page and 50 letters per line. Script—Grantha. No. of Granthas—1000.

Subject—Description of *Anantaśayana.*

Beginning :

श्रीगुरुभ्यो नमः ।

सानन्दं तत्र पत्रलेखनमिषात् पार्श्वोल्लसद्वल्लभा-
वक्षोजौ निजकुम्भजैत्रगुरुताजिज्ञासयैवास्पृशत् ।

हस्ताग्रेण सदानकङ्कणतया भक्तेष्टदानव्रत-
व्यग्रेणेव परामृशन् गजमुखो देवो मुदे वोऽस्तु सः ॥

व्यक्ताव्यक्ताजमुक्तामणिजनिखनिभूपद्मशुक्त्याढ्यनाभी-
गर्त्तावर्त्तानुमेयापरिमितभुवनाधारकुक्ष्यन्तराब्धिः ।
जीयात् स्वीयां स्वशय्यादशशतफणमद्दलमङ्कान्तमौलि-
द्रष्टुः स्पष्टं श्रुतिभ्यां विभुरिह कलयन् शीर्षसाहस्रवत्ताम् ॥

End :

तन्वन्नन्वहमन्वयक्रमसमायातान् स्वधर्मान् मुदा
पात्रे दानशतानि तान्यनुपदं विश्राणयन् प्रीणयन् ।
भक्त्याम्भोरुहनाभमद्भुततरैर्नित्योत्सवार्चादिभिः
श्रीमानेवमवन् भुवं विजयते श्रीरामवर्मप्रभुः ॥

आचन्द्रतारकमयं भुवि वञ्चिबाल-
श्रीरामवर्मकुलशेखरभूमिपालः ।
श्रीपद्मनाभकृपया सहभागिनेयः
श्रीमान् मृकण्डुसुतवत् जयतु स्थिरायुः ॥

Colophon :

सुब्रह्मण्यबुधं सदाशिवगुरुर्ब्रह्मप्रसादस्फुर-
द्विद्योऽसूत स रामलिङ्गविभवश्रीकोकिलाम्बा च यम् ।
काव्ये तेन कृतेऽत्र साङ्गविभवे श्रीरामवर्मप्रभु-
श्रेयःसद्मनि पद्मनाभविजये सर्गोऽष्टमोऽभूदयम् ॥

Author—Subrahmaṇya.

Remarks—The work consists of 8 *Sargas* only.

## ॥ पार्वतीरुक्मिणीयम् ॥

## 1837. PĀRVATĪRUKMIṆĪYAM.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—50. 8 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—600.

Subject—Description of the marriages of Rukmiṇī and Pārvatī.

Beginning:

जगत्त्रयं बिभ्रदुपात्तसत्त्वो
वृषेण गच्छन् सुखबोधमूर्त्तिः ।
तनौ दधानोऽनुपमश्रियं तां
शिवां शिवं वो विदधातु देवः ॥

जाताब्धितो या प्रथिताचलाद्या
सम्प्राप नित्येश्वरदेहयोगम् ।
श्रियं दधानां श्रितसद्गुणौघां
नमामि वन्द्यां जगतोऽम्बिकां ताम् ॥

द्विजैक्यरूढो विधुसङ्गताङ्गः
स्तुतः सुरेन्द्रैरमृतस्य दाता ।
विनीतविघ्नो विनतार्त्तिहारी
विनायकः स्याद्विनयश्रिये वः ॥

End:

क्रान्ताशयान् प्रसभ......स्मरेण
श्रान्तान्तुषेन चिरमुद्गतघर्मबिन्दून् ।
कान्तांस्त्रपाभरमुषा पुरुषा......
कान्ताप्रतीतसमया रमयांबभूवुः ॥

वधूनां स्वजात्यादिभेदानुरूपै-
र्मनोमोहनैर्मोहनैर्भूरिभेदैः ।
कृतानन्दसम्पत्तिभिस्ते युवानः
स्मराधूतनिद्रा निशान्तामनैषुः ॥

Colophon :

इह सुमहति काव्ये पार्वतीरुक्मिणीये
शुभम...मितिराजत्सम्पदानन्दचिह्नम् ।
नवममनवमार्थं सर्गमाधत्त स श्री-
पदमुखमिति विद्यामाधवः पण्डितेन्द्रः ॥

Author—Vidyāmādhava.

Remarks—The work is composed in the *Sabhaṅga-śleṣa* style.

---

## ॥ पार्वतीरुक्मिणीयम् ॥

### 1838. PĀRVATĪRUKMIṆĪYAM.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—29. 10—11 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—600.

Subject etc.—Same as No. 1837.

---

## ॥ पार्वतीरुक्मिणीयम् ॥

### 1839. PĀRVATĪRUKMIṆĪYAM.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—33.

9 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—600.

Subject etc.—Same as No. 1837.

---

॥ प्रकाशिका (रघुवंशव्याख्या) ॥

1840. PRAKĀŚIKĀ.

Commentary on Raghuvaṁśa.

Substance—Palm leaf. Size—18″ × 2″. Leaves—21. 9 lines per page and 72 letters per line. Script—Malayāḷam. No. of Granthas—850.

Subject—Explication of the Raghuvaṁśa.

Beginning:

... ... ... ... ...
... ... ... ... ... ...

ति काव्यलिङ्गम् । एते च मिथः संकीर्यन्ते । तत्र परिसंख्यां काव्यलिङ्गे नोपक्रियते मनीषाफलत्वात् परिसंख्यानस्य । सा च तद्भावापत्तिलक्षणमन्वयमुद्भावयन्ती... ... ... ... ...तदुक्तम्, 'अविश्रान्तिजुषामात्मन्यङ्गाङ्गित्वन्तु सङ्कर' इति ।

End:

एवं दौहृदलक्षणोऽर्थोऽनेकधा प्रतिभाति । अत्र च रुच्यादयः कारणम् । यदाह—

यथारुचि यथार्थित्वं यथाव्युत्पत्ति भिद्यते ।
आभासोऽप्यर्थ एकस्मिन्ननुसन्धानसाधितः ॥ इति । अत्र भर्त-

यैर्थित्वम् ... ... ... ... ... ...
... ... ... ... ... ... ।

Colophon :

इति श्रीकण्ठपादपवित्रितस्यारुणगिरिनाथस्य कृतौ रघुवंश-प्रकाशिकायां द्वितीयः सर्गः ।

Author—Aruṇagirinātha.

Remarks—The Ms. comprises the commentary on three *Sargas*. The first 2 leaves are much damaged.

---

## ॥ प्रकाशिका (रघुवंशव्याख्या) ॥

### 1841. PRAKĀŚIKĀ.

Commentary on Raghuvaṁśa.

Substance—Palm leaf. Size—$16\frac{1}{2}'' \times 2''$. Leaves—162. 6—10 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—3850.

Subject—Same as No. 1840.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

नमस्तस्मै गणेशाय यत्प्रसादान्महीयसाम् ।
... ... ... ...तवः ॥

नमामि निखिलातङ्कनि . . . पणमहौषधिम् ।
मातरं जगतामेकां चन्द्रशेखरवल्लभाम् ॥

कृतिर्या कालिदासस्य सर्वार्थसुरपादपः ।
तस्यास्य रघुवंशस्य बहुमार्गावगाहिना ॥
अरुणाचलनाथेन द्विजपादाब्जसेविना ।
शिवदासापराख्येन मया टीका वितन्यते ॥

End :

सुरद्वि—दिग्गजाः ऐरावतादयोऽष्टौ । तत्र कुशचरितं वर्णयति—अथेति । अर्धरात्र इति कालस्य जनसंबन्धा ... ...
... ... ... ... ... ।

Colophon :

इति अरुणगिरिनाथविरचितायां रघुवंशप्रकाशिकायां पञ्चदशः सर्गः ।

Author—Same as No. 1840.

Remarks—The leaves are damaged. The Ms. comprises 16 *Sargas* only.

---

॥ प्रकाशिका (रघुवंशव्याख्या) ॥

1842. PRAKĀŚIKĀ.

Commentary on Raghuvaṃśa.

Substance—Palm-leaf. Size—18¾″×2″. Leaves—79. 7—10 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—1700.

Subject—Beginning : Same as No. 1840.

End :

अथाकस्मिकं प्रकरणमुपक्रमते । तच्च गान्धर्वमित्यादिना वाक्येन। सवीजन्तस्य च फलमनेन प्रियंवदां प्राप्तमित्यादि । अथेति । प्रागित्युन्मज्जना.........निर्धौतित्यादि भाति

Colophon :

Author—Same as No. 1840.

Remarks—The Ms. contains 5 *Sargas* only.

---

## ॥ प्रकाशिका (रघुवंशव्याख्या) ॥

### 1843. PRAKĀŚIKĀ.

Commentary on Raghuvaṁśa.

Substance—Palm leaf. Size—22″ × 2″. Leaves—105. 7—10 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—2900.

Subject—Same as No. 1840.

Beginning :

... ... ... ... ...

... ... ... ... ... ... ...

"रजो विश्रामयन् राज्ञां छत्रशून्येषु मौलिषु" ।

इति श्रेणीबन्धामिति तोरणस्रजः ग्रामेष्विति । शिशिरोपचारस्य हेय.... ... .... पदो—स्थानस्य यथा विक्रमोर्वश्याम् ।

End :

.... ....तपनातपत्वात् ते चो.... ...पि.... ....सोपा-
योगत्त्वाद्(द्)यं हरन्ति । स इति व्यस्तः विभक्तः प्रसवः
सन्तानं पृथिवीपतेः धर्मार्थे.... .... .... ....
... ... ... ... ... ...

Colophon :

इत्यरुणगिरिविरचितायां रघुवंशप्रकाशिकायां नवमः सर्गः ।

Author—Same as No. 1840.

Remarks—The Ms. extends from the 45th verse in the 1st *Sarga* to the 83rd verse in the 10th. The leaves are much damaged.

---

## ॥ प्रकाशिका (रघुवंशव्याख्या) ॥

### 1844. PRAKĀŚIKĀ.

Commentary on Raghuvaṁśa.

Substance—Palm-leaf. Size—$18\frac{1}{2}'' \times 2\frac{1}{2}''$. Leaves—90. 8—9 lines per page and 60 letters per line. Script—Malayāḷam. No. of Granthas—3000.

Subject—Author: Same as No. 1840.

Remarks—The Ms. contains *Sargas* 6—19. The leaves are much injured. The following lines are cited after the colophon :

"पान्तु वो नलिकण्ठस्य नीलाः कण्ठे महाहयः ।
गङ्गातरङ्गसंसिक्तकालकूटाङ्कुरा इव ॥
.... ....पाणिना लिखितमिदं पुस्तकम् ।
पातु नः पुण्डरीकाक्षः पुण्डरीकनिकेतनः ॥
शिशुपालवधं कर्तुं शिशुपालरतोऽभवत् ॥
श्रीराघवाय नमः । हरिहरहिरण्यगर्भेभ्यो नमः ।

---

## ॥ प्रकाशिका (रघुवंशव्याख्या) ॥

## 1845. PRAKĀŚIKĀ.

Commentary on Raghuvaṃśa.

Substance—Palm leaf. Size—22″ × 2″. Leaves—80. 9 lines per page and 76 letters per line. Script—Malayāḷam. No. of Granthas—3400.

Subject—Same as No. 1840.

Remarks—The following portion occurs after the colophon:—

रामशास्त्रिणा लिखितमिदं पुस्तकम् ।
1062ാമാണ്ടു° മിഥുനമാസം 28ാം-.

---

## ॥ प्रकाशिका (रघुवंशव्याख्या) ॥

## 1846. PRAKĀŚIKĀ.

Commentary on Raghuvaṃśa.

Substance—Palm leaf. Size—15″ × 3″. Leaves—93,

10 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—3250.

Subject—Author: Same as No. 1840.

Remarks—The Ms. extends from the 3rd *Sarga* up to the 13th.

---

॥ प्रकाशिका (रघुवंशव्याख्या) ॥

1847. PRAKĀŚIKĀ.

Commentary on Raghuvaṃśa.

Substance—Palm leaf. Size—$18\frac{1}{2}'' \times 2\frac{1}{2}''$. Leaves—20. 9 lines per page and 72 letters per line. Script—Malayāḷam. No. of Granthas—800.

Subject—Author: Same as No. 1840.

Remarks—The Ms. contains fragments of the 4th and 5th *Sargas*.

---

॥ प्रकाशिका (रघुवंशव्याख्या) ॥

1848. PRAKĀŚIKĀ.

Commentary on Raghuvaṃśa.

Substance—Palm leaf. Size—$15'' \times 3''$. Leaves—23. 10 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—700.

Subject—Author : Same as No. 1840.

Remarks—The Ms. embodies *Sargas* 14—16 only.

---

## ॥ प्रसङ्गरत्नावली ॥

## 1849. PRASAṄGARATNĀVALĪ.

Substance—Palm leaf. Size—8″×2″. Leaves—108. 11—13 lines per page and 12—20 letters per line. Script—Malayāḷam. No. of Granthas—1200.

Subject—Same as No. 1757.

Beginning :

हरिः ।

जाड्यं धुनोति हृदि सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति तापमपाकरोति ।
चेतः प्रसादयति दिक्षु तनोति कीर्त्तिं
सत्सङ्गतिः कथय किन्न करोति पुंसाम् ॥

निर्गुणमप्यनुरक्तं प्रायो न समाश्रयं जहति सन्तः ।
सहवृद्धिक्षयभाजं वहति शशाङ्कः कळङ्कमपि ॥

यथा चन्दनयोगेन तप्तं तैलं प्रशाम्यति ।
तद्वद्योगीन्द्रसङ्गेन सज्जनौघो भवश्रमम् ॥

मूकादपि विनिर्याति सत्सङ्गादेव भारती ।
जडादपीन्दुपाषाणात्सङ्गादिन्दोः पयो यथा ॥

Subject—Author : Same as No. 1840.

Remarks—The Ms. embodies *Sargas* 14—16 only.

---

## ॥ प्रसङ्गरत्नावली ॥

## 1849. PRASAṄGARATNĀVALĪ.

Substance—Palm leaf. Size—8″ × 2″. Leaves—108. 11—13 lines per page and 12—20 letters per line. Script—Malayāḷam. No. of Granthas—1200.

Subject—Same as No. 1757.

Beginning :

हरिः ।

जाड्यं धुनोति हृदि सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति तापमपाकरोति ।
चेतः प्रसादयति दिक्षु तनोति कीर्त्तिं
सत्सङ्गतिः कथय किन्न करोति पुंसाम् ॥

निर्गुणमप्यनुरक्तं प्रायो न समाश्रयं जहति सन्तः ।
सहवृद्धिक्षयभाजं वहति शशाङ्कः कळङ्कमपि ॥

यथा चन्दनयोगेन तप्तं तैलं प्रशाम्यति ।
तद्वद्योगीन्द्रसङ्गेन सज्जनौघो भवश्रमम् ॥

मूकादपि विनिर्याति सत्सङ्गादेव भारती ।
जडादपीन्दुपाषाणात्सङ्गादिन्दोः पयो यथा ॥

## ॥ बालभारतम् ॥

### 1850. BĀLABHĀRATAM.

Substance—Palm leaf. Size—15″ × 2″. Leaves—95. 10—12 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—2300.

Subject—Description of the greatness of the Kings of the Candra dynasty.

Author—Agastya.

Remarks—The Ms. contains 20 *Sargas*. The work is noticed under No. 11608, DCSM. Madras, Vol. XX. It has been printed in Bombay.

---

## ॥ बालभारतम् ॥

### 1851. BĀLABHĀRATAM.

Substance—Palm leaf. Size—14″ × 2″. Leaves—93. 8—9 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—1700.

नूपुरे त्वभिजानामि नित्यं पादाभिवन्दनात् ॥

Colophon :

श्रीरामलक्ष्मणाभ्यां नमः ।

Author :

Remarks—The Ms. commences on the portion dealing with the abduction of Sītā and ends on that describing the jewels accidentally shown to Śrī Rāma. The leaves are much decayed.

---

## ॥ रामायणसंग्रहः ॥

### 1926. RĀMĀYAṆASAṄGRAHA.

Substance—Palm leaf. Size—18″ × 2″. Leaves—203.

11 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—8800.

Subject—Same as No. 1922.

Beginning :

श्रीमहागणपतये नमः । अविघ्नमस्तु ।

लक्ष्मीवक्षोजराजद्घुसृणसुरभितोरःस्थलं पद्मनाभं
लोकानामेकनाथं यदुकुलमहितक्ष्मापतीनां शरण्यम् ।
वन्दे वृन्दारकेड्यं विभुमखिलजगत्पालने जागरूकं
स्यानन्दूराभिधानप्रथितपुरवरे भोगिभोगे शयानम् ॥

नमोऽस्तु रामाय सलक्ष्मणाय
सीतासहायाय जगत्प्रियाय ।
दुर्वृत्तरक्षोधिपनाशनाय
सदामृतानन्ददृशे नमोऽस्तु ॥

कूजन्तं रामरामेति मधुरं मधुराक्षरम् ।
आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम् ॥

क्वाहं मन्दमतिः क्व सा रघुपतिश्रेयःकथा विस्तृता
वाल्मीकिप्रमुखैः प्रबन्धृभिरपि प्रत्यग्दृशा दर्शिता ।
किन्त्वाम्नातुमनास्स्वमाहृतिमिषाद् भक्त्यै हरेः पादयोः
सन्तस्तत्र यते प्रसाद्य भवतः क्षाम्यन्तु तच्चापलम् ॥

श्रीपद्मनाभपदपङ्कजभक्तिभूम-
प्रादुर्भवत्प्रचुरसंकुलमानसूजः ।
राजा कथां रघुपते रविवर्मनामा
तत्संजिघृक्षति सतां मुदमादधातु ॥

एकदा शौनकस्सूतं व्यासशिष्यं महामतिम् ।
रामस्य चरितं पुण्यं पप्रच्छ विजितेन्द्रियः ॥
तच्छ्रुत्वा मुदितः सूतो ध्यात्वा विष्णुं सनातनम् ।
व्यासं प्रणम्य स्वगुरुं शौनकं पुनरब्रवीत् ॥
शृणु विप्रेन्द्र वक्ष्यामि राघवस्य महात्मनः ।
चरितं सर्वपापघ्नं मनःश्रुतिसुखावहम् ॥

End :

राघवः परमोदारः शशास परया मुदा ।
भ्रातृभिः सहितः प्रीतो राज्यं निहतकण्टकम् ॥

य इदमनुशृणोति योऽभिधत्ते
रघुपतिभाषितमात्मयोगगुह्यम् ।
भगवति कृतधीः सुपर्णकेता-
वुपलभते भगवत्पदारविन्दम् ॥

Colophon :

इति रविवर्मकुलशेखरस्य कृतौ रामायणसंग्रहे युद्धकाण्डे अध्यात्मप्रकरणे रामहनूमत्संवादो नाम एकपञ्चाशः सर्गः ।

शुभमस्तु ।

नन्दहस्तमवलम्ब्य पाणिना मन्दमन्दमरविन्दलोचनः ।
सञ्चरन्मधुरकिंकिणीरवः सन्ततं मम तनोतु मङ्गलम् ॥

Author—Ravi Varma Kulaśekhara of Travancore.

Remarks—The introductory portion discloses that the author is Ravi Varma Kulaśekhara, son of Umādevī. The poet panegyrizes Śrīpadmanābha of Syānandūrapura in the

invocatory verses and hence the inference that he ruled over Travancore in the year 859 M. E. The diction is elegant and attractive.

---

## ॥ रामायणसंग्रहः ॥

### 1927 A. RĀMĀYAṆASAṄGRAHA.

Substance—Palm leaf. Size—9½" × 1¾". Leaves—91 7—8 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—1350.

Subject—Same as No. 1922.

Beginning :

श्रीगणपतये नमः । अविघ्नमस्तु ।

... ... ... ...ना-
गीताकर्णनविस्मिताम्बरचरप्रस्तूयमानस्तुतिः ।
... .... ...तां साधारणं मान्दिरं
लक्ष्म्या धाम परं ललामरचना भूमेरयोध्यापुरी ॥

अयोध्या नाम तत्रासीन्नगरी लोकविश्रुता ।
मनुना मानवेन्द्रेण पुरा वै निर्मिता स्वयम् ॥

यथा मनुर्महातेजा लोकस्य परिरक्षिता ।
तथा दशरथो राजा लोकस्य पारिरक्षिता ॥

तेन सत्याभिसन्धेन त्रिवर्गमनुतिष्ठता ।
पालिता सा पुरी श्रेष्ठा शक्रेणेवामरावती ॥

End :

जम्बुमाली सुमाली च सुप्तघ्नो . . .यकोपनः ।
दुर्मुखो दूषणश्चैव खरत्रिशिरसौ तथा ॥

दुष्प्रभः करवीराक्षस्सूर्यशत्रुश्च राक्षसः ।
अहमिन्द्रो भविष्यामि वरुणो धनदो यमः ॥

त्रिदशान् विनिहत्याजौ स्थापयिष्यामि चापरान् ।

Colophon :

Author :

Remarks—The Ms. contains several citations from various works. It extends up to the portion dealing with Rāma's success over Rāvaṇa.

## ॥ संक्षेपरामायणम् ॥

1927 B. SAMKṢEPARĀMĀYAṆAM.

Substance—Palm leaf. Size—$9\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—2. 8 lines per page and 30 letters per line. Script—Malayāḷam. No. of Granthas—30.

Subject—Same as No. 1922.

Beginning :

श्रीमन्मार्ताण्डवंशे दशरथनृपतेरात्मजत्वं प्रपन्नः
साकं शेषारिशङ्खैर्निशिचरनिवहं संहरिष्यन् सुरार्थे ।
गुर्वादेशेन हत्वा पथि रजनिचरीं प्राप्य सिद्धाश्रमं य-
श्चक्रे यज्ञस्य रक्षां स दिशतु सततं मङ्गलं रामचन्द्रः ॥

End :

मध्येपाथोधि बद्ध्वा झटिति गिरिशतैस्सेतुमाहोक्ष्य लङ्कां
हत्वा सभ्रातृमित्रं रणशिरसि कृपा रावणं दारचोरम् ।
कान्तां स्वीकृत्य शुद्धां ज्वलनपतनतः प्राप्य रम्यामयोध्यां
योऽस्थात्सीदात्तमोदं स दिशतु सततं मङ्गळं रामचन्द्रः ॥

नित्यं यो रामचन्द्रस्तुतिमिति जपति ध्वस्तसर्वारिसंघो
भुक्त्वा भोगानभीष्टानभिनवयशसा पूरयित्वा त्रिलोकीम् ।
अन्तःसंहृत्य कान्ताधनतनयगृहान् येषु रूढं ममत्वं
साक्षादालीयतेऽसौ भगवति भवसिन्धुप्लवे चक्रपाणौ ॥

Colophon :

संक्षेपरामायणं समाप्तम् ।

श्रीरामचन्द्रः श्रितपारिजातः
समस्तकल्याणगुणाभिरामः ।
सीतामुखाम्भोरुहराजहंसो
निरन्तरं मङ्गळमातनोतु ॥

आजानुबाहुमरविन्ददळायताक्षं
बन्धूकपुष्पसदृशाधरपाणिपादम् ।
सीतासहायमजितं धृतचापबाणं
रामं नमामि मनसा रमणीयवेषम् ॥

Author :

Remarks—The story of Rāma is epitomised in 6 verses. Subsequently the Bhāgavata and Bhārata are recounted in the following two stanzas:

"आदौ देवकिदेविगर्भजननं गोपीगृहे वर्धनं
मायापूतनजीवितापहरणं गोवर्धनोद्धरणम् ।

कंसोच्छेदनकौरवादिहननं कुन्तीसुतापालनम्
एवं भागवतं पुराणकथितं श्रीकृष्णलीलामृतम् ॥

आदौ पाण्डवधार्तराष्ट्रजननं लाक्षागृहे दाहनं
द्यूताच्छ्रीहरणं वने विहरणं मात्स्यालये वर्तनम् ।
लीलागोग्रहणं रणावतरणं सन्धिक्रियाजृम्भणं
पश्चाद् भीष्मसुयोधनादिमथनं ह्येतन्महाभारतम् ॥

---

## ॥ रामायणसंग्रहः ॥

### 1928. RĀMĀYAṆASAṄGRAHA.

Substance—Palm leaf. Size—18″ × 1¾″. Leaves—38. 8 lines per page and 60 letters per line. Script—Malayāḷam. No. of Granthas—1150.

Subject—Same as No. 1922.

Beginning:

.... ... ...प्रभवः पृथिवीपते ।
धर्मार्थकाममोक्षाणाम.... ...वास ॥

समानेऽपिहि सौभ्रात्रे तावुभौ रामलक्ष्मणौ ।
तथा भरतशत्रुघ्नौ प्रीत्या द्वन्द्वं बभूवतुः ॥

सुरगज इव दन्तैर्भग्नदैत्यासिधारै-
र्नय इव...बन्धव्यक्तयोगैरुपायैः ।
हरिरिव युगदीर्घैर्दोर्भि.. .शं तदीयैः
पतिरवनिपतीनां तैश्चकाशे चतुर्भिः ॥

End :

एष सेनापति......बलमभ्मितः ।

समभ्येति बलात्तूर्णं प्रहस्तः शस्त्रयुद्धवित् ।

हते प्रहस्ते नीलेन तदा काप्यं महद्बलम् ।

रक्षसामप्रहृष्टानां लंक. . . . ॥

Colophon :

Author :

Remarks—The Ms. is old and damaged.

---

## ॥ रामायणसंग्रहः ॥

### 1929. RĀMĀYAṆASAṄGRAHA.

Substance—Palm leaf. Size—$9\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—78. 6—8 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—1350.

Subject—Same as No. 1922.

Beginning :

हरिः । श्रीगणपतये नमः ।

आसीदम्बुदचुम्बिसौधशिखरश्रेणीनिषण्णाङ्गना-
गीताकर्णनविस्मिताम्बरचरप्रस्तूयमानस्तुतिः ।
मार्ताण्डान्वयजन्मनां क्षितिभृतां साधारणं मन्दिरं
लक्ष्म्या धाम परं ललामरचना भूमेरयोध्यापुरी ॥

अयोध्या नाम तत्रासीन्नगरी लोकविश्रुता ।
मनुना मानवेन्द्रेण पुरा वै निर्मिता स्वयम् ॥

End :

यथाहं रा(घ)वादन्यं मनसापि न चिन्तये ।

यथा मे··· ··· ··· ··· ॥

तथा मे माधवी देवी विवरं दातुमर्हति ।

यथेतत्सत्यमुक्तं मे वेदिन(?)··· ··· ।

निर्वर्त्यैवं दशमुखशिरश्छेदकार्यं सुराणां

विष्वक्सेनः स्वतनुमविशत् सर्वले....लित्वा ।

कीर्त्तिस्तम्भद्वयमिव गिरौ दक्षिणे चोत्तरे च

Colophon :

इत्युत्तररा··· ··· ··· ··· ॥

Author :

Remarks—The leaves are decayed. The Ms. is in neat legible hand.

## ॥ रामायणामृतम् ॥

### 1930. RĀMĀYAṆĀMṚTAM.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—147. 6—8 lines per page and 18 letters per line. Script—Malayāḷam. No. of Granthas—1200.

Subject—Same as No. 1922.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

जाम्बवदङ्गदहनुमत्सुग्रीवविभीषणप्रियावरजैः ।

युतममृतपुण्यचरितं दाशरथिं राममाश्रये विष्णुम् ॥

आपल्लवमपि यत्पदपल्लवभक्ता जना न जानन्ति ।
तं वल्लवीजनानां वल्लभमतिपेलवाङ्गमवलम्बे ॥

भस्मीचकार यः खलु पुरत्रयं सोऽयमीश्वरोऽस्माकम् ।
आध्यात्मिकं पुरत्रयमखिलानर्थैककारणं दहतु ॥

देवि सरस्वति भगवति परमेश्वरि पाहि पाहि मां भक्तम् ।
गङ्गादिरूपधारिणि नमो नमस्ते समस्तवाग्रूपे ॥

ध्वान्तावरणनिवारणकारणभूतं पुराणपुरुषं तम् ।
कारुणिकमरुणचरणं वारणवदनं व्रजामि शरणमहम् ॥

जातं पराशरात्खलु वासव्यां श्रुतिशताब्जमार्ताण्डम् ।
नारायणमेव मतां परायणं बादरायणं वन्दे ॥

सम्यक् पौर्वापर्यं पर्यालोच्यावधार्य तात्पर्यम् ।
श्रुत्यादिव्याख्याता जयति यतीन्द्रः स शङ्कराचार्यः ॥

ब्रह्मानुभूतिसंज्ञां यत्र ब्रह्मेन्द्रतीर्थसंज्ञां च ।
समवेतार्थं प्राहुस्तानहमस्मद्गुरून् सदा वन्दे ॥

ईशानुभूतिशेखरि यस्य यतेर्नाम देवदेवेति ।
सोऽहं श्रद्धामात्राद्रामकथामारभेततामममृतम (?) ॥

रामायणामृताख्या कृतिरियमार्यैर्निषेव्यतामार्याः ।
स्खलनैकखेलनरतैर्विशृङ्खलैः खलु खलैः किमतिशोच्यैः ॥

यो ब्रह्म नारदोक्त्या कृत्वा रामायणं गृहीत्वाथ ।
कुशलवसंज्ञौ शिष्यौ तदपाठयदेष जयति वाल्मीकिः ॥

आसीद्राजा साक्षाद्दशरथ इत्याख्यस्तस्य चायोध्याम् ।
कौसल्या कैकेयी तथा सुमित्रा स्त्रियोऽस्य विख्याताः ॥

End :

ख्यातविभीषणहनुमत्सुग्रीवैः निजघान ननु जयस्तम्भौ ।
उच्चैस्सुवे...शैले तथा हिमाद्रौ च यस्स रामोऽहम् ॥

दण्डककण्टकविद्धं मनोहरं पादपल्लवं दिव्यम् ।
स्मरतां हृदि विन्यस्य प्राप्तः परमं पदं स रामोऽहम् ॥

अत्यन्तभीषणोर्मिर्विभीषणाद्यैः सुदुस्त(र)स्तीर्णः ।
यत्कृपया विततोऽयं संसाराब्धिस्सदा स रामोऽहम् ॥

अस्मै भूयोऽपि नमो रामाय सलक्ष्मणाय भरताय ।
शत्रुघ्नाय च देव्यै सीतायै ब्रह्मणे स रामोऽहम् ॥

Colophon :

श्रीरामायणामृतं समाप्तम् ।

नमोऽस्तु रामाय सलक्ष्मणाय
सीतासहायाय जगत्प्रियाय ।
(निवृ?दुर्वृ)त्तरक्षोधिपनाशनाय
सदामृतानन्ददृशे नमोऽस्तु ॥

Author—Devadeveśānubhūtiyati.

Remarks—A few leaves in the middle are injured.

---

## ॥ रामोदन्तम् ॥

### 1931. RĀMODANTAM.

Substance—Palm leaf. Size—$4\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—20.

8 lines per page and 10 letters per line. Script—Malayāḷam. No. of Granthas—150.

Subject—Same as No. 1922.

Beginning:

...श्रीगणपतये नमः ।

श्रीपतिं प्रणिपत्याहं श्रीवत्साङ्कितवक्षसम् ।
श्रीरामोदन्तमाख्यास्ये श्रीवाल्मीकिप्रकीर्तितम् ॥

पुरा विश्रवसः पुत्रो रावणो नाम राक्षसः ।
आसीदस्यानुजौ चास्तां कुम्भकर्णविभीषणौ ॥

End:

श्रीरामोदन्तमाख्यातमिमं मन्दधिया मया ।
समीक्ष्य निपुणं सन्तः सुशोध्य परिगृह्यताम् ॥

येषां प्रसादाद्रामस्य चरितं कीर्तितं मया ।
तान् गुरून् सर्वथा नौमि नारायणपरायणान् ॥

यस्तु दशरथिर्भूत्वा रणे हत्वा च रावणम् ।
ररक्ष लोकान् वैकुण्ठः स मां रक्षतु चिन्मयः ॥

152 ശ്ലോകം

Colophon:

श्रीरामोदन्तं समाप्तम् ।

Author:

Remarks—Many leaves are damaged.

॥ रावणवधम् ॥

## 1932. RĀVAṆAVADHAM.

Substance—Palm leaf. Size—12″ × 2″. Leaves—27. 6—8 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—375. Incomplete.

Subject—Same as No. 1922.

Beginning :

श्रीगणपतये नमः । अविघ्नमस्तु ।

अभून्नृपो विबुधसखः परंतपः
श्रुतान्वितो दशरथ इत्युदाहृतः ।
गुणैर्वरं भुवनहितच्छलेन यं
सनातनः पितरमुपागमत्स्वयम् ॥

End :

दरैर्दुःखस्य माद्यग्भ्यो धार्यैरामोदमुत्तमम् ।
लिम्पैरिव तनोवार्तैश्चेतयः स्याज्ज्वलो नकः (?) ॥

अवश्यायकणास्रात्राश्चारुमुक्ताफलत्विषः ।
कुर्वन्ति चित्तसंस्रा.... .... .... ॥

Colophon :

प्रकीर्णकाण्डः समाप्तः ।

Author—Bhartṛhari.

Remarks—The Ms. contains 6 *Sargas* only. It is available in print. It is well known

as Bhaṭṭikāvya as it is composed by Bhaṭṭi, son of Svāmi. He is identified with Bhartṛhari.

॥ रावणवधम् ॥

1933. RĀVAṆAVADHAM.

Substance—Palm leaf. Size—9½″ × 1¾″. Leaves—132. 8 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—1850.

Subject—Same as No. 1922.

Beginning—Same as No. 1932.

End :

प्रविधाय श्रुतिं परां जनानां
युवराजं भरतं ततोऽभिषिच्य ।
जघटे तुरगाध्वरेण यष्टुं
कृतसम्भारविधिः पतिः प्रजानाम् ॥

Colophon :

इति वल्लभिवास्तव्यस्य श्रीस्वामिसूनोर्भर्तृप्रणस्य महावैयाकरणस्य कृतौ रावणवधे महाकाव्ये लुङ्विलसितं नाम नवमः। आदितो द्वाविंशतिस्सर्गाः ।

इदमधिगतमुक्तिमार्गचित्रं
विवदिषतां वदताश्च सन्निबन्धात् ।
जनयति विजयं सदा जनानां
युधि सुसमाहितमैश्वरं

दीपतुल्यः प्रबन्धोऽयं शब्दलक्षणचक्षुषाम् ।
हस्तामर्श इवान्धानां भवेद् व्याकरणादृते ॥

व्याख्यागम्यमिदं काव्य-
मुत्सवः सुधियामलम् ।
हता दुर्मेधसश्चास्मिन्
विद्वत्प्रि......मया ॥

काव्यमिदं विहितं मया वलभ्यां
श्रीधरसेननरेन्द्रपालितायाम् ।
कीर्त्तिरतो भवतान्नृपस्य तस्य
क्षेमकरः क्षितिपो यतः प्रजानाम् ॥

कृष्णेन लिखनमिदं पुस्तकम् ।

Author—Same as No. 1932.

Remarks—Same as No. 1692.

---

## ॥ रावणवधम् ॥

## 1934. RĀVAṆAVADHAM.

Substance—Palm leaf. Size—15″ × 1¾″. Leaves—67. 7—9 lines per page and 48—64 letters per line. Script—Malayāḷam. No. of Granthas—1850.

Subject—Same as No. 1922.

Beginning—Same as No. 1932.

End—Colophon—Author: Same as No. 1933.

Remarks—The following verses occur after the end;

श्रीवञ्चिक्षितिनाथस्य धर्मज्ञस्य महामतेः ।
आज्ञया लिखितं भट्टिकाव्यं गोविन्दसूरिणा ॥

दत्ता निश्शेषकर्त्रा सरसिजनयनेनात्रनीयं विभो ते
लक्ष्मीर्विश्वस्य कर्त्ता प्रमुदितहृदयेनात्मदाराश्च दत्ताः
यत्तद्विज्ञानसम्पन्निरवधिसफलैश्वर्यसत्कीर्त्तयस्ते
मन्त्रीहास्ते मुकुन्दः सकलगुणनिधिर्वञ्चिराजेन्द्र नित्यम् ॥

---

## ॥ रावणवधम् ॥

### 1935. RĀVAṆAVADHAM.

Substance—Palm leaf. Size—8¾" × 1¾". Leaves—105. 9 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—1900.

Subject—Same as No. 1922.

Beginning etc.—Same as No. 1933.

Remarks—The following verse is quoted after the close :

विरिञ्चवक्त्राम्बुजकाननान्त-
गतेव हंसी कमनीयशोभा ।
सरस्वती सन्ततलालनीया
मनःप्रसादं भवतां तनोतु ॥

---

## ॥ रावणवधम् (जयमङ्गलोपेतम्) ॥

### 1936. RĀVAṆAVADHAM with Jayamaṅgalā.

Substance—Palm leaf. Size—21" × 2". Leaves—144.

9—11 lines per page and 72 letters per line. Script—Malayāḷam. No. of Granthas—6500.

Subject—Same as No. 1922.

Beginning :

श्रीगणपतये नमः । अविघ्नमस्तु ।

स्वाख्यानाढ्यो विचित्राक्षरललितपदः संगृहीतार्थराशिः
शुद्धालङ्कारहारी सकलगुणनिधिर्वर्जिताशेषदोषः ।
विद्वत्प्रीतिप्रदेयो महितहरिभवः सर्वलक्ष्यान्तगामी
शश्वल्लोकप्रसिद्धो नृपतिरिव महान् काव्यबन्धश्चकास्ति ॥

सम्पन्ना सकलेन लक्षणगुणेनोद्दीपितालङ्कृति-
र्युक्तार्थानुगता प्रसन्नमधुराभिप्रायसम्पादिनी ।
श्रीमच्छङ्करपूज्यपादयतिना टीका निबद्धा स्वयं
तस्यैषा जयमङ्गलेति गदिता कान्तेव भात्यद्भुता ॥

प्रणिपत्य सकलवेदिनमतिदुस्तरभर्तृकाव्यसलिलनिधेः ।
जयमङ्गलेति नाम्ना नौकेव विरच्यते टीका ॥

End :

इत्थमित्यनेन वस्तुनः परिसमापितत्वाच्चेन वर्तमानसामीप्ये वर्तमानवद्वेति भूते लट् । परिजनमभितः उभयपार्श्वस्थितान् भृत्यान् विलोक्य वानरस्य दाहं प्रदिदेश आदिष्टवान् ।

Colophon :

एते प्रकीर्णकश्लोकाः । इति भर्तृकाव्यटीकायां जयमङ्गलायां अधिकारकाण्डे चतुर्थः परिच्छेदः । काव्यस्य मारुतिसमागमो नामाष्टमः सर्गः । समाप्तश्चाधिकारकाण्डः ।

Author—Text : Same as No. 1932.

Com : Śaṅkarapūrvapādayati.

Remarks—The Ms. contains 4 *Paricchedas* in *Adhikārakāṇḍa.* The following verses occur after the end :

पत्न्यावुभयतः पद्मा पयोधिरशना च यम् ।
यं सर्वतो मुनिगणा वन्देऽहं देवपुङ्गवम् ॥
अभितः केशवं गोपा गावस्तं परितः स्थिताः ।
समया तं स्थिता राधा निकषा तां सखीजनाः ॥
हा कृष्णमिति शोचामि कृष्णो मां प्रति सास्तताम् ।
प्रतौ काचिन्नेति रामो बालोऽयं प्रतिभाति मे ॥

अध्याकाशमुपोडुराजि नितरामासन्ध्यमावासरं
मध्येरात्रि वसन्नपांबुजकुलं त्रैलोक्यमाह्लादयन् ।
अभ्यर्णो निधिपोषकैर्निजकरैर्दृश्यो यथावाञ्छितं
पीयूषांशुरयं स्वयं प्रतिदिनं दीनोऽपि देदीप्यते ॥

पायं पायमरंस्त यो व्रजभुवि क्षीरादिकं बालकै-
र्यश्चक्रेण समूलकाषमकषद् बाणस्य बाहागणम् ।
ग्रीवां बालमृणाललावमलुनाच्चैद्यस्य वा भूपते-
रन्वग्भावमपापिनां हृदि वसन् पायात् स वो यादवः ॥

वज्राङ्गसिंहमुखतारककुम्भमुख्यान्
वज्रायुधप्रतिभटानतिघोरवीर्यान्
यः सङ्गरेषु निजया निजघान शक्त्या
स्कन्दं नमामि शिरसा शिखिवाहनं तम् ॥

## ॥ रावणवधम् (जयमङ्गलोपेतम्) ॥

### 1937. RĀVAṆAVADHAM
### with Jayamaṅgalā.

Substance—Palm leaf. Size—16½″ × 1½″. Leaves—28. 7—8 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—6500.

Subject—Same as No. 1922.

Author—Same as No. 1936.

Remarks—Many lacunae are noticeable herein. The Ms. contains *Sargas* 3—20. The leaves are much damaged.

---

## ॥ रावणवधम् (जयमङ्गलोपेतम्) ॥

### 1938. RĀVAṆAVADHAM
### with Jayamaṅgalā.

Substance—Palm leaf. Size—21″ × 2″. Leaves—43. 7—9 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—1375.

Subject—Same as No. 1922.

Author—Same as No. 1936.

Remarks—Several of the leaves are mouldered. The Ms. comprises 3 *Sargas* only.

---

|| रावणवधम् (जयमङ्गलोपेतम्) ||

1939. RĀVAṆAVADHAM
with Jayamaṅgalā.

Substance—Palm leaf. Size—11″ × 2″. Leaves—19
10 lines per page and 32 letters per line.
Script—Malayāḷam. No. of Granthas—380.

Subject—Same as No. 1922.

Author—Same as No. 1936.

Remarks—*Ślokas* 3—47 in the first *Sarga* are commented upon in this work.

---

|| रासक्रीडा ||

1940. RĀSAKRĪḌĀ.

Substance—Palm leaf. Size—8″ × 1½″. Leaves—29.
8 lines per page and 30 letters per line.
Script—Malayāḷam. No. of Granthas—435.
Complete.

Subject—Description of Kṛṣṇa's sports with *Gopikas*.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

आतुङ्गमस्तकमनस्तमितानुभाव-
मातङ्गभारहरमङ्घ्रिसरोजभाजाम् ।

मोदं करोतु शिवयोः सुकृतैकमस्यं
मातङ्गमानुषवपुर्महितं महो वः ॥

*  *  *  *  *  *

व्यासादिभिः कविभिराहृतमादरेण
रासोत्सवं परिमितैः कथयामि पद्यैः ॥

शब्दागमेषु सुलभो न परिश्रमोऽस्ति
विद्वत्प्रमोदजनको न गिरां विलासः ।
उद्वेलमन्तरुदिता सरसीरुहाक्षे
भक्तिः परं जनमिमं मुखरीकरोति ॥

End :

आभीरसुन्दरदृशामतिपुण्यभाजा-
मापूरयन्नभिमतान्यरविन्दनेत्रः ।
उन्निन्द्रचन्द्रसुषमासखमेवमेव
निन्ये गणं निखिलमेष शरन्निशानाम् ॥

विक्रीडितं व्रजवधूनिवहैरिदं य-
श्चक्रायुधस्य कथयत्यनुमोदते वा ।
भक्तस्य तस्य भगवत्पदपङ्कजान्ते
मुक्तिः करे ननु किमत्र विचारणीयम् ॥

Colophon :

Author :

Remarks—The leaves are considerably injured.

## ॥ रुक्मिणीकल्याणम् ॥

## 1941 A. RUKMIṆĪKALYĀṆAM.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 2''$. Leaves—101.
7—8 lines per page and 24 letters per line.
Script—Malayāḷam. No. of Granthas—1100.

Subject—The story of the wedding of Rukmiṇi.

Beginning :

वामालकावल्लभभावमुद्रा-
भीमाविभागेन्द्रमणीशिलेव ।
रोमावली राजति यस्य मध्ये
सोमावतंसः स सुखाय भूयात् ॥

End :

प्रायः कराग्रपरिमर्शनकेलिभिन्न-
प्रालेयसंहतिदुकूलपदावकुण्ठम् ।
अम्भोजबन्धुरलकाभरणं चिरेण
मुग्धं चुचुम्ब मुखमुत्तरदिङ्मृगाक्ष्याः ॥

मलयमरुत्किशोरदरकम्पितमाधविका-
परिमलपूरदूरपरिमग्नजगन्ति चिरम् ।
मधुदिनवैभवानि मधुसूदन एष दृशा
किमपि कृतार्थयन् व्यहृत कैतकपत्रदृशा ॥

Colophon :

इति श्रीदन्तिद्योतिदिवाप्रदीपाङ्कसत्यमङ्गलरत्नखेटश्रीनिवा-
सदीक्षितस्य कामाक्षिगर्भसम्भवस्य श्रीमदर्धनारीश्व-

रदीक्षितगुरुचरणसहजतालब्धविद्यावैशद्यस्य श्रीराजचूडामणि-दीक्षितस्य कृतिषु श्रीरुक्मिणीकल्याणनाम्नि काव्ये दश-मस्सर्गः ।

Author—Rājacūḍāmaṇidīkṣita.

Remarks—The Ms. is of recent origin.

---

॥ युद्धकाण्डचम्पूः ॥

## 1941 B. YUDDHAKĀṆḌACAMPŪ.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 2''$. Leaves—12. 8 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—140.

Subject—Description of the war between Rāma and Rāvaṇa.

Beginning:

भव्यारम्भाय भूयादव्याजकरुणानिधिः ।
सव्यार्धालोकने नम्रा दिव्यां या कापि देवता ॥

समीरणापूरितबाणरन्ध्र-
सम्पन्नसप्तस्वरसारमस्य ।
यत्कीर्त्तिमुद्रायति सप्तसाली
वीराय तस्मै विहितः प्रणामः ॥

भोजेन रामचरितं ग्रथितं निशैकया ।
एकेन पूरयत्यह्ना श्रीचूडामणिदीक्षितः ॥

अनन्तरमनिन्दितामवनिनन्दनायाः कथां
प्रभञ्जनतनूभुवः प्रभुरसौ समाकर्णयन् ।
कटाक्षरुचिरेखया कलयति स्म धीरोद्धतं
शरासनमताल्लिकां समधिरोपितज्यामिव ॥

End :

संश्लिष्यन् भरतं पदाग्रविनतं शत्रुघ्नमप्यादरा-
न्मातॄणामविशेषतस्सविनयं पादौ स्पृशन्मौलिना ।
सर्वानप्यनुरञ्जयन् पुरजनान् साम्राज्यसिंहासने
वीरोऽसौ विहिताभिषेचनविधिर्विश्वं ररक्षाक्षतम् ॥

Colophon :

श्रीरामाय नमः ।

इति श्रीदन्तिवक्त्रोनिदिवाप्रदीपाङ्कसत्यमङ्गलरत्नखेटश्रीनिवा-
दीक्षिततनयस्य कामाक्षीगर्भसम्भवस्य श्रीमदर्धनारीश्वरदीक्षि-
तगुरुचरणसहजतालब्धविद्यावैशद्यस्य श्रीराजचूडामणिदीक्षित-
स्य कृतिष्वेकदिवससन्दब्धा युद्धकाण्डचम्पूः सम्पूर्णा ।

Author—Rājacūḍāmaṇidīkṣita.

Remarks—It is clear from the intoductory portion that the work was composed in one day.

---

॥ वरवर्णिनी (शुकसन्देशव्याख्या) ॥

1942. VARAVARṆINĪ.

Commentary on Śukasandeśa.

Substance—Palm leaf. Size—10½"×2". Leaves—56.

11—12 lines per page and 44 letters per line. Script—Malayalam. No. of Granthas—1800.

Subject—Explication of the Śukasandeśa.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

तत्प्रणौम्यक्षि तार्तीयं धाम्नः स्त्रीपुंसलक्ष्मणः ।
शूलिस्मरौ यदर्धाभ्यां जिग्यतुः स्मरशूलिनौ ॥

अथवा प्रारिप्सितामेव देवतां परामृशामः ।

सहृदयजनैरुपास्या सद्यः परनिर्वृतिं वितन्वाना ।
काव्यमिति कापि विद्या वागर्थाभ्यां वपुष्मती जयति ॥

अपिच—

माधुर्यमञ्जुरवसौरभमात्रसारा-
ण्यङ्गैर्विना धृतवतो जयसाधनानि ।
अर्वाचि पर्वणि निवेशितशर्वगर्वं
नैसर्गिकं जयति नैपुणमङ्गयोनेः ॥

लक्ष्मीदासकवेः क लङ्घितवियद्गङ्गातरङ्गा गिरः
क्लिष्टोन्मेषतयानुदीर्णविषया दृष्टिः कचास्मादृशाम् ।
तासामेव तथापि वीक्ष्य विकटोल्लासं प्रसादं गुणं
व्याख्याने प्रयतामहे सहृदयास्तत्र प्रसीदन्तु नः ॥

....... ..... ...

....... ...... ...

दूत्त्वाद् युवतिसाधर्म्याद् वर्णनाद्गुरवस्तुनः ।
भविष्यत्याख्यया लोके व्याख्यैषा वरवर्णिनी ॥

प्रबन्धमुखं प्रारभामहे व्याख्यातुम् ।

End:

लक्ष्मीमित्येवं लक्ष्मीपददर्शनात् सर्वत्रापि सतां कर्माणि काव्यनिर्माणादीनि मङ्गलोपक्रमाणि मङ्गलमध्यानि मङ्गलपर्यन्तान्येव भवन्तीति मङ्गलदेवतावाचकलक्ष्मीशब्दमादिमध्यावसानेषु प्रयुञ्जानस्य महाकवेराशय इति शिवम् ।

Colophon:

लक्ष्मीदासपदेन लोकविदितः काव्येषु लब्धश्रमो
भारत्या सह वश्यया परिलसन् यस्य प्रबन्धा कविः ।
शृङ्गाररस्य च गोचरः सहृदयग्राह्यो रसग्रामणीः
सर्वोत्तीर्णतयेदमुल्लसति नः सन्देशकाव्यामृतम् ॥

Author—Text: Lakṣmīdāsa.
Com: Dharmagupta.

Remarks—*Ślokas* 1—6 and 74 in the *Pūrvabhāga* and 1—7 and 80—90 in the *Uttarabhāga* are commented upon in this Ms.

## ॥ वर्णनासारसंग्रहः ॥

### 1943. VARṆANĀSĀRASAṄGRAHA.

Substance—Palm leaf. Size—16″ × 2″. Leaves—92. 7 lines per page and 48 letters per line. Script—Grantha. No. of Granthas—1925.

Subject—Same as No. 1757.

Beginning :

पार्श्वे त्यक्त्वा... ...मकानां... ...दिवमाधिपोऽपि
प्रा· · ·· ·· च्या ·· ··विश्लेष ··भाताम् ।
... ... खिनि हीयमानेऽप्यग्रे रिपु...निधातुम् ॥
अग्रे विनश्यत्यपि ... ...परा ।
.... ... ... परा दशा ॥
वृते परतया लौ च्छायया निववृते जगति
सात् सम्पदीव
प्रस्ताव.....प्रवसनेन पूर्णा-
... ...व्यावर्तिता ... .... भासु ।
काश्चित् ततो व्यवसिताः पुर एव गन्तुं
रागाकुला निजनिवर्तनशङ्कयेव ॥ ५ ॥

End :

मन्देहलोकमखिलं मम तु ... ...
.... ....श्वासपूर इव नीरजलोक ·· ...
भाति ... ···विव... ···परस्तुपारः ।
क... ...कृत्वा... ....भुजङ्गश्लथबन्धे
सुदती.... ...सुमेरौ ॥

सहसैव तदाहरत् समीरश्रम
...तार्क्षं विस्रस्तबन्धं
कु...प्रियवद् व्यलासीत
अमी भित... ...काशदम्भैः स्थिराः ॥

Colophon :

Author :

Remarks—The Ms. commences on a description of night and ends on that of dawn. Many leaves are damaged.

---

## ॥ वर्णनासारसंग्रहः ॥

### 1944. VARṆANĀSĀRASAṄGRAHA.

Substance—Palm leaf. Size—16″ × 2″. Leaves—116. 7—8 lines per page and 60 letters per line. Script—Malayāḷam. No. of Granthas—3250. Incomplete.

Subject—Same as No. 1943.

Beginning :

कस्तूरीयन्ति फाले नयनकमलयोः कज्जलीयान्ति कण्ठ-
प्रान्ते नीलोत्पलीयन्त्युरसि मरतकालङ्कृतीयन्ति देव्या ।
रोमालीयन्ति नाभेरुपरि हरिरणीमेखलीयन्ति मध्ये
ये ते शर्म क्रियासुस्त्रिपुरविजयिनः कण्ठभासां प्ररोहाः ॥

सकलभुवनबन्धोर्वैरमिन्दोस्सरोजै-
रनुचितमिति मत्वा यः स्वपादारविन्दम् ।
घटयितुमिव मायी योजयत्याननेऽस्मै
वटदलपुटशायी मङ्गलं वः कृषीष्ट ॥

End :

अग्रे किञ्चिद् ग्रथितकबरं धौतरागाधरोष्ठं
पाथोलेशैः स्तनकलशयोर्न्यस्तानिस्सुग्रहारम् ।

स्नानस्यान्ते परिहितसितक्षौममङ्गं मृगाक्ष्या-
श्चित्ते भित्तौ विलिखितमिदं शिल्पिना मन्मथेन ॥

सायंकालवर्णना ।

प्राच्या निजोदयनिदानपरिग्रहायाः
पर्युत्सुकत्वपरितापविनोदनाय ।
पत्या रुचां... ...तां प्रहितेव दूती
छाया शनैरभिमुखं चलति स्म तस्याः ॥
छायाश्चचाल

Colophon :

Author :

Remarks—The leaves are much damaged.

---

## ॥ वासुदेवविजयम् (पदचन्द्रिकोपेतम्) ॥

## 1945. VĀSUDEVAVIJAYAM
with the commentary, Padacandrikā.

Substance—Palm leaf. Size—$14\frac{1}{2}'' \times 2''$. Leaves—92. 10 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas—2900.

Subject—The story of Kṛṣṇa.

Beginning

श्रीमद्गिरीशवाग्व्यासगुरुशाब्दिकमूर्तये ।
नमोऽस्तु पत्ये भूतानां सदानन्दचिदात्मने ॥
मत्स्यकच्छपभूदारनृसिंहवटुविग्रहम् ।
नौमि रामत्रयकृष्णकल्किरूपमधोक्षजम् ॥

कुन्दस्मनमनोहारिमन्दहासविराजितम् ।
नन्दगोपकुलोत्तंसमिन्दिरारमणं भजे ॥
काव्यं मया वासुदेवविजयाख्यमकारि यत् ।
व्याख्यापि तस्य तन्वीयं क्रियते पदचन्द्रिका ॥

End :

प्रतीच्या मुखे सन्ध्यापयोदरुचिलोहितकेर......अवतमसं वि-
रळं तमः ।

कल्याणवेणुदळश्रृङ्गमिळन्ति..................................
............बभावे.........लोहितक इति रक्त इति कन्न् कळकळ...
... ... ... ... ...

Colophon :

इति वासुदेवकृते वासुदेवविजयव्याख्याने पदचन्द्रिकायां
चतुर्थः सर्गः ।

Author—Vāsudeva.

Remarks—Both the beginning and end are worn out. This Ms. contains 5 *Sargas* only. A few leaves are partly damaged. The commentary is written by the author himself.

---

## ॥ वासुदेवविजयम् (पदचन्द्रिकोपेतम्) ॥

### 1946. VĀSUDEVAVIJAYAM
### with the commentary, Padacandrika

Substance—Palm leaf. Size—5½"×1⅓". Leaves—79. 9 lines per page and 72 letters per line. Script—Malayāḷam. No. of Granthas—2900.
Subject—Beginning : Same as No. 1945.

End :

दळं पर्णवाद्यं निनादैरिति । इत्थंभूतलक्षणे तृतीया । नौगदेति अवभावे घञ् लोहितक इति रक्त इति कन् । काळक इति काळाच्चेति कन् । अवतमसेति । अवसमन्धेभ्यस्तमस इत्यच् समासान्तः ।

Colophon—Author : Same as No. 1945.

Remarks—The Ms. ends on a fragment of the 5th *Sarga.* It appears to be a copy of No. 1945.

---

## ॥ विदग्धजनवल्लभा ॥

## 1947. VIDAGDHAJANAVALLABHĀ.

Substance—Palm leaf. Size—21½″ × 2″. Leaves—74. 8 lines per page and 72 letters per line. Script—Malayāḷam. No. of Granthas—2700.

Subject—Hortatory verses in different metres.

Beginning :

अभिप्रेतार्थसिद्धयर्थं पूजितो यः सुरैरपि ।
सर्वविघ्नच्छिदे त... .... ....ये नमः ॥
मह्लाण.... .... .... ।
........जनवल्लभेति विख्याताम् ॥
यद्यप्यन्या रचिता सूक्तानां कविभिरावलिर्बहुशः ।
उत्सृज्य यथा विबुधैः मात्सर्यं प्रेक्षणीयेयम् ॥
रचिताय स्वाद... ... ...देशीयैः ।
प्रथममनुष्टुब्रचिता पश्चादार्या ततोऽन्यवृत्तानि ॥

यद्यत्स्वल्पं तेषां प्रतिपद्धति तत्तद्देवादौ ।
इह तु नमस्कृतिरग्रे... ... ||...

End:

जय सत्यामृत विष्णो तमसः पारे व्यवस्थितं देवम् ।
सर्वाकारमपारं त्वामेवाहं गतः शरणम् ॥
याचेऽहं याचेऽहं हर तव चरणारविन्दयोर्भक्तिम् ।
याचेऽहं याचेऽहं पुनरपि तामेव तामेव ॥
बन्धच्छेदादिह तनुभृतां यत्त्वया साकमैक्यं
सा चेन्मुक्तिः शिव किमनया यातु यत्रान्धकूपः ।
त्वं चेत्स्वामी भवदनुचरः शर्व यत् सर्वदाहं
तद्धि श्लाघ्यं सपदि पदवीं कामयन्ते न भृत्याः ॥
(भट्टहलायुधस्य)

विदग्धवल्लभाख्येयं सत्सुभाषितमञ्जरी ।
नाम्ना वल्लभदेवेन कृता काश्मीरवासिना ॥

Colophon:

इति मह्लाणदेवात्मजवल्लभविरचितायां विदग्धजनवल्लभाभिधानायां सुभाषितावलौ भगवदाक्रन्दपद्धतिः । समाप्ता चेयं सुभाषितावलिः ।

Author—Vallabha, son of Mahlāṇadeva.

Remarks—The Ms. contains a rare collection of didactic verses culled from the works of Kālidasa, Bhartṛhari, Bhaṭṭahalāyudha and other celebrated poets. The leaves are damaged.

## ॥ विद्युल्लता (मेघसन्देशव्याख्या) ॥

## 1948. VIDYULLATĀ.

Commentary on Meghasandeśa.

Substance—Palm leaf. Size—$15\frac{1}{3}'' \times 1\frac{1}{2}''$. Leaves—46. 9 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—1450.

Subject—Explication of the Meghasandeśa.

Beginning:

......न्येनोक्तिरित्यभ्युपगमे विषयविशेषप्रकाशनार्थः विधिवशात् दैववशादिति अप्रतिकर्तव्यतां द्योतयति । दूरबन्धुः दूरे बन्धुर्यस्य सः धर्मार्थे...यैः...समाविश्वासकारिणी नहि भार्यासमं मित्रमिति च । तदतिशायिनो बन्धोरभावाद् भार्यैवात्र बन्धुरित्युक्तमभूत् । रघुवंशे वैदेहिबन्धो हृदयं... ... ...

End:

कातरत्वं दुःखानुभूतावधीरितां लोकवृत्तमवेक्ष्यापि त्वया धैर्यमवलम्बनीयमित्याह—कश्चिदिति । त्रैलो........पुरन्दरादिषु देवविशेषेष्विति । वृत्रवधादौ स्वपदभ्रंशप्रत्यापत्त्याद्यतीतकालवर्तमानेषु च त . ... .... ... ... ...

Colophon:

Author—Pūrṇasarasvatī.

Remarks—The Ms. commences on the 7th verse in the *Pūrvabhāga* and ends on the 42nd in the *Uttarabhāga*. A few leaves in the middle are missing.

## ॥ विलासिनी (कृष्णविलासव्याख्या) ॥

## 1949. VILĀSINĪ.

Commentary on Kṛṣṇavilāsa.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 2''$. Leaves—80. 10 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—1400.

Subject—Elucidation of the Kṛṣṇavilāsam.

Beginning:

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।

गुरुणा भूसुरेन्द्रेण कल्पितं क्षेत्रमुत्तमम् ।
अध्यासीनं नमस्कुर्वे सर्वेशं चन्द्रशेखरम् ॥
श्रीनारायणगुरुवरकरुणापात्रेण पाणिवादेन ।
श्रीकृष्णविलासस्य क्रियते टीका विलासिनी नाम ॥

End:

वरः प्रसिद्धचन्द्रादन्यः शशाङ्कश्चन्द्रमा इव । सामान्यचन्द्रस्तु विरहिप्राणिनां सन्तापकरत्वान्न प्रीतिहेतुः । अतस्ततो व्यतिरेक इति सकलमवदातं मङ्गलम् ।

Colophon:

इति रामपाणिवादविरचितायां विलासिन्याख्यायां श्रीकृष्णविलासव्याख्यायां तृतीयस्सर्गः ।

प्रालेखि पुस्तकं चेदं गुहपादाब्जसेविना ।
शृङ्गारगेहनिलये वसता कृष्णशर्मणा ॥
हरिगीतपुराधिवासलोलं
गिरिजाकान्तमुखारविन्दसूर्यम् ।

अखिलार्त्तिनिवारणाय नित्यं
कलये तारकमारकं कुमारम् ॥

ग्रामे श्रीहरिगीतिनामनि गृहे शृङ्गारवल्ल्याह्वये
भारद्वाजमुनीश्वरप्रवरके श्रीभार्गवर्षेः कुले ।
सूत्रं स्वाच...ताश्वलायनमुनेर्नारायणाख्यावता
श्रीदुर्गागुहपादपङ्कजजुषा प्रालेख्यदः पुस्तकम् ॥

Author—Rāmapāṇivāda.

Remarks—The commentary concludes with the 9th *Sarga*. A few leaves at the end are blank. The colophon furnishes the name of the scribe.

---

## ॥ विवरणम् (कुमारसम्भवव्याख्या) ॥

### 1950. VIVARAṆAM.

Commentary on Kumārasambhava.

Substance—Palm leaf. Size—14″ × 1¾″. Leaves—200. 9 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—5000.

Subject—Elucidative exposition of the Kumārasambhava.

Author—Nārāyaṇa Paṇḍita.

Remarks—The work is printed as Nos. 27 and 32 in TSS. The commentary extends up to the 59th verse in the 5th *Sarga*. The codex is in fairly good condition.

॥ वैराग्यशतकम् ॥

## 1951. VAIRĀGYAŚATAKAM.

Substance—Palm leaf. Size—10″ × 2″. Leaves—11. 9 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—175.

Subject—Abnegation of worldly pleasures.

Author—Bhartṛhari.

Remarks—The script is legible. The Ms. includes also a few verses in the Nītiśataka.

---

॥ वैराग्यशतकम् ॥

## 1952. VAIRĀGYAŚATAKAM.

Substance—Palm leaf. Size—14¼″ × 1½″. Leaves—18. 9 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—525.

Subject etc.—Same as No. 1951.

Remarks—The Ms. embodies 83 verses in *Vairāgya-śataka* after the close of the *Nīti* and *Śṛṅgāra Śatakas*.

॥ शङ्कराचार्यचरितम् ॥

## 1953. ŚAṄKARĀCĀRYACARITAM.

Substance—Palm leaf. Size—$11\frac{1}{2}'' \times 2''$. Leaves—24. 9—11 lines per page and 42 letters per line. Script—Malayāḷam. No. of Granthas—450.

Subject—An abbreviated account of Śrī Śaṅkarācārya's life.

Beginning :

हरिः। श्रीगणपतये नमः । अविघ्नमस्तु ।
गणेशाय नमस्तस्मै यत्प्रसादद्विवस्वता ।
प्रत्यूहध्वान्तविध्वंसः क्रियेत सर्वकर्मणाम् ॥
मदीयरसनारङ्गनटनेषु समुत्सुका ।
एषा सरस्वती भूयात् सतामानन्ददायिनी ॥
समाश्रितपदाम्भोजजनतासुरपादपः ।
सर्वं मम शुभाभीष्टं पूरयेत् पार्थसारथिः ॥
क्षिप्त्वाज्ञानतमोराशिं पदार्थानथ दर्शयन् ।
गुरुरत्नप्रदीपो मे मनोधामनि भासताम् ॥
विष्णुलीलामृतानां ते कर्तारः कविपुङ्गवाः ।
जयन्ति सुतरां लोके वाल्मीकिव्यासशङ्कराः ॥

* * * * * *

यतीन्द्रं निर्मलात्मानं नानाविधकथाविदम् ।
शिष्यभूतो यतिः कश्चित् पप्रच्छ जनितादरः ॥

शिष्यः—

सर्वेषां गुरुरस्माकं सर्वज्ञो यतिपुङ्गवः ।
जातः श्रीशङ्कराचार्यः कस्मिन्देशे सुपावने ॥

आरभ्य जन्मतः कस्मिन् वत्सरे भिक्षुतामगात् ।
केषां निबन्धनानाञ्च कर्त्ताभूत् स यतीश्वरः ॥

End :

तस्मात् कल्मषवृन्दतस्सकलतः श्रीशङ्कर... ...
... .... ....स्तोत्रं प्रबोधप्रदम् ।
निर्दग्धाखिलपापवृन्दविपिनं संक्षिप्तमेतन्नरा
ये शृण्वन्ति.... .... .... .... ॥ (१)
ते लब्ध्वा भुवि सम्पदञ्च सकलामन्ते लभन्तेऽमृतम् ।

Colophon :

इति श्रीशङ्कराचार्यचरिते नमोऽस्य.... ... ....

Author—Govindanātha.

Remarks—The last Fol. is injured. The Ms. is identical with No. 3790, TCM, Vol. IV, Part 1 C.

## ॥ शब्दार्थदीपिका (किरातार्जुनीयव्याख्या) ॥

### 1954. ŚABDĀRTHADĪPIKĀ.

Commentary on Kirātārjunīya.

Substance—Palm leaf. Size—$21\frac{1}{2}'' \times 2\frac{1}{2}''$. Leaves—110. 8—11 lines per page and 68 letters per line. Script—Malayāḷam. No. of Granthas—4200.

Subject—Explication of the Kirātārjunīya.

Author—Citrabhānu.

Remarks—The leaves are much old and damaged. The script is legible and neat.

## ॥ शब्दार्थदीपिका (किरातार्जुनीयव्याख्या) ॥

### 1955. ŚABDĀRTHADĪPIKĀ.

Commentary on Kirātārjunīya.

Substance—Palm leaf. Size—15″ × 2½″. Leaves—129. 9 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—3500.

Subject etc.—Same as No. 1954.

Remarks—The first two *Sargas* are commented upon herein. The work has been published as No. 63 in TSS.

---

## ॥ शान्तिविलासम् ॥

### 1956. ŚĀNTIVILĀSAM.

Substance—Palm leaf. Size—7″ × 2″. Leaves—11. 8 lines per page and 22 letters per line. Script—Malayāḷam. No. of Granthas—120.

Subject—Apophthegmatic verses conducive to renunciation.

Author—Nīlakaṇṭhadīkṣita.

Remarks—This Ms. is identical with No. 1428 (d), TCM, Vol. II, Part I B. It has been printed at NSPP.

## ॥ शिवलीलार्णवः ॥

## 1957. ŚIVALĪLĀRṆAVA.

Substance—Palm leaf. Size—16″ × 2″. Leaves—91. 8 lines per page and 66 letters per line. Script—Malayāḷam. No. of Granthas—3000.

Subject—Description of the sportive manifestations of Śiva.

Author—Nīlakaṇṭhadīkṣita.

Remarks—The work has been published as No. 4 in TSS.

---

## ॥ शिवलीलार्णवः ॥

## 1958. ŚIVALĪLĀRṆAVA.

Substance—Palm leaf. Size—16″ × 2½″. Leaves—96 10 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas—3000.

Subject etc.—Same as No. 1957.

Remarks—The following verses are quoted after the colophon:

अपाङ्गरिङ्खत्करुणातरङ्गमनुक्षणस्मेरमुखारविन्दम् ।
आपीनवक्षोरुहलोलहारमालोकये धाम पुनः कदाहम् ॥
श्रेयांसि मे दिशतु चन्द्रकलावतंसः ।
श्यामाकार्मुकशेखरो भवतु नः श्यामारुणः श्रेयसे ।
इत्थं भर्तरि भावगोपनपरा गौरी चिरं पातु नः ।

कुवल(य)बन्धुविभूषण. . . .
जटाजूटं बिभ्रत् कुहचिदपरत्राद्भुतकच-
स्तथैकस्मिन् भागे भसितमपरत्रात्तघुसृणः ।
फणीन्द्रं कस्मिंश्चिन्मणिगणधरोऽन्यत्र भगवान्
गिरीशः श्रेयो नः प्रदिशतु शिवामिश्रितवपुः ॥

पुटितनलिनसंस्थममौ. . . . .
गलदमृतरसार्द्रं चन्द्रवह्न्यर्कनेत्रम् ।
स्वकरकलितमुद्रापाशवेदाक्षमालं
स्फटिकरजतमुक्तागौरमीशं नमामि ॥

सदपायकथास्वपण्डितो हृदये दुःखशरेण वेष्टितः ।
. . .  ....  . . .शरणं यामि शरण्यमीश्वरम् ॥
शरणं तरुणेन्दुशेखरः शरणं मे गिरिराजकन्यका ।
शरणं पुनरेव तावुभौ शरणं नान्यमुपैमि दैवतम् ॥

. . . मृतायते भवान् शवमुण्डाभरणोऽपि पावनः ।
भव एव भवान्तकः सतां समदृष्टिर्विषमेक्षणोऽपि सन् ॥

अपि शूलधरो निरामयो दृढवैराग्यरतिश्च रागवान् ।
अपि भैक्षचरो महेश्वरः किमिदं चित्रमिदं हि ते प्रभो ॥

## ॥ शिशुपालवधम् ॥

## 1959. ŚIŚUPĀLAVADHAM.

Substance—Palm leaf. Size—13″ × 1¼″. Leaves—77.

8—9 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—2300.

Subject—The story of the destruction of Śiśupāla.

Author—Māgha.

Remarks—The following stanza occurs after the colophon:

"श्रियं यशोदाकमितुर्यदूत्तमा-
न्मुकुन्दरत्नक्रयमूल्यसम्बिका ।
सुवर्णवत् कंसशिलापरीक्षण-
प्रकृष्टतेजोमहिमा कृषीष्ट वः" ॥

The work is printed in NSPB. with the commentary, Sarvaṅkaṣā.

## ॥ शिशुपालवधम् ॥

### 1960. ŚIŚUPĀLAVADHAM.

Substance—Palm leaf. Size—14″ × 1¼″. Leaves—69. 6—8 lines per page and 40—48 letters per line. Script—Malayāḷam. No. of Granthas—1325.

Subject etc.—Same as No. 1959.

Remarks—The Ms. ends on the 12th verse in the 11th *Sarga*.

## ॥ शिशुपालवधम् ॥

### 1961. ŚIŚUPĀLAVADHAM.

Substance—Palm leaf. Size—14″×2″. Leaves—48. 7—10 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—1225.

Subject etc.—Same as No. 1952.

Remarks—The Ms. commences on a fragment of the 11th *Sarga*. The following portion occurs after the end:

തൊള്ളായിരത്തിഅറുപത്തിമൂന്നാമാണ്ടു് മീനമാസം രണ്ടാം തീയതി എഴുതിത്തീൎത്തു. നെടുമങ്ങാട്ടു കൊച്ചുതമ്പുരാൻവക ലിഖിതം.

---

## ॥ शिशुपालवधम् ॥

### 1962. ŚIŚUPĀLAVADHAM.

Substance—Palm leaf. Size—7½″×1½″. Leaves—87. 8—10 lines per page and 30 letters per line. Script—Malayāḷam. No. of Granthas—1350.

Subject etc.—Same as No. 1959.

## ॥ शिशुपालवधम् ॥

### 1963. ŚIŚUPĀLAVADHAM.

Substance—Palm leaf. Size—7″×1½″. Leaves—93.

8 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—1100. Incomplete.

Subject etc.—Same as No. 1959.

Remarks—The Ms. contains 9 *Sargas* only.

## ॥ शिशुपालवधम् ॥

## 1964. ŚIŚUPĀLAVADHAM.

Substance—Palm leaf. Size—10½″ × 1¼″. Leaves—65. 8 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—1100.

Subject etc.—Same as No. 1959.

Remarks—A few leaves are damaged. The Ms. contains 9 *Sargas* only.

## ॥ शिशुपालवधम् ॥

## 1965. ŚIŚUPĀLAVADHAM.

Substance—Palm leaf. Size—6½″ × 1½″. Leaves—55. 10 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—920.

Subject etc.—Same as No. 1959.

Remarks—The Ms. comprises *Sargas* only. Most of the leaves are worn out.

## ॥ शिशुपालवधम् ॥

### 1966. ŚIŚUPĀLAVADHAM.

Substance—Palm leaf. Size—$7\frac{1}{4}'' \times 1\frac{3}{4}''$. Leaves—48. 8 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—550.

Subject etc.—Same as No. 1959.

Remarks—The Ms. embodies the first two *sargas* only. A few lines from Amarakośa are quoted after the colophon.

---

## ॥ शिशुपालवधम् ॥

### 1967. ŚISUPĀLAVADHAM.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—52. 7 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—650.

Subject etc.—Same as No. 1959.

Remarks—The Ms. contains 6 *Sargas* only.

---

## ॥ शिशुपालवधम् ॥

### 1968. ŚIŚŪPĀLAVADHAM.

Substance—Palm leaf. Size—$15\frac{1}{2}'' \times 2''$. Leaves—8. 12—13 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—350.

Subject etc.—Same as No. 1959.

Remarks--The Ms. contains *Sargas* 5—7 only.

## ॥ शिशुपालवधम् ॥

### 1969. ŚIŚUPĀLAVADHAM.

Substance—Palm leaf. Size—6″ × 1½″. Leaves—15. 6—8 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—125.

Subject etc.--Same as No. 1959.

Remarks—The Ms. embodies the first *Sarga* only.

## ॥ शिशुपालवधम् (सारसंग्रहोपेतम्) ॥

### 1970. ŚIŚUPĀLAVADHAM

with the commentary, Sārasaṅgraha.

Substance—Palm leaf. Size—15″ × 2″. Leaves—49. 9 lines per page and 60 letters per line. Script—Malayāḷam. No. of Granthas—1650.

Subject—Same as No. 1959.

Beginning:

यियक्षुणा तदाहूतः पार्थेनाथ द्विषन्मुरम् ।
आभिचैद्यं प्रतिष्ठासुरासीत् कार्यद्वयाकुलः ॥

अथ मुनिवचनानन्तरं द्विषन्मुरं मुरारिः अभिचैद्यं प्रातिष्ठासुः चैद्यं प्रति युद्धाय प्रस्थातुमिच्छुः तदा तस्मिन्नेव काले यियक्षुणा

यष्टुमिच्छता पार्थेन युधिष्ठिरेणाहूतः पार्थाह्वानात्तमपि जिगमिषु-रित्यर्थो लभ्यते। तस्मात् कार्यद्वयाकुलः आसीत्। किमिदं करोमि उत इदमिति संशेते स्मेत्यर्थः। इह सर्गे मन्त्रविचारो विधास्यते।

End:

जलधेः पुनरत्यर्थं मन्दरेण... थित एकपर्वतेनापि मथितस्य बलस्य सर्वदा धृताः संपदः शोभाश्च येन समुद्रस्य पुनश्चिरकालं बहु... ...विगता निवृत्ता श्रीः हरिप्रियास्येति महदेवान्तरम्। व्यतिरेकालङ्कारः। नजभग... ...तास्त्रिजगणा रगणो रुचिरं विजानते इति शुभम्।

Colophon:

इति श्रीमत्कृष्णद्वैपायनभट्टसूनुना देवराजाचार्येण विर-चिते सारसंग्रहाख्ये माघव्याख्याने तृतीयः सर्गः।

Author—Text: Same as No. 1959.

Com: Devarājācarya.

Remarks—The commentary is simple and exhaustive. *Sargas* 2 and 3 are commented upon herein.

---

## ॥ शिशुपालवधव्याख्या ॥

## 1971. ŚIŚUPĀLAVADHAVYĀKHYĀ.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—7. 9 lines per page and 40 letters per line. Script—Malayalam. No. of Granthas—175.

Subject—Explication of the Śiśupālavadha.

Beginning:

गणपतये नमः ।

जगन्त्ययवन्तं धृतशङ्खचक्रं
पतिं रमाया हरिनीलनीलम् ।
नमामि नाळीकदळायताक्षं
हरिं हरन्तं स्मरतामघौघम् ॥

वाचं नो दुष्टवार्ताकथनकलुषितां माघकाव्यस्य साक्षा-
द्व्याख्याव्याजेन लक्ष्मीपतिचरितकथापाथसा धावयिष्ये ।
इत्थं संकल्प्य बुद्ध्या विर(च)यितुमिदं प्रारभे नैव भूयो
विद्यादर्पात्तदेतद् भुवि विमलधियस्सूरयो धारयन्तु ॥

प्रारिप्सितस्य प्रबन्धस्याविघ्नेन परिसमाप्त्यर्थमात्मेष्टदेवतां श्रीपतिमनुस्मृत्य माघः कविरविद्यमानदोषमशेषगुणनिधानमनितरसाधारणं नारायणनायकं नग....माद्विवर्णनोपेतमसंक्षिप्तरसभावनिरन्तरं सर्वज्ञत्वसम्पादनं श्रीशब्दाङ्कितसकलसर्गावसानं श्राव्यं काव्यं शिशुपालवधाभिधानं कुर्वन्नाशीर्नमस्क्रियावस्तुनिर्देशो वापि तन्मुखमित्याप्तवचनानुरोधेन तावद्वस्तुनिर्देशं करोति श्रियः पतिरिति ।

End:

'महती नारदस्य स्यादि'ति वैजयन्त्यामुक्तम् । स्वव्यापारमन्तरेणापि वायोराघट्टनया पृथक् स्वयं प्रवृत्तैर्नियतश्रुतिभिः स्वरैर्व्यक्तीभवद्ग्रामविशेषमूर्च्छनामात्मवीणां मुहुर्मुहुः स्नेहातिशयादवेक्षमाणं मुनिं नारदमित्यवोधीति पूर्वेण सम्बन्धः । अनेन श्लोकेनात्मनो भगवद्भक्तत्वं माघः प्रदर्शितवान् । निवर्तते ॥

Colophon :

Author :

Remarks—10 verses in the first *sarga* are explained in this work. The leaves are damaged.

---

## ॥ शुकसन्देशः ॥

## 1972. ŚUKASANDEŚA.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—27. 8 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—350.

Subject—A lyric poem wherein a parrot plays the part of a messenger.

Beginning :

श्रीगणपतये नमः ।

लक्ष्म्या रङ्गे शरदि शशिनः सौधशृङ्गे कयोश्चित्
प्रेम्णा यूनोस्सह विहरतोः पेशलाभिः कलाभिः ।
हाराश्लेषः क्वनु हतविधेर्दूरनीतः स तस्याः
श्रान्तः स्वप्ने शुकमिति गिरा श्राव्यया सन्दिदेश ॥

End :

एवं सख्यौ मयि विशरणे संश्रिते प्राणरक्षां
संपाद्य त्वत्प्रणयकरुणापौरुषाणि प्रथन्ताम् ।
स्वप्नेऽप्येवं प्रियजनवियोगार्तिमप्राप्तयोर्नौ
भ्रातस्तूर्णं भवतु च पुनर्दर्शनानन्दलक्ष्मीः ॥

Colophon :

समलिखदिति पट्टनोक्तं
कविना केनापि मदननुन्नेन ।
बहुरसमधिकमनोज्ञं
शुकसन्देशं हुताशनो विहितम् ।

Author—Lakṣmīdāsa.

Remarks—The Ms. is available in print. The word "लक्ष्मी" occurring at the beginning and close of the work is reminiscent of the author.

## ॥ शुकसन्देशः ॥

### 1973. ŚUKASANDEŚA.

Substance—Palm leaf. Size—9" × 1½". Leaves—22. 8 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—350.

Subject etc.—Same as No. 1972.

Remarks—A few verses from the Candrāloka are cited at the end.

## ॥ शुकसन्देशः ॥

### 1974. ŚUKASANDEŚA.

Substance—Palm leaf. Size—14½" × 1¾". Leaves—12. 8—10 lines per page and 52 letters per

line. Script—Malayāḷam. No. of Granthas—350. Complete.

Subject etc.—Same as No. 1972.

Remarks—The leaves are old and damaged.

---

॥ शुकसन्देशः ॥

## 1975. SUKASANDESA.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 1''$. Leaves—22. 6 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—165.

Subject etc.—Same as No. 1972.

Remarks—The script is legible. The Ms. contains the *Pūrvasandeśa* and 3 verses in the *Uttarasandeśa*.

---

॥ शुकसन्देशः ॥

## 1976. ŚUKASANDESA.

Substance—Palm leaf. Size—$4\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—27. 7 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas—190.

Subject etc.—Same as No. 1972.

Remarks—The script is legible. The leaves are much damaged. The Ms. ends abruptly on the 16th verse in *Uttarasandeśa*.

---

॥ शुकसन्देशः ॥

1977. ŚUKASANDEŚA.

Substance—Palm leaf. Size—9¾" × 1¼". Leaves—9.
11—12 lines per page and 40 letters per line.
Script—Malayāḷam. No. of Granthas—250.

Subject etc.—Same as No. 1972.

Remarks—The Ms. contains the *Pūrvasandeśa* and 41 verses in the *Uttarasandeśa*. The leaves are damaged.

---

॥ शृङ्गारशतकम् ॥

1978. ŚṚṄGĀRAŚATAKAM.

Substance—Palm leaf. Size—7" × 2".
11 lines per page and 22 letters
Script—Grantha. No. of Granthas

Subject—Same as No. 1757.

Author—Bhartṛhari.

Remarks—The work is printed in NSPB. The first 95 *ślokas* are embodied herein.

॥ शृङ्गारसप्तशती ॥

1979. ŚṚṄGĀRASAPTAŚATĪ.

Substance—Palm leaf. Size—12½" × 1½". Leaves—

62. 8 lines per page and 32 letters per line. Script—Grantha. No. of Granthas—1100.

Subject—An amatory poem.

Beginning :

......नुस्तनुलताग्रामभ्रुवां कोमला
निष्पन्दस्थितषट्प...	...	...।
...	...प्पितोत्पलदलप्रख्याः कटाक्षाश्चला-
स्तस्याश्चर्यधनु....	...	...
...	...मिषप्र...लिका भृङ्गावलीशिञ्जिनी
मन्त्री शीतरुचिं म...	...	...॥

....न्यं वामदृशस्तथापि भुवनं यस्य स्थितं शासने
तस्यानङ्गमहीप....	....	....॥

End :

आवर्त....नाभिमहाहृदेषु
कामद्विषो विहरते कलभाषि ...........।
.........ण्यमस्तु सुदृश......तत......
चन्द्रः समुन्मिषतु सन्ततपूर्णबिम्बः॥

मासो मधुर्वि............
पुष्पायुधो विजयतां भुवनैकवीरः।
खदते (?) यस्य कोदण्डं सुव्रते....	....
....	....मौर्वी च वीरो....मयम्।

Colophon :

नानाविधरसभावप्रकाटित....	....कैः श्लोकैः।

शृङ्गारसप्तशत्यां.....

मम्यक् समबन्धि सप्तमं शतकम् ॥

.... ......भिषजा

रचिता शृङ्गारलक्षणज्ञेन ।

शृङ्गारसारसङ्ग्रह-

सप्तशती तद्विदां मुदे... .. ॥

... ... ... दोषसश्चय-

मस्मिन् गुणिनः प्रसाधयन्तु गुणान् ।

शशीव कमलनिकरान्...... ॥

कलु......रता......

802- അല്പശിമാസം 4-ാംനു വ്യാഴാഴ്ചയും ഏകാദശിയും ... ... ശൃങ്ഗാരസപ്തശതി എഴുതിമുകിഞ്ഞു.

Author—Aruṇagiribhiṣak.

Remarks—The leaves are much damaged. The date of transcription is given as 802 M. E. in the colophon.

---

## ॥ शौरिकथा ॥

### 1980. ŚAURIKATHĀ.

Substance—Palm leaf. Size—10″ × 1⅝″. Leaves—5. 7—8 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—60.

Subject—The story of Kṛṣṇa.

Author :

Remarks—The leaves are much worn out. The script is illegible. The work is available in print.

---

## ॥ शौरिकथाव्याख्या ॥

### 1981. ŚAURIKATHĀVYĀKHYĀ.

Substance—Palm leaf. Size—14″ × 1½″. Leaves—15. 7—8 lines per page and 37 letters per line. Script—Malayālam. No. of Granthas—260.

Subject—Explication of the Śaurikathā.

Beginning:

... ... ....तये नमः... ....पदे पदे
अहं यत्... ... ... ...उत्तमं बुध्या. . .
. . .अहं सं. . . . .परमस्य... ... ...
आदिनारायणस्य अनन्तदेव. . .अम्बुध्यन्ते अर्णवमध्ये यत्-पदं यस्यावासः, यतयो ज्ञानिनः, उत्तमा यत्तत्वा यत्. . . . ध्यन्ते बुध अवगमने । "तत्त्वन्तु वाद्यभेदे स्यात् स्वरूपे परमात्मनी"ति महेश्वरः ।

End:

पथीति—

पथिकतुर्दंसनदी प्रसरोरुहं रसरहितं. . . .रहितः. . . . प्रसरत् "प्रसरः प्रणये वेगे संगते च तथा भवे"दिति । दीप्रसरोरुहं स. . . . .पशून् तृणघटया अमा घटयामास अयो. . . सः तां वल्लभां तृणघटयोः सह घटयामास । तद्वसनं. . . . तांश्च ।

Author :

Remarks—The leaves are much damaged. Only a few verses in the first *Āśvāsa* are commented upon herein.

---

## ॥ शौरिचरितम् (सव्याख्यम्) ॥

### 1982. ŚAURICARITAM with commentary.

Substance—Palm leaf. Size—$13\frac{1}{2}'' \times 5\frac{1}{2}''$. Leaves—25. 5 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—375.

Subject—Same as No. 1930.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

गुरुं गणपतिं वाणीं ब्रह्माणं विष्णुमीश्वरम् ।
नमस्करोमि लक्ष्मीं च पार्वतीं च मुहुर्मुहुः ॥

श्रीकण्ठरचितं काव्यं तच्छौरिचरिताह्वयम्
व्याख्यासे (?) सयमकं प्रौढं प्राकृतभाषयोः ॥

णमह गआणणपाअं जत्तो विमुहा जणा गआ ण ण पाअं ।
जण्णइरत्तालेहा सळाहणिज्जो अजं णरं ळहा (?) ॥

नमत गजाननपादं यस्माद्विमुखाः जना गता न न पातम् ।
यत्नातिरक्तालम्बाः श्लाघनीयाः च यस्मिन् रक्ता लेखाः (?) ।

गजाननपादं नमत यस्मात् पादाद्विमुखाः जनाः पातं वि-
निपातं न न गताः गता एव । व्यतिरेकोक्त्यान्वयदार्ढ्यमुक्तम् ।

End :

सरसंवच्छरओ । वत्सरत:... ...

अ (?) सत्तसंवच्छरओ । गमित सप्तसंवत्सरक:

... ... ... ...

सोहइ अशोभत । सामो श्या... ...

..,.. ... ,... ...

सूनान्दस्न अञ्जसा मोसणओ । मोषेण कः सनयत्त्वं मो-
षणेषु । जो णिं वो अ अ .... .,. ...

... ... ... ... ... ... ...

Colophon :

Author—Text : Vāsudeva Nampūri.
Com : Śrīkaṇṭha.

Remarks—The Ms. is much damaged.

---

## ॥ श्लोकावलिः ॥

## 1983. SLOKĀVALI.

Substance—Palm leaf. Size—$21\frac{1}{2}'' \times 2''$. Leaves—152. 8 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—4250.

Subject—A compendium of the stories contained in the Rāmāyaṇa and the Bhārata.

Beginning :

गणपतये नमः ।

.... प्लवगबलपतेः पादमक्षस्य हन्तुः
कृत्वोत्सङ्गे सलीलं त्वचि कनकमृगस्याङ्गमाधाय शेषम् ।
बाणं रक्षःकुलघ्नं प्रगुणितमनुजेनादरात् तीक्ष्णमक्ष्णः
कोणेनोद्वीक्ष्यमाणस्त्वदनुजवदने दत्तकर्णोऽयमास्ते ॥

यस्य भार्या जनस्थानात् सीता चापहृता त्वया ।
स एष रामस्त्वां योद्धुं राजन् समभिवर्तते ॥

End :

... ... ...युद्धेषु कदाचन ।
पुनः पुनस्तूबरक मूढौदरिक दुर्मते ॥

अकृतास्त्रकमायोत्सीर्बालं सङ्ग्रामकातरम् ।
भीम यात् पाण्डवं सह्रैभ्रातरं सव्यसाचिनम् ॥
अथ मुरहासत्वरयं निधनस्य धनञ्जयं महासत्वरयम् ॥

मण्ड... ... गाण्डी... श्येन इवाशुगः ।
शकुन्तपक्षाग्रात् सन्ध.... ...वासु ॥
पार्थ पार्थ मह... ... ... ।

Colophon :

Author :

Remarks—The first 37 leaves are missing.

---

॥ श्लोकावलिः ॥

## 1984. ŚLOKĀVALI.

Substance—Palm leaf. Size—21″ × 2½″. Leaves—140. 8 lines per page and 80 letters per line. Script—Malayāḷam. No. of Granthas—5600.

Subject—Same as No. 1983.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

धातुर्दक्षोऽभवत् तस्माददितिस्तत्सुतो रविः ।
रवेर्मनुरभूत् तस्मादिलोऽपि समजायत ।
राज्ञो बुधोऽभवत् तस्माद् ग्रहाणामधिपो वशी ॥

बुधादिलायामभवत् स च राजा पुरूरवाः ।
पुरूरवस उर्वश्यामायुः श्रीमानजायत ॥

आयुषो नहुषः पुत्रो ययातिर्नहुषात्मजः ।

End :

मयि सृष्टिर्हि लोकानां रक्षा युष्मास्ववस्थिता ।
तस्मिन्नित्यादि हृदये वससीति मत्प्रियामिति ॥

हस्तालङ्कारगौरश्शशिकुसुमजटाशूलकौपीनधारी
नृत्तारम्भप्रसक्तो मुखरि.....देवसोमासहायः ।
पीत्वा पीत्वा कपालात् सह युवतिसुरामट्टहासं वितन्व-
न्नाधावत्येष मत्तः स्खलितपदयुगस्सत्यसोमः कपाली ।
(मत्तविलासः)

Colophon :

Author :

Remarks—The Ms. is in neat legible hand.

---

॥ श्लोकावलिः ॥

## 1985. ŚLOKĀVALI.

Substance—Palm leaf. Size—20″ × $2\frac{1}{2}$″. Leaves—83.

7—8 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—2500.

Subject—A cento of verses and passages from various works.

Beginning :

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।

ततः प्रविशति डिण्डिकः—

कोटक्कुट्टमयुतमित्यस्य

शिखा बहुविधा प्रोक्ता.शास्त्रे शिखिशिखोपमा ।
भूसुराणां नृपाणां च वैश्यानां पादजन्मनाम् ।
द्वादशाङ्गुलिमाना हि शिखा चेह फलप्रदा ॥

षोडशाङ्गुलिमाना चेच्छिखामुत्रफलप्रदा ।
सप्ताङ्गुलिमिता सा चेत्पुत्रसम्पत्करा भवेत् ॥

End :

उन्म—

एशे एस्व चंदं गिलदि राहू । मुञ्च मुञ्च । यदि ण मुञ्च शिग्घं दे वाडिअ मोएमि ।

സ്വഃ എന്നിതവ്യയം. സ്വൎഗ്ഗഃ നാകഃ ത്രിദിവഃ ത്രിദശാലയഃ സുരലോകഃ ഇവയഞ്ചും പുല്ലിംഗം. ദ്യൌഃ ഓകാരാന്തം. ദ്യൌഃ വകാരാന്തം. ദ്വേ സ്ത്രിയൌ. ക്ലീബേ ത്രിവിഷ്ടപം. ഇവ 9-ം സ്വൎഗ്ഗത്തിന്റെ പേർ.

End:

दिग्देशकाले पूर्वादौ प्रागुदक्प्रत्यगादयः ॥

പൂൎവ്വദിക്കും പൂൎവ്വദേശവും പൂൎവ്വകാലവും പ്രാൿ. ഉത്തരദിക്കും ഉത്തരദേശവും ഉത്തരകാലവും ഉദൿ. അപരദിക്കും ദക്ഷിണദേശവും 2-ം അവാൿ.

Colophon:

इत्यव्ययवर्गः ।

Author:

Remarks—The Ms. embodies a Malayāḷam commentary. A verse from *Liṅgādi sāṅgrahavarga* is cited after the colophon. The work extends up to *Avyaya Varga*.

## ॥ नामलिङ्गानुशासनम् (पञ्चिकाख्यकेरळभाषाटिप्पणी-युतम्) ॥

2053. NĀMALIṄGĀNUŚĀSANAM
with the Malayāḷam commentary, Pañcikā.

Substance—Palm leaf. Size—$11\frac{1}{2}'' \times 2''$. Leaves—58.. 10—12 lines per page and 32 letters per line Script—Malayāḷam. No. of Granthas—1650.

Subject—Same as No. 2026.

Beginning :

हरिः । श्रीगणपतये नमः अविघ्नमस्तु ।

क्लेशादयो यं न परामृशन्ति यो वा बिभर्तीश्वरशब्दमेकम् ।
पुरातनानां गुरवे गुरूणां तस्मै नमो नागविभूषणाय ॥
आयुर्धनुर्वेदनिघण्टुसागरं वास्तुग्रहाश्वादिगजादिशासनम् ।
स्मृतीः पुराणान्यखिलास्सहस्रशस्समीक्ष्य वक्ष्येऽमरकोशपञ्चिकाम् ॥

को मर्त्योऽमरकोशं तु विवरीतुं क्षमो भुवि ।
को वाब्धिमथनं कर्तुं शक्तो नारायणादृते ॥

तत्र ये स्वेन विवृता ये च व्यक्तार्थवाचिनः ।
तेषां निरर्थका व्याख्या व्याक्रियन्तेऽत्र दुर्गमाः ॥

शास्त्रारम्भे गुरुमभिष्टौति—
यस्य ज्ञानदयासिन्धोरगाधस्यानघा गुणाः ।
सेव्यतामक्षयो धीरास्स श्रियै चामृताय च ॥

गुरुत्वादेव तन्नाम नोक्तवान् । यस्येति वायुदैवतस्य यकारस्यादौ निर्देशश्शीघ्रसमाप्त्यर्थः । यस्य ज्ञेति भूमिगणस्य गुरुत्रयात्मकस्य चादौ नृ....त्यर्थः । ज्ञानदयासिन्धोरिति विशेषणद्वय...

End :

കർമ്മക്ഷമഃ അലം കർമ്മീണഃ വ്യാപാരശക്തൻ. ക്രിയാവാൻ കർമ്മസു ഉദ്യതഃ വ്യാപാരത്തിന്ന് തുടങ്ങിയവൻ. കാർമ്മഃ കർമ്മശീലഃ യഃ വ്യാപാരശീലൻ. കർമ്മ ശൂരഃ തു കർമ്മഠഃ കർമ്മകുശലൻ (ഒരുത്ത്യ...

Colophon :

Author :

Remarks—The Ms. contains the first two *Kāṇḍas*. The commentary is interspersed with notes in Malayāḷam.

## ॥ नामलिङ्गानुशासनम् ॥
## (पञ्चिकाख्यकेरलभाषाव्याख्योपेतम्) ॥

2054. NĀMALIṄGĀNUŚĀSANAM
with the Malayāḷam commentary, Pañcikā.

Substance—Palm leaf. Size—15″ × 2″. Leaves—59. 9—10 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—1825.

Subject—Same as No. 2026.

Beginning :

...यो देवगायकाः किन्नरा देवगायकाः अश्वादिमुख......पिशाचाः पापकृतः बाधकाः तद्भन्द्राशष्षोडश (?) स्मृताः गुह्यकाः कुबेरस्य धनपालाः माणिभद्रादयः सिद्धाः

अवाप्ताष्टगुणैश्वर्यास्सिद्धास्सद्भिरुदाहृताः ।

End :

माषादयः शमीधान्ये माषमुद्गादिकं പൂട്ടിൽ വിളയിൻറവ. शूकधान्ये यवादयः യവഗോധൂമാദികൾ കതിരേൽവിളയി-

ൽഠവ शालय: कळमाद्या: च पुंमि अमी कळमाद्याश्शालिभेदा-श्च व्रीहिभेदाष्च ... ।

Colophon :

Author :

Remarks—The commentary extends up to the 24th verse in *Vaiśya Varga.*

---

## ॥ नामलिङ्गानुशासनम् ॥
## (पञ्चिकाख्यकेरलभाषाव्याख्योपेतम् ) ॥

## 2055. NĀMALIṄGĀNUŚĀSANAM
with the Malayāḷam commentary, Pañcikā.

Substance—Palm leaf. Size—14″ × 2″. Leaves—83. 8—9 lines per page and 43 letters per line. Script—Malayāḷam. No. of Granthas—1400.

Subject—Same as No. 2026.

Beginning—Same as No. 2052.

End :

शोधितं समं നിർമലമായത് चिक्कणं मसृणं स्निग्धे നെയ്യുള്ളത് तुल्ये भावितं वासितं പൂശിയത്. ൧൩-൦ ശ്ലോകം । अपक्वं बोळिः स्त्री अभ्यूषः ना तिलगुळसक्त्वादिकृता बोळिः । अभ्यूषः ना । लाजाः पुंभूम्नि च अ ।

Colophon :

Author :

Remarks—Same as No. 1692.

## ॥ नामलिङ्गानुशासनम् (पञ्चिकाख्यकेरलभाषाव्याख्योपेतम्) ॥

## 2056. NĀMALIṄGĀNUŚĀSANAM
with the Malayāḷam commentary, Pañcikā.

Substance—Palm leaf. Size—10″ × 2½″. Leaves—102 7—9 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—1225.

Subject :—Same as No. 2028.

Beginning—Same as No. 2053.

End :

ज्योतिषिकः गणकः अपि स्युः। मौहूर्त्तः ज्ञानी कार्त्तान्तिकः अपि ० --ना ജ്യോതിഷം പോകുന്നവൻ (?) तान्त्रिकः ज्ञातसिद्धान्तः २ ना—ശൈവാദ്യാഗമങ്ങൾ (?) सत्री गृहपतिः समौ യാഗംചെയ്തവൻ. लिपिकारः अक्षरचणः अक्षरचुञ्चुश्च लेखके अ

Colophon :

इति ब्रह्मवर्गः ।

Author :

Remarks—This work is different from No. 2053.

## ॥ नामलिंगानुशासनम् (पञ्चिकाख्यकेरलभाषाव्याख्योपेतम्) ॥

## 2057. NĀMALIṄGĀNUŚĀSANAM
with the Malayāḷam commentary, Pañcikā.

Substance—Palm leaf. Size—18″ × 2¾″. Leaves—40.

9 lines per page and 60 letters per line. Script—Malayāḷam. No. of Granthas—1500.

Subject—Same as No. 2026.

Beginning—Same as No. 2053.

End:

शिखण्डः तु पिञ्छं, ब॰ नपुंसकं മയിൽപ്പീലി खगः विहंगः, विहगः, विहंगमः, विहायाः, शकुन्तिः, पक्षी, शकुनिः। शकुन्तः, शकुनः, द्विजः, पतत्री, पत्री, पतगः, पत (न्) पत्ररथः, अण्डजः, नगौकाः, वाजी, विकिरः, विः, विष्किरः, पतत्रिः, नीडोद्भवाः, गरुत्मन्तः, पित्सन्तः, नभसंगमाः । ഖഗാദിനഭസംഗമാന്തം സാമാന്യ പക്ഷികളുടെ പേർ. तेषां विशेषाः हारीतः ना പയ്പ്രാവ്. मद्गुः ना നീർക്കാക്ക. कारण्डवः ना കോഴി. प्लवः ना മരക്കലംനാവാ. तित्तिरिः ना ചിച്ചിരി. कुक्कुभः ना ചെറുകുരിൽ. । लावः ना ചീവൽ. जीवंजीवः नावत् (?) വട്ടച്ചാവൽ. चकोरकः ना ചകോരപ്പുൾ. कोयष्टिकः ना ഉഡി (?) टिट्टिभकः കുതികുലുക്കി. वर्तकार्तिना (?) കാട. वर्तिका സ്ത്രീ. കാടയടിയാൻ.

Author:

Remarks—The Ms. is much damaged. It extends up to *Vanauṣadhi Varga*.

॥ नामलिंगानुशासनम् (केरलभाषाव्याख्योपेतम्) ॥

2038. NĀMALIṄGĀNUŚĀSANAM
with Malayāḷam commentary.

Substance—Palm leaf. Size—17″ × 2″. Leaves—30.

7—11 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—900.

Subject—Same as No. 2026.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

वन्दे स्कन्धाद्दतं देवं विघ्नराजं दयानिधिम् ।
गिरां देवीमपि गुरुं शङ्करं विष्णुमेव च ॥

ഞാനിന്നമരസിംഹന്റെ കൃതിക്കു് ലഘുവായൊരു
ഭാഷാലേഖനകർമ്മത്തിന്നാരഭേ സ്വാമിസംശ്രയാത്.

यस्य ज्ञानदयासिन्धोः अगाधस्य अनघाः गुणाः

End :

इयमेव भूलता निहाका गोधिका मम नीർക്കോലിന്റെ
പേർ. रक्तपाः तु जलूकायां स्त्री भूमनि जलौकसः
൩-ം നീരട്ടയുടെ പേർ. ।

Colophon :

Author :

Remarks—The Ms. contains only the first *Kāṇḍa*.

---

## ॥ नामलिंगानुशासनम् (केरलभाषाव्याख्योपेतम्) ॥

### 2059. NĀMALIṄGĀNUŚĀSANAM
### with Malayāḷam commentary.

Substance—Palm leaf. Size—13½″ × 2½″. Leaves—

33. 9—11 lines per page and 44 letters per line. Script—Malayaḷam. No. of Granthas—900.

Subject—Same as No. 2026.

Beginning :

ചിവപ്പും कृष्णलोहिते । कडारः कपिलः पिङ्गपिशङ्गौ कद्रुपि-
ङ्गलौ । നാനാവർണ്ണം चित्रकिम्मीरकल्माषशबलैताश्च कर्बुर

ശുക്ലാദിശബ്ദം കഠം ഗുണവാചിയാനപോലു മൂന്നു

End :

त्रिवर्गो धर्मकामार्थैश्चतुर्वर्ग अन्वी ? ....
... ...श्चतुर्वर्गस्समोक्षकैः ॥

അരൈവമനം.......മും കൂടിനതു.
सबलैस्तैश्चतुर्भद्रं മണവാളപ്പിള്ളെ.
അടൈതെഴ...മാം जन्यं स्निग्धावर... ....

Colophon :

Author :

Remarks—Many leaves are worn out.

## ॥ निघण्टुः ॥

## 2060. NIGHAṆṬU.

Substance—Palm leaf. Size—18″ × 1¾″. Leaves—11. 7 lines per page and 44 letters per line. Script—Malayaḷam. No of Granthas—225.

Subject—A lexicon of Vedic words.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

ओं गौः ग्मा, ज्मा, क्ष्मा, क्षा, क्षमा, क्षोणी, क्षोणिरिति केचित् । क्षितिः, अवनिः, उर्वी, पृथ्वी, मही, रिपः ।

End :

मनः, दध्यङ्, आदित्याः, सप्त ऋषयः, देवाः, विश्वेदेवाः, साध्याः, वसवः, वाजिः, देवपत्न्यः, ओम् ।

Colophon :

इति द्यु स्वाना (?) देवताः ।

इति निघण्टौ पञ्चमोऽध्यायः । श्रीः ।

Author :

Remarks—The Ms. comprises five *Adhyāyas.*

---

## ॥ वैजयन्ती ॥

## 2061. VAIJAYANTĪ.

Substance—Palm leaf. Size—22½″ × 2″. Leaves—113. 6—7 lines per page and 64—66 letters per line. Script—Malayāḷam. No. of Granthas—3300.

Subject—Same as No. 2060.

Author—Yādavaprakāśa.

Remarks—The Ms. is much worn out. A few leaves are missing both at the beginning and

end. The work is available in print. The Ms. begins on a portion of *Antarīkṣakāṇḍa* and ends on *Avyayaparyāyādhyāya*.

---

॥ वैजयन्ती ॥

2062. VAIJAYANTĪ.

Substance—Palm leaf. Size—7½″ × 2″. Leaves—84. 7—8 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—1050. Incomplete.

Subject—Same as No. 2060.

Author—Same as No. 2061.

Remarks—The Ms. begins on the *Anekārthakāṇḍa*.

---

॥ वैजयन्ती ॥

2063. VAIJAYANTĪ.

Substance—Palm leaf. Size—7½″ × 2″. Leaves—958. 5—6 lines per page and 95 letters per line. Script—Malayāḷam. No. of Granthas—650. Incomplete.

Subject—Same as No. 2060.

Author—Same as No. 2061.

Remarks—The Ms. commences on "द्व्यक्षरकाण्ड" and ends on a portion of "अभिधेयवाल्लिङ्गाध्याय".

---

## ॥ वैजयन्ती (केरळभाषामिश्रा) ॥

### 2064. VAIJAYANTĪ
with Malayāḷam commentary.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 2''$. Leaves—85. 10 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—2750.

Subject—Same as No. 2060.

Author—Same as No. 2061.

Remarks—The Ms. ends on ***Bhūtādhyāya*** in ***Pātālā kāṇda***. The leaves are much damaged. Some leaves relating to a Malayāḷam commentary are also seen.

---

## ॥ सुबोधिनी (नामलिङ्गानुशासनबृहद्वृत्तिः) ॥

### 2065. SUBODHINĪ.
Commentary on Nāmaliṅgānuśā nam.

Substance—Palm leaf. Size—$14' \times 1\frac{1}{2}''$. Leaves—124. 7—8 lines per page and 60 letters per line. Script—Malayāḷam. No. of Granthas—3600.

Subject—Explication of the Nāmaliṅgānuśasanam.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

ज्ञानादयो विवर्धन्ते सिध्यन्त्येव हि सिद्धयः ।
ययोः प्रसादात्तौ वन्दे परावरगुरू क्रमात् ॥

अस्ति सर्वमनोह्लादि नामलिङ्गानुशासनम् ।
नामव्युत्पत्तिसिद्ध्यर्थं बालैस्तत्परिपठ्यते ॥

तेषां तदर्थबोधार्थं मृदुसंस्कृतभाषया ।
वृत्तिः सुबोधिनी रम्या विस्तरेण विरच्यते ॥

*  *  *  *  *  *

End :

एतश्चैषां सङ्कृतमित्यनेनैव धीसङ्गतानां रसगन्धादीनामभि-
धानादिग्रहणमेषार्थकं स्यादित्यलं बहुना ।

यस्यापि नामानि भवन्ति सर्वा-
ण्युक्तानि विष्णोर्जगदात्मकस्य ।
स प्रीयतादुत्कुतसुप्रसान्ति ?
व्याख्यानतोऽव्याकृतनामधेयः ॥

Colophon :

इति मीमांसाभाष्यविवरणकृद्याज्ञियदेवनभट्टोपाध्यायात्म-
जजातवेददीक्षितकृतायां सुबोधिन्याख्यायां बृहद्वृत्तौ
प्रथमकाण्डोक्तनामलिङ्गविवेचनम् । प्रथमकाण्डव्याख्याग्रन्थस-
ङ्ख्या त्रीणि सहस्राणि पञ्चशतानि । प्रथमकाण्डं समाप्तम् ।

മുൻപിലത്തെ കാണ്ഡം മൂവായിരത്തഞ്ഞൂറ്.

വൈലത്തൂർ കടലായിലെ ഗ്രന്ഥം. ഇതു് ശ്രീധരമൂത്തീടെ. കൊല്ലം 865-ാമതു് മീനം ഞായററിൽ എഴുതി കഴിഞ്ഞു ഈ ഗ്രന്ഥം.

ശേഷം മറെറ ഗ്രന്ഥത്തിലു്.

Author—Jātaveda Dīkṣita.

Remarks—Only the first *Kāṇḍa* is commented upon in this codex. At the close of the Ms. the date of transcription is given as 865 M. E. The Ms. is in fairly good condition.

---

# ॥ विविधाः ॥

## ॥ अनन्तव्रतकथा ॥

## 2066. ANANTAVRATAKATHĀ.

Substance—Palm leaf. Size—14″ × 2″. Leaves—9. 7 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—175.

Subject etc.—Same as No. 462 B.

---

## ॥ अनन्तव्रतोद्यापनकल्पः ॥

## 2067 A. ANANTAVRATODYĀPANAKALPA.

Substance—Palm leaf. Size—14″ × 1¾″. Leaves—3. 6 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—70.

Subject etc.—Same as No. 462 C.

## ॥ भविष्योत्तरम् ॥

### 2067 B. BHAVIṢYOTTARAM.

Substance—Palm leaf. Size—5" × 2". Leaves—6. 10 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas—50.

Subject etc.—Same as No. 1142 A. 52.

## ॥ कन्दुकत्रयम् ॥

### 2068 A. KANDUKATRAYAM.

Substance—Palm leaf. Size—8" × 2". Leaf—½. 6 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—5.

Subject—Glorification of a *Kanduka* (ball).

Beginning:

.... ...न्दुक ते हृदयं
प्रमदाधरसङ्गमलुब्ध इव ।
वनिताकरतामरसाभिहतः
पतितः पतितः पुनरुत्पतसि ॥

पयोधराकारधरो हि कन्दुकः
करेण रोषादभिहन्यते मुहुः ।
इतीव नेत्राकृति भीतमुत्पलं
स्त्रियः प्रसादाय पपात पादयोः ॥

End :

> एकोऽपि त्रय इव भाति कन्दुकोऽयं
> कान्तायाः करतलरागरक्तरक्तः ।
> भूमौ तच्चरणनखांशुगौरगौरः
> ख(स्थस्सन्नय)नमरीचिनीलनीलः ॥

Colophon :

कन्दुकत्रयं समाप्तम् ।

Author :

Remarks—The above three *ślokas* comprise the complete text.

---

## ॥ उखायिपञ्चकम् ॥

## 2068 B. UKHĀYIPAÑCAKAM.

Substance—Palm leaf. Size—8″ × 2″. Leaf—1. 14 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—8.

Subject—Description of religious rituals.

Beginning :

> चरन् वनान्ते नवमञ्जरीषु
> न षट्पदो गन्धवलीमजिघ्रत् ।
> स किं न रम्यः स च किं न रन्ता
> बलीयसी केवलमीश्वरेच्छा ॥
>
> कुसुमानि लिखन्तु नाम चित्रे
> कतिचित् कालविशेषरूढशिक्षाः ।

सुरभित्वममूनि किं लभन्ते
किमु तत्रापि रसं (पिबन्ति) भृङ्गाः ॥

भ्रमर भ्रमता दिगन्तराले
क्वचिदास्वादितमीक्षितं श्रुतं वा ।
वद सत्यमपास्य पक्षपातं
यदि जातीकुसुमानुकारि पुष्पम् ॥

End :

दिङ्मण्डलं परिमलैः सुरभीकरोषि
सौन्दर्यमावहसि लोचनलोभनीयम् ।
अहो! रसालफलवर्य त.... ....
...यत् स्थिरश्च हृदयं कठिनं विधत्से ॥

निरर्थकं जन्म गतं नलिन्या
यया न दृष्टं तुहिनांशुबिम्बम् ।
उत्पत्तिरिन्दोरपि निष्फलैव
दृष्टा विनिद्रा नलिनी न येन ॥

Colophon :

उखाग्निपञ्चकं समाप्तम् ।

Author :

Remarks—The Fol. is much damaged. The verses given above comprise the complete text.

॥ कदानुपञ्चकम् ॥

2068 C. KADĀNUPAÑCAKAM.

Substance—Palm leaf. Size—8″ × 2″. Leaf--1. 11 lines

per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—8.

Subject—Exposition of the sentiment of love in separation.

Beginning:

कदानु कान्ते सुरतान्तरे ते
पश्यामि तान्ते वदनारविन्दे ।
पयस्समुद्रोदितचन्द्रबिम्बे
पीयूषबिन्दूनिव घर्म(बिन्दून्) ॥

... भुजमुपधानं कल्पयित्वा तवैकं
पृथुनि जघन .... सन्निधाय द्वितीयम् ।
अधरममृतपूर्णं काममास्वाद्य निद्रां
वरतनु सुरतान्ते सेवयिष्ये कदानु ॥

आलोलनीलायतलोचनाया
लोलालिमालाकुलिता(ल)कायाः ।
आलिङ्गनाचुम्बनलालसायाः
लप्स्ये कृपां तश्श(?)...नं कदानु ॥

End:

बालां समालिङ्ग्य रतिश्रमार्ता-
मङ्के समारोप्य मुखं निरीक्ष्य ।
पश्यामि तस्याश्चललोचनाया
दन्तच्छदं चारुतरं कदानु ॥

विपरीतरतौ विलासवत्या
विगलन्माल्ययुतं शिरोजभारम् ।

निपतन्तमुरःस्थले विकीर्णं
परिसंगृह्य कदानु वेष्टयामि ॥

Colophon :

कदानुपञ्चकं समाप्तम् ।

Author :

Remarks—The Ms. is much damaged.

---

॥ कलदशकम् ॥

## 2068 D. KALADAŚAKAM.

Substance—Palm leaf. Size—8″ × 2″. Leaf—1. 24 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—21.

Subject—Same as No. 2068 C.

Beginning :

... ...भ्रुमस्सक... ...गुणाना
साम्राज्यसम्पदनघा कुसुमायुधस्य ।
सेयं स... ... ...कौशलश्रीः
स्तते सुखं नयनयोर्बेलिनायताक्षी ।

तद्वक्त्रबिम्बमधरीकृतचन्द्रगर्वं
ते लोचने तरळतारकलोभनीये ।
तच्च स्मितं न वसुधामधुरं स्मितायाः
सञ्चिन्त्य नान्यदवलोकयतीव चेतः ॥

आलिङ्गतीव दृढमालपतीव किञ्चि-
दामीलिताक्षियुगळं परिचुम्बतीव ।
किन्नाम नाचरति संप्रति सानुरागा
संकल्पिता... ....सरसीरुहाक्षी ॥

End :

प्रसरति न च वाणी स्पन्दते नो शरीरं
मुहुरिह जडिमानं यान्ति सर्वेन्द्रियाणि ।
स्मृतिरपि च विनष्टा हन्त संस्कारमोक्षा
.... ....दं भाति विश्वं किमेतत ॥ ९ ॥

तामक्ष्णोः पदमाशुमर्य.... ....माकम्रपीनस्तनीं
द्वित्रैरेव दिनैर्दशाञ्च नवमीं प्रापय्य मामातुरम् ।
संप्रत्यम्बुजबाण विश्वविजयिन् तूष्णीं किमास्ते भवान्
यत कर्तव्यमतः परं कुरु तदप्यत्रैव सज्जा वयम् ॥ १० ॥

Colophon :

कळदशकं समाप्तम् ।

Author :

Remarks—Same as No. 2008 C.

## ॥ चक्रवाकीदशकम् ॥

## 2068 E. CAKRAVĀKĪDAŚAKAM.

Substance—Palm leaf. Size—8″ × 2″. Leaf—1. 11 lines per page and 30 letters per line. Script—Malayalam. No. of Granthas—20.

Subject—Description of the painful feelings of a *cakravākī* consequent on separation from its beloved.

Beginning:

....नित्यतामुपगते नयनानां
लोहिता यदि सहस्रमरीचौ ।
आससाद विर.... ....
ञ्चक्रवाक... ...न्याभितापः ॥ १ ॥

एकेनाक्ष्णा प्रतिहतरुषा वीक्षते व्योमसंस्थं
भानोर्बिम्बं प्रणयमधुरेणेतरेण स्वकान्तम् ।
अह्नश्छेदे दयितविरहाशङ्किनी चक्रवाकी
द्वौ सङ्कीर्णौ रचयति रसौ नर्तकीव प्रगल्भा ॥ २ ॥

End.

रविरुदयमिदानीमेति याता त्रियामा
... ....यति रमणी त्वां कोक रे को विषादः ।
इति वदति निषण्णे कुक्कुटे निष्कुटान्त-
विटपिनि निजकान्तालिङ्गितश्चक्रवाकः ॥ ९ ॥

नीत्वा रात्रिमुपेत्य पङ्कजवने नेदीयसीं प्रेयसीं
किं किं वा न करोति केवलधृतप्रेमा रथाङ्गश्च यः ।
पक्षाभ्यामुपगूहति प्रलपते पश्चात्पुरः पार्श्वयो-
रुच्चैः पश्यति मञ्जु कूजति पुनश्चञ्चूपुटं चुम्बति ॥ १० ॥

Colophon:

चक्रवाकीदशकं समाप्तम् ।

Author:

Remarks—The following seven verses occur after the end:

मुखं पश्यन् शृण्वन्नधरमुपजिघ्रन् परिमलं
प्रश्शृण्वन् मोन्काश्म.... ....द्रढमृगु....ग्दिम् ।
अभीष्टक्रीडान्ते श्रमनवनि वातायनमुखे
त्वया सार्धं ल... ...पि बत कदा नु प्रियतमे ॥ १ ॥

आम्बिन्नामभिधामवक्त्र(?)कमलामालोलनीलालका-
मामुग्धाकुललोचनामसुसमामातास्रदन्ताम्बराम् ।
आरूढप्रणयप्रसादमधुरामात्मानुकूलां प्रिया-
मानन्दाम्बुधिमध्यमग्नहृदयामालोकयिष्ये कदा ॥ २ ॥

अङ्कं त्वामधिरोप्य कुङ्कुमघनावाश्लिष्य पीनस्तना-
वाजिघ्रन् मृगनाभिगन्धसुभगामच्छां कपोलस्थलीम् ।
अत्यार्द्रामधरामृतैस्तव मुखादामोदिनीं वीटिकां
वक्त्रेणापहरन् कदा नु दयिते वर्तेय सार्धं त्वया ॥ ३ ॥

पश्चात् पीठनिषण्णया नखमुखैः पर्यायतः कुञ्चितै-
र्विस्रस्तां विनिकीर्य केशकबरीमाबद्धसीमन्तया ।
सख्या साकमुदीरितस्मरजनीसंभोगवृत्ता ?
(व?बा)ला सौरभशेषचन्दनवती बालात(पं) सेवते ॥ ४ ॥

अंसन्यस्तमनेकपुष्पसुरभिं धम्मिल्लमामुञ्चती
बाह्वोर्मूलमनङ्गमङ्गलगृहं सन्दर्शयन्ती शनैः ।
शीतालुश्शिखरावदातदशना शीतांशुबिम्बानना
बाला काचन लोललोचनयुगा बालातपं सेवते ॥ ५ ॥

विस्रस्तं घनकेशपाशनिचयं विस्तारयन्ती नखैः
ससेरं कुचमण्डलं विमृशती बाहूरुमूलं दृशा ।
पश्यन्ती रमणार्पितं दिनमुखे दन्तक्षतं दर्पणे
बाला काचिदबालचन्द्रवदना बालातपं सेवते ॥ ६ ॥

कदाचिदास्वादितकल्पवल्लीवियोगदुःखाहतचित्तसारः ।
क्षुधा तृषा चापि निपीड्यमानः शुकः शुचा कोटर एव शेते ॥७ ॥

## ॥ अद्यापिपञ्चाशत् ॥

### 2068 F. ADYĀPIPAÑCĀŚAT.

Substance—Palm leaf. Size—8″ × 2″. Leaves—6. 10—12 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—100.

Subject—Same as No. 2068 C.

Beginning :

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।

अद्यापि तां कनकचम्पकदामगौरीं
फुल्लारविन्दनयनां तनुरोमराजिम् ।
सुप्तोत्थितां सुरतविह्वललालसाङ्गीं
विद्यां प्रमादगलितामिव चिन्तयामि ॥

अद्यापि तद्विकसिताम्बुजमध्यगौरं
गोरोचनातिलकपाटलफालदेशम् ।
ईषन्मदालसविघूर्णितदृष्टि(पा)तं
तस्या मुखं प्रति मनो मम गच्छतीदम् ॥

अद्याप्यहं कनककुण्डलघृष्टगण्ड-
मास्यं स्मरामि विपरीतरताभियोगे ।
आन्दोलितश्रमजलस्फुटसान्द्रबिन्दु-
मुक्ताफलप्रकरविस्फुरितं युवत्याः ॥

End :

अद्यापि नोज्झति हरः किल कालकूटं
कूर्मो बिभर्ति धरणीं खलु पृष्ठभागे ।
अम्भोनिधिर्वहति दुस्सहबाडवाग्नि-
मङ्गीकृतं सुकृतिनः परिपालयन्ति ॥

पञ्चत्वं तनुरे(क?तु) भूतनिवहाः स्वांशैर्मिलन्तु ध्रुवं
वेधस्त्वां प्रणिपत्य किञ्चिदधुना याचे निबद्धाञ्जलिः ।
तद्वापीषु पयस्तदीयमुकुरे ज्योतिस्तदीयाङ्कण-
व्योम्नि व्योम तदीयवर्त्मसु धरा तत्तालवृन्तेऽनिलः ॥

Colophon :

अद्यापिपञ्चाशत् समाप्ता ।

Author :

Remarks—The following four *ślokas* are quoted after the end :

आश्यानकुन्तळभरामवदातदन्ता-
मव्याजनीलनयनामरुणाधरोष्ठीम् ।
तन्वीं तुरीयदिवसस्नपनाभिरामां
मन्ये मनोभवकृपाणलतां विकोशाम् ॥ १ ॥

चतुर्थेऽह्नि स्नातां त्रिदिनविरहापाण्डरमुखीं
रजोमुक्तां तन्वीं विमलवसनां स्वच्छदशनाम् ।
हरिद्राद्रैवथरी (?) प्रचुरपटगण्डां प्रियतमां
स धन्यः को भुङ्क्ते च्युतकुसुमशेषामिव लताम् ॥

नीत्वा पुष्पवती दिनत्रयमथ स्नात्वा चतुर्थे दिने
पत्रोर्णं परिधाय चन्द्रकमिळत्पाटीरपङ्काङ्किता ।
सर्वाङ्गीणहरिद्रया सुरभिला सौगन्धिकोत्तंसिनी
कस्तूरीतिलकोज्ज्वला सुकृतिना शातोदरी लभ्यते ॥ ३ ॥

उत्ताळसौरभनिसर्गमनोहरेषु
पुष्पेषु नैव रमते कमलादिकेषु ।
अत्यन्तखिन्नहृदया मधुपाङ्गनेयं
कल्पद्रुमस्य मकरन्दरसं स्मरन्ती ॥ ४ ॥

---

## ॥ नवरत्नलक्षणम् ॥

## 2069. NAVARATNALAKṢAṆAM.

Substance—Palm leaf. Size—$6\frac{1}{2}'' \times 2''$. Leaves—68. 8 lines per page and 14 letters per line. Script—Malayāḷam. No. of Granthas—450.

Subject—Description of various kinds of precious stones.

Beginning :

वामे भागे मरतकनिभं दक्षिणे विद्रुमाभं
ज्योतिर्जीयात् सविधविलसल्लब्ध....... ।
.....वरिषभश्चन्द्रकान्तं कपर्दे
कण्ठे नीलं करचरणयोः पद्मरागं वराढ्यम् ॥

...भिः प्रांशुभिर्यस्य सज्योत्स्नमनिशं नभः ।
यश्च विद्याधरवधूविलासागारमास्थुरः ॥

हरशेखर... ... ...वः ।
हराग्भ(?)हाससंश्लेषमेदुरैर्यत् प्रभोत्करैः ॥

व्यातन्य वियति शीतांशु-... (?) ।

End :

माणिक्यादीनि रत्नानि मण्डलाकृति विन्यसेत् ॥

मध्ये तु पद्मरागं च मुक्तादीनि यथाक्रमम् ।
पूर्वादिषु विन्य...दिक्षु तत्र समर्चयेत् ॥

आदित्यादिग्रहान् नित्यं तत्तत्पुष्पैः समर्चयेत् ।
इति दीक्षाविधिं कुर्यात् शास्त्रदृष्टेन वर्त्मना ॥

एतेन लभते सत्यं पुरुषार्थचतुष्टयम् ॥

Colophon :

इति रत्नशास्त्रे मौक्तिकलक्षणम् ।
इति रत्नलक्षणं समाप्तम् ।

Author—Agastya.

Remarks—Many verses are incomplete. In spite of several lacunæ the Ms. is brand new. Probably it is a copy of a damaged codex. The script is legible and neat.

---

## ॥ नवरत्नलक्षणम् ॥

## 2070 A. NAVARATNALAKṢAṆAM.

Substance—Palm leaf. Size—$9\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—6.

10 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—120.

Subject—Characteristics of most precious gems.

Beginning :

इमानि नवरत्नानि धार्याण्यासन् महीभुजाम् ।
नन्वस्थ्यादीन्यशुद्धानि न स्पृश्यानि भवन्ति हि ॥

पावनानि च कथ्यन्ते इति चेच्छ्रूयतामिदम् ।
स दैत्य इव धर्मार्थे जीवितं कस्त्यजेत् पुमान् ॥

अतः पुण्यवतोऽङ्गानि पावनानि न संशयः ।
वारक्रमेण वक्ष्यामि माणिक्यादीन् मणीनथ ॥

End :

पूर्वादिदिक्षु विन्यस्य ग्रहमन्त्रैर्विधानतः ।
तत्तत्पुष्पैः समभ्यर्च्य सुन्दरेशं समीक्ष्य च ।

मङ्गलानि समस्तानि कुमारस्यास्य सन्त्विति ।
उक्त्वा गम्भीरया वाचा महान्ति च बहूनि च ॥

रत्नानि च विचित्राणि मुदा स दयया ददौ ।
सन्तोषसागरे सर्वे मज्जन्तो मन्त्रिणस्तदा ॥

Colophon :

Author :

Remarks—This Ms. and the previous work are different from each other though the former appears to be an abridgment of the latter. The appended Ms. Aśvalakṣaṇam deserves special notice.

## ॥ अश्वलक्षणम् ॥

## 2070 B. AŚVALAKṢAṆAM.

Substance—Palm leaf. Size—$9\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—5. 10 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—100.

Subject—Characteristics of various kinds of horses.

Beginning :

ईश्वरः—

पुरा तल्लक्षणान्युक्त्वा पश्चाद्दातुं तुरङ्गमान् ।
समुद्युक्त इति प्राह वाचा भूपं प्रगल्भया ॥

श्रीमन् पाण्ड्यमहीपाल महीतलपुरन्दर ।
श्रुत्वा तल्लक्षणान्यादौ मनस्तुष्ट्यै शुभाय च ॥
मनोवेगादिवेगांस्तान् गृहाणाश्वानथ प्रभो ।

सर्वलक्षणसंयुक्ता यत्र तिष्ठन्ति वाजिनः ॥
तस्य राष्ट्रं यशो लक्ष्मीर्विजयोऽपि भवत्यथ ।

End :

असंख्याता आगताश्च तानिमान् पश्य भूपते ।
आवर्तौ गलमध्यस्थौ भर्तुर्यद् दुःखमृत्युदौ ॥

भर्तुर्जयोद्भवावर्त्तौ भयबन्धनदुःखदौ (?) ।
स्वामिनो मातरं हन्ति ह्यावर्तास्तूत्तरोष्ठतः ॥

अक्षावर्तस्तुरङ्गाणां हन्ति स्वामिनमाहवे ।
इत्याज्ञां प्रददौ तेभ्यस्तथाकुर्वन् भटाश्च ते ।

Colophon :

Author :

Remarks—The work is in the form of a dialogue between Īśvara and Pāṇḍyarāja.

॥ निधिप्रदीपः ॥

## 2071. NIDHIPRADĪPA.

Substance—Palm leaf. Size—9″ × 1½″. Leaves—32. 6—8 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—325.

Subject—Characteristics of places where subterranean treasure is extant.

Author—Siddhaśrīkaṇṭhaśambhu.

Remarks—The work is printed as No. 105 in TSS. It contains four *Paricchedas* only.

॥ भविष्योत्तरम् ॥

## 2072. BHAVIṢYOTTARAM.

Substance—Palm leaf. Size—9″ × 1½″. Leaves—5. 8 lines per page and 30 letters per line. Script—Malayāḷam. No. of Granthas—75.

Subject—Beginning : Same as No. 501.

End :

इत्याभाष्य मुनिश्रेष्ठः सन्मन्त्रमुपदिश्य च ।
ताभ्यां विस्मितचित्ताभ्यां सहितः स्वाश्रमं ययौ ॥

गुरुवर्यमनुज्ञाप्य मुदितौ राजदम्पती ।
ततः स्वभवनं प्राप्य विजह्रतुरनागसौ ॥

राजा दृढं समाश्लिष्य पत्नीं चन्दनशीतलाम् ।
सन्तोषं परमं लेभे निःस्वः प्राप्य यथा निधिम् ॥

अशेषवेदोपनिषत्पुराण-
शास्त्रावतंसोऽयमघान्तकारी ।
पञ्चाक्षरस्यैष महाप्रभावो
... ...कथितो वरिष्ठः ॥

Colophon :

इति ब्रह्मोत्तरखण्डे पञ्चाक्षरमहिमानुवर्णनं नाम त्रयोविंशोऽध्यायः ।

കിഴക്കേടത്തു ശൂലപാണിയെഴുതിത്തീൎത്തു ൯൦൦-ാമാണ്ടു കന്നി മാസം ൮-നു പുസ്തകമിദം

Author :

Remarks—The work is in the form of instruction on *Pañcākṣaramāhātmya* given by *Sūta* to *Śaunaka*. It contains only the 23rd chapter in *Brahmottarakhaṇḍa*. The expression "तृतीयत्रयोदशाऽध्यायौ" in RCMPL. is erroneous.

## ॥ भागवतैकादशसारः (सव्याख्यः) ॥

## 2073. BHĀGAVATAIKĀDAŚASĀRA with commentary.

Substance—Palm leaf. Size—17½" × 2½". Leaves—24. 10—13 lines per page and 72 letters per line. Script—Malayāḷam. No. of Granthas—1250.

Subject—Exposition of the methods of attaining *Mokṣa*.

Beginning:

श्रीभागवते एकादशस्कन्धे भगवता मुमुक्षूणां मुक्तिमार्गमुप-देष्टुकामेन मुक्तेः प्रथमसाधनमिदमिति निरूप्यते—

नृदेहमाद्यं सुलभं सुदुर्लभं
प्लवं सुकल्पं गुरुकर्णधारम् ।
मयानुकूलेन नभस्वतेरितं
पुमान् भवाब्धिं न तरेत् स आत्महा ॥

अस्यार्थः । नुः मनुष्यस्य देहं शरीरम् अधिकारितया मोक्षसंपा-दननियतसाधनम् । "मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये" इति मनुष्यस्यैव मोक्षसाधकत्वस्मरणात् ।

End:

"न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येती"ति तस्य प्राणोत्क्रमणाश्रवणात् प्राणे ब्रह्मणि लीने सति स्वयं केवलात्मना आकाशवत् तिष्ठतीत्यर्थः । एवं विदेहकैवल्यसिद्धिर्नातः प्रतिपाद्य-मस्तीति सर्वमनवद्यम् ।

कालकूटसमो दोषो यस्य कण्ठे लवायते ।
गुणोऽपि वा कलामात्रो यस्य भूषायते सतः ॥

तमहं पुरुषं वन्दे विद्यादोषहरं हरम् ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्कृष्णानन्दभारतीमुनिवर्यशिष्यब्रह्मानन्दभारतीकृत एकादशसारसंग्रहस्सव्याख्यानस्समाप्तः । गुरुभ्यो नमः ।

Author—Text and com : Brahmānandabhāratī.

Remarks—Same as No. 1692.

---

## ॥ रुक्माङ्गदचरितम् ॥

## 2074. RUKMĀṄGADACARITAM.

Substance—Palm leaf. Size—8″ × 2″. Leaves—114. 7—11 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—1550.

Subject—The story of Rukmāṅgada.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु । श्रीगुरुभ्यो नमः ।

मान्धाता—

पापेन्धनस्य घोरस्य शुष्कार्द्रस्य सुभूरिशः ।
को वह्निर्दाहकस्तस्य त्वं भवान् वक्तुमर्हति ॥

नाज्ञातं त्रिषु लोकेषु चतुर्मुखमुखोद्भव ।
विद्यते तव विप्रेन्द्र सर्वज्ञस्येति निश्चितम् ॥

अज्ञातं पातकं शुष्कं ज्ञानमात्रमुदाहृतम् ।
एष्यद्वाप्यथवातीतं वर्तमानं वदस्व मे ॥

निर्दहेत् कविना केन तदिच्छामि निवेदितुम् ।

वसिष्ठः—

श्रूयतां नृपशार्दूल! कविना केन निर्दहेत् ।
शुष्कार्द्रं पातकं घोरमेष्यातीतसमुद्भवम् ॥

संप्राप्य वासरं विष्णोर्यो नरस्संयतेन्द्रियः ।
उपवासरतो भूत्वा पूजयेन्मधुसूदनम् ॥

End :

वेदवेदाङ्गतत्त्वज्ञानर्चयामास शार्ङ्गिणम् ।
जागरं कुरुते रात्रौ पुराणश्रवणं तथा ॥

वाद्यगीतविनोदैश्च देवयागैस्सुशोभनैः ।
वसिष्ठवचनाद्राजा कृत्वैवं विष्णुतत्परः ॥

जगाम तत् परं ब्रह्म यत्र गत्वा न शोचति ।

Colophon :

इत्यादिमहापुराणे श्रीनारदीये रुक्मा।ङ्गदचरिते षट्त्रिंशोऽध्यायः । रुक्माङ्गदचरितं समाप्तम् ।

കൊല്ലം ൹൧൬൦മാണ്ടു... ... ... ... കന്യാ

Author :

Remarks—The work is borrowed from the Nāradīyapurāṇa.

## ॥ रुक्माङ्गदचरितम् ॥

## 2075. RUKMĀṄGADACARITAM.

Substance—Palm leaf. Size—8″ × 2½″. Leaves—134. 9—10 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—1600.

Subject etc.—Same as No. 2074.

Remarks—The following two additional benedictory verses occur in the beginning:

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥

वन्दे सुन्दरराजं तं श्रीवराहात्मकं विभुम् ।
पावनागारनिलयं जनार्दनतनुं हरिम् ॥

## ॥ व्यासशतकम् ॥

## 2076. VYĀSAŚATAKAM.

Substance—Palm leaf. Size—7″ × 2″. Leaves—8. 8 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—100.

Subject—Exposition of general propositions.

Beginning:

अज्ञानतिमिरान्धानां विभ्रान्तानां कुदृष्टिनाम् ।
ज्ञानाञ्जनशलाकाभिर्व्यासेनोन्मीलितं जगत् ॥

एतावज्जन्मसाफल्यं यदनायत्तवृत्तिता ।
ये पराधीनजन्मानस्ते चेज्जीवन्ति के मृताः ॥

साधोः परुषवाक्येन न मनो याति विक्रियाम् ।
नहि तापयितुं शक्यं सागराम्भस्तृणोल्कया ॥

End :

आयुष्मान् प्राङ्मुखो भुञ्ज्याद्धनवान् दक्षिणामुखः ।
पश्चिमे तु यशस्वी स्यान्न कदाचिदुदङ्मुखः ॥

विद्वद्भिरपि सम्बन्धादर्थं हरति भारती ।
पाषाणोऽपि मणिस्पर्शाज्जायते भूषणं महत् ॥

केतकीकुसुमं भृङ्गः खञ्जमानोऽपि सेवते ।
दोषान् किं नाम पश्यन्ति गुणापहृतचेतसः ॥

गुणाः कुर्वन्ति दूतत्वं दूरेषु वसतां सताम् ।
केतकीगन्धमाघ्राय स्वयं गच्छन्ति षट्पदाः ॥

Colophon :

व्यासशतकं समाप्तम् ।

Author :

Remarks—The text is borrowed from the various works such as Mahābhārata, Purāṇas Dharmaśāstras etc.

## ॥ व्यासशतकम् ॥

## 2077. VYĀSAŚATAKAM.

Substance—Palm leaf. Size—$9\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—5. 9 lines per page and 26 letters per line. Script—Malayāḷam. No. of Granthas—75.

Subject etc.—Same as No. 2076.

Remarks—A few leaves are missing in the middle.

---

## ॥ व्यासशतकम् ॥

## 2078. VYĀSAŚATAKAM.

Substance—Palm leaf. Size—$7'' \times 2''$. Leaves—5. 10—11 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—80.

Subject etc.—Same as No. 2076.

Remarks—Two leaves in the middle are blank. The following verses occur after the colophon :

निर्यान्त्या रतिवेश्मतः परिणतप्रायां विलोक्य क्षपां
गाढालिङ्गनचुम्बनादि बहुशः कृत्वाप्यसन्तुष्टया ।
एकं भूमितले निवेश्य चरणं तल्पे प्रकल्प्यापरं
तन्वङ्ग्या परिवर्तिताङ्गलतया प्रेयांश्चिरं चुम्बितः ॥

अकिञ्चिदपि कुर्वाणः सौख्यैर्दुःखान्यपोहति ।
तत्तस्य किमपि द्रव्यं यो हि यस्य प्रियो जनः ॥

यस्य यः प्रियः जनः तस्य किमपि तद् द्रव्यमित्यन्वयार्थः ।

अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम् ।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥

सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुकारिभिः ।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ॥

सूत्रमात्रस्य या व्याख्या सा वृत्तिरिति गीयते ।
उक्तानुक्तदुरुक्ताभिचिन्ता यत्र प्रवर्तते ।
वार्त्तिकं तदिति प्रोक्तम् ... .... ... ॥

आक्षेपं च समाधिं च कृत्वा वादान्तराणि तु ।
विततीकृत्य या व्याख्या तां टीकामाहुरुत्तमाम् ॥

शास्त्रैकदेशसंबद्धं शास्त्रकार्यान्तरे स्थितम् ।
आहुः प्रकरणं नाम ।
तर्कोऽनिष्टप्रसङ्गः स्यादनिष्टस्य द्वयी विधा ।
प्रामाणिकपरित्यागस्तथेतरपरिग्रहः ॥

व्याप्तिस्तर्कोऽप्रतिहतिरवसानं विपर्यये ।
अनिष्टाननुकूलत्वमिति तर्काङ्गपञ्चकम् ॥

प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम् ।
अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः ॥

गुणक्रियायां स्वातन्त्र्यात् प्रेषणे कर्मतां गतः ।
नियमात् कर्मसंज्ञायाः स्वधर्मेणाभिधीयते ॥

भेद्यभेदकयोश्चापि संबन्धोऽन्योन्यमिष्यते ।
द्विष्ठो यद्यपि सम्बन्धः षष्ठ्युत्पत्तिस्तु भेदके ॥

सम्बन्धः कारकेभ्योऽन्यः क्रियाकारकपूर्वकः ।
द्विष्ठोऽप्यसौ परार्थत्वाद् गुणेषु व्यतिरिच्यते ॥

आमन्तस्यापि तथा लिङन्तकृश्चास्तिभिः पदैरैक्यम् ।
अव्यवहितयोर्नियमादभिन्न एवेष्यते प्रायः ॥

आमः पञ्चम्यन्तेनाख्यातेनोपसर्गाणाम् ।
असमासेऽप्येकत्वं सम्मतमविवि... ... ॥

(धातोरर्थान्त)रे वृत्तेर्धात्वर्थेनोपसंग्रहात् ।
प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ॥

प्रतिषेधेऽप्यसत्तायामन्यत्वे सदृशेऽपि वा ।
कुत्साल्पविरहार्थेषु विपक्षेऽपि च नञ् भवेत् ॥

अन्यत्वे अब्राह्मणः, सदृशे अक्षत्रियः, कुत्सायाम् अपुत्रः, अल्पे अलवणा यवागूः, विरहे अतपस्विजनोऽयं विहारः, विपक्षे अधर्मः ।

अनौचित्याद्दते नान्यद् रसभङ्गस्य कारणम् ।
प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत् परा ॥
प्रधानत्वं विधेर्यत्र प्रतिषेधेऽप्रधानता ।
पर्युदासस्स विज्ञेयस्तत्रोत्तरपदेन नञ् ॥

'जुगोपात्मानमत्रस्त' इत्युदाहरणम् ।
अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता ।
प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ् ॥

'नवजलधरः सन्नद्धोऽयं न दृप्तनिशाचर' इत्युदाहरणम् ।

## ॥ शस्त्रलक्षणम् ॥

## 5079. ŚASTRALAKṢAṆAM.

Substance—Palm leaf. Size—5" 1½". Leaves—6. 8 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas—59.

Subject—Description of weapons.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

भूयः पृष्टः सुमतिना शस्त्राणामपि लक्षणम् ।
विश्वामित्रो महातेजा नृपं तं पुनरब्रवीत् ॥

विश्वामित्रः—

शृणुष्व नृपशार्दूल विशालाधिपते विभो ।
दूतलक्षणमस्त्राणां लक्षणं च वदामि ते ॥

दूतो विनीतः शुद्धात्मा सुभूषणसमन्वितः ।

End:

पटुप्रियालोकजयाधिकानां
वरः शरं नागगणान्तिकानाम् ।
जलेन धूलीलवभावयित्वा
निशागमं भौममथास्त्रसंख्या (?) ॥

വാളിന്റെ ലക്ഷണത്തിന് ആയം വരുത്തുവാൻ പത്തിൽ പെരുക്കി പന്ത്രണ്ടിൽ കഴിക്ക. വ്യയംക്ക് അറിവാൻ ഒമ്പതിൽ പെരുക്കി പതിനാലിൽ കഴിക്ക. യോനി അറിവാൻ മൂന്നിൽ പെരുക്കി എട്ടിൽ കഴിക്ക. പക്കം അറിവാൻ ഒമ്പതിൽ പെരുക്കി പതിനഞ്ചിൽ കഴിക്ക. നാൾ അറിവാൻ ഏഴിൽ പെ

രുക്കി ഇരുപത്തേഴിൽ കഴിക്ക. ആഴ്ച അറിവാൻ നാലിൽ പെരുക്കി ഏഴിൽ കഴിക്ക. ഈ ആറു കൂട്ടത്തിലും ശേഷിപ്പു വന്നതു എല്ലാം കൂടിയതു വയസ്സ്.

Colophon :

Author :

Remarks—The success in battle is prognosticated from the weapons used therefor. The work is in the form of instruction given by Viśvāmitra to Sumati.

---

## ॥ साळग्रामलक्षणम् ॥

### 2080. SĀḶAGRĀMALAKṢAṆAM.

Substance—Palm leaf. Size—5½′ × 1¾″. Leaves—37. 14 lines per page and 24 letters per line. Script—Grantha. No. of Granthas—800.

Subject—Description of different kinds of *Sāla-grāmas.*

Beginning :

गुरुं गणाधिपं वाणीं कृष्णञ्च परदेवताम् ।
नत्वा वक्ष्ये संग्रहेण पुण्यं श्रीमूर्तिलक्षणम् ॥

ब्राह्मादिषु पुराणेषु व्यासेनोक्तं महात्मना ।
एकत्र सुखबोधाय मया संगृह्यतेऽधुना ॥

विष्णुना गरुडायोक्तं ब्रह्मणा नारदाय च ।

सालग्रामशिलाभेदं ग्राह्याग्राह्यफलं तथा ॥

द्वारमानं तथा क्षेत्रं मूर्तीनां लक्षणं तथा ।
मत्स्यादिसर्वमूर्तीनां संख्यां पूजाफलं तथा ॥

इत्यादि सर्वमत्रैव (व)क्ष्यामस्साधुतुष्टये ।
गण्डक्याश्चोत्तरे तीरे गिरिराजस्य दक्षिणे ॥

क्षेत्रं वै विष्णुसान्निध्यात् सर्वक्षेत्रोत्तमोत्तमम् ।
योजनद्वादशमितं बहुतीर्थसमाकुलम् ॥

End:

नानवाप्यं हि तस्यास्ति नासाध्यं तस्य विद्यते ।
स वासुदेवो विज्ञेयः श्रीमूर्तिं यः प्रयच्छति ॥
एकया सकलैश्वर्यं पार्षदत्वं द्वितीयया ।
तृतीयया तु सायुज्यं. . . . . . . . . . ॥

Colophon:

इति ब्राह्मे पुराणे ब्रह्मनारदसंवादे साळग्रामदानविधिः ।

Author:

Remarks—The Ms. is old. After the colophon a few leaves deal with a portion of Vināyaka-samhitā.

---

॥ साळग्रामलक्षणम् ॥

2081. SĀḶAGRĀMALAKṢAṆAM.

Substance—Palm leaf. Size—7″ × 1¼″. Leaves—42. 5—6 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—275.

Subject—Same as No. 2080.

Beginning :

हरिः । श्रीगणपतये नमः ।

देवादिदेव सर्वज्ञ लोकेश कमलासन ।
त्वत्प्रसादान्मया सर्वं ज्ञेयं तत्त्वमशेषतः ॥

इदानीं श्रोतुमिच्छामि साळग्रामस्य लक्षणम् ।
तस्योत्पत्तिं निदानं च वर्णं क्षेत्रं फलाफलम् ॥

मूर्तिभेदं च सर्वस्य साळग्रामस्य मे वद ।
तदर्चनाय योग्यस्त्वं त्वद्वाक्येन चतुर्मुख! ॥

ब्रह्मोवाच—

साधु साधु महाप्राज्ञ कृतः प्रश्नः सुनिर्मलः ।
मयोच्यते विधानेन साळग्रामस्य लक्षणम् ।'

End :

सव्यापसव्यरेखाभ्यां मूर्तितस्सूक्ष्मचक्रतः ।
पार्श्वे खुरयुतो देवो धनञ्जयविभुश्शुभः ॥

दीर्घग्रम?मधोवक्त्रमपचक्रमधोमुखम् ।
हयग्रीवमिति ख्यातं संसारभयमोचनम् ॥

विश्वरूपो हरिस्साक्षात् पादाब्जतपदोपमः ।
बहुचक्राङ्कितो मूर्ध्नि पृष्ठे वापि भवेद्यदि ॥

यद्भरि... ...विद्यात् सततसौभाग्यदायकम् (?)।
द्विपक्षाभ्यामुतेपय.... ...पमोचनम् (?) ॥

Colophon :

ब्रह्मनारदसंवादे चतुर्विंशतिमूर्तिभेदो नाम सप्तमोऽध्यायः ।

Author :

Remarks—The Ms. terminates on the 8th chapter. The Ms. is much old and damaged

---

॥ साळग्रामलक्षणम् ॥

2082 A. SĀḶAGRĀMALAKṢAṆAM.

Substance—Palm leaf. Size—14½″ × 2″. Leaves—6. 8 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—165.

Subject—Same as No. 2080

Beginning :

वैनतेय उवाच—

साळग्रामस्य माहात्म्यं लक्षणं च जगत्पते ।
श्रोतुमिच्छामि भगवन् त्वत्तः पङ्कजलोचन ॥

श्रीभगवानुवाच—

अतः परं प्रवक्ष्यामि साळग्रामशिलार्चनम् ।
लक्षणञ्च यथा मूर्तेः शृणु तार्क्ष्य महामते ॥

द्वारभागे समे चक्रे दृश्येते नान्तरीयके ।
वासुदेवस्स विज्ञेयश्शुक्लाभश्च सुशोभनः ॥

ई चक्रे चक्रलग्ने तु पूर्वभागस्तु पुष्कलः ।
सङ्कर्षणश्च विज्ञेयो रक्ताभश्च सुवर्तुळः ॥

End :

दुर्लभं वासुदेवाख्यं दुर्लभं हरिहरात्मकम् ।
सुलभा मूर्तयः सर्वा लक्ष्मीनारायणं विना ॥

लक्ष्मीनारायणो यत्र देवस्तिष्ठति मुक्तिदः ।
तत्रैवैश्वर्यफलदा लक्ष्मीरास्ते हरिप्रिया ॥

साळग्रामशिलामात्रं यत्र तिष्ठति वै क्षितौ ।
तत्र सर्वाणि तीर्थानि क्षेत्राण्यायतनानि च ॥

Colophon :

इति श्रीधर्मसंहितायां साळग्रामलक्षणं नाम षोडशोऽध्यायः ।

Author :

Remarks—The Ms. contains chapters 14—16 of Dharmasaṃhitā. It is partly damaged.

## ॥ तुळसीमाहात्म्यम् ॥

### 2082 B. TUḶASĪMĀHĀTMYAM.

Substance—Palm leaf. Size—14⅓″ x 2″. Leaves—6 8 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—150.

Subject etc.—Same as No. 155 A.

Remarks—Only two works, Sālagrāmalakṣaṇa and

Tulasīmāhātmyas are noticed in RCMPL. But the Ms. contains one more work entitled, Gītāsāra which is separately catalogued.

---

## ॥ गीतासारः ।

## 2082 C. GĪTĀSĀRA.

Substance—Palm leaf. Size—$14\frac{1}{2}'' \times 2''$. Leaves—2. 7 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—35.

Subject—The reality of the supreme soul.

**Beginning :**

हरिः । श्रीगणपतये नमः ।

अर्जुन उवाच—

दुर्विज्ञेयं दुराराध्यं दुष्प्रगम्यं जनार्दन ।
अधोमुखं यथा भूत्वा हृदयं केन गच्छति ।

श्रीभगवानुवाच—

अधोमुखं तु हृत्पद्ममुद्धृत्य प्रणवेन तु ।
हुत्वा तु पञ्चकोशान्तं विशस्योद्धाहृतिं (?) पुनः ॥

हृदिस्थितं पङ्कजमष्टपत्रं
सकर्णिकं केसरमध्यनीलम् ।
अङ्गुष्ठमात्रं मुनयो वदन्ति

ध्यानेन विष्णुं पुरुषं पुराणम् ॥

अष्टपत्रं तु हृत्पद्मं द्वात्रिंशत्केसरं तथा ।
अष्टपत्रस्थिता देवा इन्द्रादिगुरुदेवताः ॥

End :

एतेन ध्यानयोगेन सर्वपापैः प्रमुच्यते ।
गीतासारमिदं पुण्यं गीतासारसमुच्चयम् ॥

तत्र स्थितं ब्रह्मज्ञानं वेदशास्त्रसुनिश्चितम् ।
इदं शास्त्रं मया प्रोक्तं गुह्यं वेदार्थविस्तरम् ॥

निर्मथ्य चतुरो वेदान् मुनिना भारतं कृतम् ।
भारतादधिपाकस्य गीतानिर्मन्थनस्य च (?) ॥

तत्स्वयं पद्मनाभस्य मुखपद्माद्विनिस्सृतम् ।
सारमुद्धृत्य कृष्णेन अर्जुनस्य मुखे हुतम् ॥

गीतागङ्गोदकं पद्मं पुनर्जन्म न विद्यते ।
यः पठेत् परया भक्त्या स गच्छेद्विष्णुसन्निधौ ॥

एतत्पुण्यं पापहरं धन्यं बुद्धिप्रसादनम् ।
पठतां शृण्वतां चैव याति विष्णोः परं पदम् ॥

Colophon :

Author :

Remarks—The work is a compendium of the Bhagavadgītā.

---

## ॥ सूक्तिसुधानिधिः ॥

## 2083. SŪKTISUDHĀNIDHI.

Substance—Palm leaf. Size—6″ × 2″. Leaves—99. 9 lines per page and 18 letters per line. Script—Malayālam. No. of Granthas—1000.

Subject—The story of the Rāmāyana.

Beginning:

हरिः । श्रीगणपतये नमः ।

विघ्नेशो वः स पायाद्विहृतिषु जलधिनिं पुष्करग्रेण पीत्वा
यस्मिन्नुद्धृत्य हस्तं वमति तदखिलं दृश्यते व्योम्नि देवैः ।
काप्यम्भः कापि विष्णुः क्वचन कमलभूः काप्यनन्तः क्वचिच्छ्रीः
काप्यौर्वः कापि शैलाः क्वचन मणिगणाः कापि नक्रादिसत्त्वाः ॥

शैलश्वापति यानतिक्षितिरहिस्स्वामी गुणत्यागमा
युग्यन्त्यब्जभवोऽपि सूतति हरिर्नाराचति स्वे द्विधा ।
किञ्चेन्दुश्च रवी रथाङ्गयुगळत्याश्चर्ययुक्तैस्सुरै-
र्दत्ताशीर्वचनो जयेति कलयेच्छ्रेयः पुरामन्तकः ॥

End:

क्रोशन्तीं समजीवयज्जनकजां तां पद्मपत्रेक्षणां
दुःखार्तां त्रिजटा त्रिविष्टपपतिश्रीरामभक्त्या युताम् ।
स्वामी जीवति सानुजस्सहकपी रक्षःपतिप्रेरिता
मायेयं त्यज दुःखमित्यथ रिपोर्माया विलीनाभवत् ॥

न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः
सोऽप्यत्रैव निहन्ति राक्षसभटान् जीवत्यहो रावणः ।

धिक् धिक् शक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा
स्वर्गग्रामकपाटलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः ॥

मूर्ध्नामुद्वृत्तकृत्ताविरळ... .... ...

... ... ... ... ... ...

Colophon :

श्रीमन्निम्मटिदेवराय नृपतिः स्वर्लोककल्लोलिनी-
कल्लोलप्रतिमल्लसूक्तिविभवो विद्वज्जनश्लाघितः ।
श्रीमद्बालचिकाण्डवस्तुविषयान् व्यस्तान्महानाटक-
श्लोकान् वर्णपदक्रमोज्ज्वलतरान् रम्यानकार्षीत् प्रभुः ॥

श्रीमद्राजाधिराजराजपरमेश्वरनिम्मटिदेवरायमहाराजविर-
चिते महानाटकसूक्तिसुधानिधौ बालकाण्डः समाप्तः ।

Author—Nimmatideva Mahārāja.

Remarks—The Ms. extends up to a portion of the *Yuddhakāṇḍa*.

---

## ॥ स्यमन्तकम् ॥

### 2084 A. SYAMANTAKAM.

Substance—Palm leaf. Size—14″ × 2″. Leaves—4. 10 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—125.

Subject—The story of the *Syamantaka* gem.

Beginning :

श्रीगणपतये नमः । अविघ्नमस्तु ।

यस्य यद्वस्तु नष्टं स्यादन्वेष्टव्यं नरेण तत् ।
स्यमन्तको मणिः साक्षाद्विष्णुना श्रीमता यथा ॥

अर्थनाशं मनस्तापं गृहे दुश्चरितानि च ।
वञ्चनश्चावमानश्च मतिमान्न प्रकाशयेत् ॥

प्रत्यासन्ने सति कलिबले धर्मतत्त्वे प्रलीने
भूयो भूयः समुदितबले दानवानां निकाये ।
भारार्तायां भुवि च भगवानाविरासीत् तदानी-
मिन्दोर्वंशे निजमुखरुचा निन्दितेन्दुर्मुकुन्दः ॥

End :

आमन्त्रितं हरिश्चापि स्वकरस्पर्शनिर्वृतम् ।
कन्यारत्नं मणिश्चापि गृहीत्वा प्रययौ पुरीम् ॥

इत्थं बहुविधैर्यत्नैरपवादस्य शान्तये ।
नष्टमन्विष्टवान् लेभे लक्ष्मीकान्तः स्यमन्तकम् ॥

यस्य यद्वस्तु ... ... ... ... .... ।

Colophon :

स्यमन्तकं समाप्तम् । हरिः ।

Author :

Remarks—Same as No. 1692.

---

## ॥ मन्त्राङ्कसारार्थः ॥

### 2084 B. MANTRĀṄKASĀRĀRTHA.

Substance—Palm leaf. Size—14″ × 2″. Leaves—9.

8—10 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—225.

Subject—Methods of discoursing upon Pratijñā-yaugandharāyaṇa.

Beginning:

श्रीकृष्णाय नमः ।

आ एक्कमोदअपरिदोसिदा ण दाव ओलग्गो मं अणुसरदि इत्यस्य ।

अनुदिनमन्यैस्सुलभे
निरीहमानदरिद्रकल्पलते ।
नृपतिनतिनरककारिणि
भगवति भिक्षे नमस्तुभ्यम् ॥

स्वदेवतामलयनृपतेर्याचकस्य च साधर्म्यं दर्शयति ।

कौपीनदण्डविभवः कृतविग्रहभूतिमान् ।
अवलग्नो जनपदे तिष्ठन् राजेव शोभते ॥

षड्भागहेतोरवलग्नचित्ताः षड्भिर्नयैर्भूमिकरात्तभोगाः ।
दण्डैस्समस्तं दमयन्त्यदण्ड्यानासादिताशा नरलो(क)पालाः ॥

End:

रागो द्वेषश्च लोभश्च त्रय एव महाविषाः ।
निर्विषो भगवान् रुद्रः आगाम्यायेन नाशिताः ॥

इदं मे स्यादिदं मे स्यादिति भेदविकल्पिनी ।
मानसी साध्यविषया वृत्तिरिच्छेति कथ्यते ॥

हन्म्येनं छेदयिष्यामि सर्वोपायैर्धनादिकम् ।
अस्येति तीव्रा या बुद्धिः स द्वेष इति कथ्यते ॥

कर्के मम बध्नन्ति । इति उन्मत्तस्य वचनं शृण्वन्नाह ।

Colophon :

Author :

Remarks—The Ms. contains only the 3rd Act.

---

## ॥ द्रौपदीस्वयंवरम् ॥

## 2084 C. DRAUPADĪSVAYAMVARAM.

Substance—Palm leaf. Size—14″ × 2″. Leaves—5. 8 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—140.

Subject etc.—Same as No. 1783.

## ॥ किरातम् ॥

## 2084 D. KIRĀTAM.

Substance—Palm leaf. Size—14″ × 2″. Leaves—7. 8 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—205.

Subject—The procurement of *Pāśupatāstra* by Arjuna.

Beginning :

कोदण्डाग्रनिपीडितः पशुपतिः इत्यस्य ।

कृतेऽथ किर्मीरवधे बकारिणा
वनं गतः काम्यकमस्तकण्टकम् ।

युधिष्ठिरो धौम्यमुखैस्सह द्विजैः
स्थितिं व्यधाद् द्वैतवनान्तिके चिरम् ॥

नाब्रह्म क्षत्रमृध्नोति नाक्षत्रं ब्रह्म वर्धते ।
ब्रह्मक्षत्रे हि संवृत्ते इह चामुत्र चर्ध्नुतः ॥

भवादृशेषु प्रमदाजनोदितं
भवत्यधिक्षेप इवानुशासनम् ।
तथापि वक्तुं व्यवसाययन्ति मां
निरस्तनारीसमया दुराधयः ॥

End :

इत्थं....ण...प्र प्रणिवधावानाश्लिष्य पार्थं सह(?)
दत्त्वा तूणकृपाणकार्मुकशरान्(शर्वः)प्रसादोन्मुखः ।
भीष्मद्रोणमुखान् कुरून् न तु परं जेतुं त्रिलोकीमपि
प्रीतः पाशुपतं समन्त्रमुपदिश्यास्त्रं तिरोऽभूद् गणैः ॥

कोदण्डाग्रनिपीडितः पशुपतिः सोऽयं किरीटी जितो
व्याधैर्देहभृतां...त्सु नियता वामा विधेर्वृत्तयः ।
.... .... ...दन्तु इशलमिणावप्य(?)
......ण......स्वा.. कं......गन्तव (?)॥

Colophon :

किरातं समाप्तम् ।

Author :

Remarks—Two leaves preceding the colophon are blank. The work embodies many anecdotes.

## ॥ चाटुश्लोकाः ॥

## 2034 E. CATUŚLOKA.

Substance—Palm leaf. Size—14″ × 2″. Leaves—53. 8 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—1250.

Subject—An amatory poem.

Beginning :

... ...पे...श्रुत्वा...नृष्य कलक-
.... ...वाद्यं कृत्वा पुरे ता श्लोका ब्रते ।
कर्तव्यमुद्भवकसन्म...ससु..प्रेसरा-
सात्विकत्रि..या...सारनिधये मारमाश्रिताय (?) ॥

स्वस्त्यस्तु नरककीर्तनावरघनमङ्गमर.... अन्योन्यं बद्धतरू...
तरुणानुरागे नृत्तेव भावविशदे दैताधरेव (?)।
अनातुरोत्कण्ठितयोः प्रसिद्ध्च समागमेन...रेव मां प्रति (?) ।
परस्परप्राप्तिनिराशयोर्वरं शरीरनाशोऽपि ममानुरागयोः ॥

End :

शय्या कैश्च(न) वासरैः परिचिता सख्या वचोलम्भनात्
ताम्बूलग्रहणं ततः परिचितं तन्व्यास्त्रिभिः पञ्चषैः ।
अभ्यस्तं दिवसैरथ त्रिचतुरैरङ्गाङ्गसंमेळनं
श्रोणीस्पर्शमहोत्सवोऽपि भविता श्वो वा परश्वोऽथवा ॥

उत्सङ्गोऽयं विपुलजघने भूषयस्वैष पाणिः
संवाहाय स्पृहयति शनैरर्पयस्वात्र पादौ ।

वक्षस्यस्मिन्नपि च कुचयोः स्वैरमारोप्य भारं
मत्कामत्कोल्लिखिततिभवं मध्यमुल्लाघयस्व ॥

अथ पार्गेहमुपाश्रितस्मह वमन दत्त्वा पुरो वीटिका-
मालापैर्मधुरैर्विनोद्य मुमुखीमङ्गं करेणामृजन् ।
आजिघ्रन् परिरभ्य गाढमधरं पीत्वाथ नीवीं श्लथन्
धन्यो रञ्जयति क्रमादभिनवां तन्वीं त्रियामामुखे ॥

Colophon.

Author:

Remarks—Malayalam words are frequently used in certain verses. Most of the stanzas are tinged with erotic sentiment. A few verses from the Raghuvaṃśa are quoted after the close.

## ॥ हनूमत्संहिता ॥

## 2085. HANŪMATSAMHITĀ.

Substance—Palm leaf. Size—$4\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—49. 7 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas—340.

Subject—Description of Hanūmān's prowess.

Beginning:

जयत्यनन्ताद्भुतसङ्करप्रियो महाबली वीरवलीमुखाग्रणीः ।
प्रचण्डमार्ताण्डसहस्रकान्तिः श्रीरामपादद्वय एकतानः ॥

कुम्भोद्भवायाम्बुधिशोषणाय विशुद्धविज्ञानशुभप्रदाय ।
श्रीरामपादद्वयनिश्रिताय महामुनीन्द्राय नमो नमस्ते ॥

अगस्त्य उवाच--

श्रुतं रामस्य माहात्म्यं तव वक्त्रान्महाकपे ।
ऐश्वर्यमतुलं तेजः प्रभावं परमात्मनः ॥

माधुर्यं गोपनीयञ्च यदलभ्यं सुरासुरैः ।
ब्रह्मा वेदविदां श्रेष्ठः कपिलो नारदस्तथा ॥

End :

इदं रहस्यं परमं सगोपनं
मयैव चोक्तं निगमागमात्परम् ।
यः श्रद्धया भक्तियुतः पठेद्वा
स याति रामस्य पदं महामुने! ॥

यो भावतो भावयते हृदब्जे
रामस्य रामोत्सववारिवर्णनम् ।
विवेकसत्सारसुधाधिकं रसं
न रोचते क्षारजलं यथा किल ॥

श्रुत्वा रहस्यं परमं पवित्रं
महामुनिस्सुस्थिरमानसोऽभवत् ।
परस्परालिङ्गनभावयुक्तं
दत्त्वा ययौ स्वाश्रममात्मनस्तदा ॥

गच्छन् गच्छन् पथि मुनिवरः पूर्णप्रेमामृताब्धौ
मज्जन् मज्जन् सपदि पदयोन्यासभेदं न वेद ।
पश्यन् पश्यन् हृदि रघुपतिं सीतया सेव्यमानं
हृष्यन् हृष्यन् परममुदितः प्राप गेहं चिराय ॥

गते मुनौ वायुसुतो हनूमान् स्वभावतो ध्यानसमा (?) अभूत्स्वयम् ।
स्मरन् स्मरन् रामरसं हृदब्जे बाह्येन्द्रियज्ञाननिवृत्तचेताः ॥

Colophon

इति श्रीहनूमत्संहितायां परमरहस्ये महारामोत्सव पञ्चमोऽध्यायः ।

श्रीरामाय नमः । श्रीगुरुभ्यो नमः ॥

Author

Remarks.—Five chapters are embodied herein.

शुभं भूयात् ।